संस्कृतविद्यापीठग्रन्थमालायाः त्र्यशीतिः पुष्पम्

# संशयवादः

## (Doctrine of Doubt)



प्रधानसम्पादकः

**प्रो. राधावल्लभः त्रिपाठी**

कुलपतिः

सम्पादकः

**प्रो. पीयूषकान्तदीक्षितः**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

( मानितविश्वविद्यालयः )

नवदेहली-110016

संस्कृतविद्यापीठग्रन्थमालायाः त्र्यशीतिः पुष्पम्

# संशयवादः

## (Doctrine of Doubt)

प्रधानसम्पादकः
**प्रो. राधावल्लभः त्रिपाठी**
कुलपतिः

सम्पादकः
**प्रो. पीयूषकान्तदीक्षितः**

सहसम्पादकाः
**डॉ. बिष्णुपदमहापात्रः डॉ. महानन्दझा**
**डॉ. रामचन्द्रशर्मा**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्**
(मानितविश्वविद्यालयः)
**नवदेहली-16**

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालय:)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-११००१६

आई.एस.बी.एन : 81-87987-57-X

वर्ष : 2013



मूल्यम् : 210/- ₹

मुद्रक:
**अमरप्रिंटिंगप्रैस:**
देहली-११०००९
दूरभाष: : 9871699565, 8802451208

Sanskrit Vidyapeetha book Series-83

# SAṀŚAYAVĀDAḤ

*Chief Editor*
**Prof. Radhavallabh Tripathi**
*Vice-Chancellor*

*Editor*
**Prof. Piyush Kant Dixit**

*Sub-Editors*
**Dr. Bishnupada Mahapatra Dr. Mahanand Jha**
**Dr. Ramchandra Sharma**

**Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha**

Publisher :
**Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha**
(Deemed University)
Qutab Institutional Area, New Delhi-110016
www.slbsrsv.ac.in



Year : 2013

ISBN : 81-87987-57-X

Price : Rs. 210/-

Printed at :
**Amar Printing Press**
Delhi-110009
Ph. 9871699565, 8802451208

# पुरोवाक्

**अक्षपादप्रणीतो हि विततो न्यायपादपः।**
**सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः ॥**

संसारेऽस्मिन् प्रेक्षापूर्वकारिणो यथाक्रमं पुरुषार्थचतुष्टयमर्थयमानाः पुरुषार्थाधिगमोपायमन्तरा पुरुषार्थावाप्तिं कथमप्यमन्यमानाः पुरुषार्थावगमकारणमेव प्रथममन्वेषन्ते। पुरुषार्थमार्गस्तावल्लोके दृष्टाऽदृष्टार्थभेदेन द्विधा प्रथितः।

तत्र तावद्दृष्टे विषय आहारनिद्रादिवृद्धव्यवहारप्रसिद्धेऽन्वय-व्यतिरेकाभ्यामधिगतसाधनभावे शास्त्रनिरपेक्षैवाऽव्याहता प्रवृत्तिः लोके दृश्यते। अत एव न 'मलिनः स्नायात्' 'बुभुक्षितोऽऽहारं गृह्णीयात्' इति शास्त्रं कथमप्युपयोगित्वमादधाति।

अदृष्टे तु स्वर्गापवर्गादिरूपेण परम्परासिद्धे सनातने विषये सहजसन्देहसन्दोहान्धकारविगतालोके लोकस्यान्धकारविधूननद्वारा प्रकाशाविष्करणे शात्रमेवैकमनुपमं ज्योतिरिति निरवद्यं तथ्यम्। शास्त्रमेवास्मदादेर्दिव्यं चक्षुरदृष्टपुरुषार्थोपायदर्शने, परमयोगिनान्तु योगसमाधिजन्यं ज्ञानादिकमप्युपायान्तरं भवतीति प्रस्तुतसन्दर्भे विशेषः। एतावतास्माभिः परिमितज्ञानशीलैरदृष्टानां पुरुषार्थोपायानां विज्ञानार्थं यथापरम्परं शास्त्रमेवाधिगन्तव्यमिति निर्गलति।

इमानि शास्त्राणि चतुर्दशधा प्रविभक्तानि चतुर्दशविद्यास्थान-पदेनाप्यभिलप्यन्ते। सन्दर्भेऽस्मिन् याज्ञवल्क्यस्मृतौ प्रोक्तञ्च-

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥[1]**

एवमप्यत्र प्रोक्तम्-

---

1 या. स्मृ. अ.1 श्लो.3

**अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।**
**पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ।।** इति

आसु शास्त्रस्वरूपासु चतुर्दशविद्यास्वथर्ववेदः ऋग्वेदो यजुर्वेदः सामवेदश्च, 'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'आत्मा ज्ञातव्यः' इत्यादिश्रुतिबलेन साक्षान्निसर्गत एव पुरुषार्थसाधनोपदेशपरा इति प्रसिद्ध्यति।

मन्वादिप्रणीतानि धर्मशास्त्राण्यपि तावद् अष्टकाशिखाकर्मप्रपा-प्रवर्त्तनादिपुरुषार्थसाधनोपदेशार्थान्येवेति सुसिद्धम्।

इतिहासपुराणाभ्यामपि विविधकथोपकथनादिवर्णनव्याजेन वेदप्रसिद्ध एवार्थो नैकधा विस्तार्यते, उक्तमप्येवम्-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति।।**[2] इति।

एवं वेदपुराणधर्मशास्त्राणां साक्षादेव पुरुषार्थसाधनोपदेशस्वभावत्वेन शास्त्रत्वं सुदृढं भवति।

व्याकरणकल्पज्योतिश्शिक्षाछन्दोनिरुक्तभेदेन नितरां प्रसिद्धानि वेदाङ्गानि खलु वेदार्थकरणे समुपयुक्तानां पदानां व्युत्पादनमुखेन परम्परया पुरुषार्थसाधनोपदेशोपयोगितां भजन्ते।

अव्यवस्थितानां वेदवचनानां विचारपुरस्सरमेवार्थावधारणसम्भवात् वेदवाक्यार्थविचारात्मिका मीमांसाऽपि परम्परयैव विद्यास्थानत्वं शास्त्रत्वं वा समधिकरोति।

वेदप्रामाण्यरक्षायां हेतुभूतो न्यायविस्तरस्तु चतुर्दशविद्यानां प्रदीपस्थानीयः। दुष्टतार्किकैः स्वकुतर्कबलेन यदा वेदगतं प्रामाण्यं निरस्यते तदा शिथिलितास्थाः सज्जना बहुवित्तव्ययाऽऽयाससाध्ये यागाद्यनुष्ठाने वेदार्थभूते निष्कम्पं नैव प्रवर्त्तन्ते। एवं वेदा अप्रतिष्ठिताश्चेद् वेदानुयायिनां वेदाङ्गानां मीमांसादिशास्त्राणां तावदप्रतिष्ठा स्वत एव सिद्ध्यति। स्थितावस्यां विपरीतायां, सर्वविद्यानां मूलस्तम्भभूता न्यायविद्या तावत् समेषां दुस्तार्किककल्पित-

---

2 म.भा.आ.अ.1 श्लो. 265

5. रमणीयार्थप्रतिपादकशब्दत्ववत्त्वाच्च काव्यम्, स्वेतरभिन्नम् (काव्येतरभिन्नम्) इति।

एवं रसगङ्गाधरकार: पण्डितराजस्तावदत्र पञ्चावयववाक्य-प्रयोगानुरोधेन सहृदयेषु स्वशिष्येषु काव्ये स्वेतरभेदानुमितिं कारयति। एतादृशेन स्वेतरभेदानुमानेन मननात्मकेन आचार्यो जगन्नाथ: शिष्याणां संशयं 'काव्यं स्वेतरभिन्नं न वेति' स्वरूपकं, काव्यलक्षणविधानेन समूलममुच्छेदयतीति स्पष्टम्।

एवमेव गुणालङ्कारमाध्यमेन काव्यस्य निरूपणावसरे भवति शिष्यसंशय: 'काव्यनिरूपणप्रयोजनं किञ्चिदेकं बहुविधं वा' 'विशेष्यतावच्छेदकं गुणालङ्कारौ तदतिरिक्तं वा' इति। अनयो: संशययो: समाधानार्थमधो दर्शिता: पङ्क्तय: शास्त्रस्वरूपा: श्रीजगन्नाथेन परमतार्किकेण निबद्धा:-

**तत्र कीर्तिपरमाह्लाद-गुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्ते: कविसहृदययोरावश्यकतया गुणालङ्कारादिभि-र्निरूपणीये तस्मिन् विशेष्यतावच्छेदकं तदितरबुद्धौ साधनञ्च तल्लक्षणं तावन्निरूप्यते-रमणीयार्थप्रतिपादक: शब्द: काव्यम् इति।**[4]

रसगङ्गाधरोपदेशेनानेन काव्यप्रयोजनानि कीर्तिपरमाह्लाद-गुरु-राज-देवताप्रसादाद्यनेकस्वरूपाणि सन्तीति निश्चितिर्जायते। असाधारणो धर्म: लक्षणमिति लक्षणलक्षणाधारेण काव्यस्य गुणालङ्कारविशिष्टस्य लक्षणं खल्वसाधारणधर्मात्मकं **यद्रमणीयार्थप्रतिपादकशब्दत्वं** तदेव गुणालङ्कारनिष्ठविशेषणतानिरूपिताया: काव्यनिष्ठविशेष्यताया: अवच्छेदकमिति स्पष्टं भवति। फलत: काव्यमुद्दिश्य विधीयमानयोर्गुणालङ्कारयो: काव्यनिष्ठविशेष्यतावच्छेदकत्वम्, उद्देश्यतावच्छेदक(गुणालङ्कार) विधेययो: (गुणालङ्कारयो:) ऐक्यभिया न स्वीक्रियते, प्रत्युत विधेयत्वं गुणालङ्कारयो:, उद्देश्यतावच्छेदकत्वं विशेष्यतावच्छेदकत्वं वा रमणीयार्थप्रतिपादकशब्दत्वरूपे काव्यलक्षणे सर्वथा विधेयभिन्ने धर्मे स्वीक्रियत इति निश्चिता मति: संशयनिवारिका समुत्पद्यते।

---

4 रस. गं. आन. 1 पृ04

प्रतिकूलतर्काणां सम्यगुपमर्दनं विधाय दृढतरवेदप्रामाण्याधायकानुकूलतर्काणां प्रस्थापनेन वेदवेदाङ्गप्रतिष्ठापने समर्था भवतीति मुक्तकण्ठेन शास्त्रमर्मवेत्तारः न्यायशास्त्रस्यास्य चतुर्दशविद्यास्थानेष्वभ्यर्हिततमत्वमुररीकुर्वन्ति।

आन्वीक्षिकीत्यपरनाम्नापि प्रसिद्धेऽस्मिन् न्यायशास्त्रे यद्यपि संशयादयः पदार्था यथा-यथं प्रमाणेषु प्रमेयेषु चान्तर्भवन्ति तथापि संशयादीनां न्यायप्रवृत्तिहेतुतया स्वतन्त्रपदार्थत्वेन पृथगुपदेशोऽनुमत एव।

न्यायस्तावन्न कदाप्यनुपलब्धे निर्णीते वाऽर्थे प्रवर्त्तते प्रत्युत संशयित एवाऽर्थे न्यायोऽयं सम्प्रवर्त्तत इति सिद्धान्तः। उक्तञ्च-

**तत्र नानुपलब्धेऽर्थे न निर्णीते प्रवर्त्तते।**
**किन्तु संशयिते न्यायः, तदङ्गं तेन संशयः॥** इति।[3]

सन्दर्भेऽस्मिन् न्यायः प्रतिज्ञाहेतूदाहरणोपनयनिगमनवाक्यानां समूह एवाभिमतः। न्यायस्यास्य प्रयोगस्तावत् प्रायः समेषु शास्त्रेषु अव्याहतं दृश्यते। एतादृशे न्यायप्रयोगे शास्त्रकाराणां प्रवृत्तिस्तावत् संशयानानां शिष्याणां संशयसापेक्षैवेति करतलामलकवन्नितरां स्फीतं तथ्यम्।

किं बहुना, आलङ्कारिका अपि काव्यप्रकाश-रसगङ्गाधरादिशास्त्रेषु काव्यस्वरूपादौ सन्दिहानान् सोत्सुकान् छात्रानुद्दिश्यैव **'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'** इत्येवं लक्षणादिमाध्यमेन काव्यस्वरूपादिकमुपदेष्टुं तावदहमहमिकया प्रवर्त्तन्ते।

वस्तुतः पण्डितराजो जगन्नाथो मननतरितीर्णविद्यार्णवो विद्यत इत्यत्र नास्ति सुधियां संशीतिलेशोऽपि। अत एव तु रसगङ्गाधरारम्भे तावदयं पञ्चावयवोपपन्नं न्यायमेवं शिष्यसंशयनिरसनधिया समुपन्यस्यति-

1. गुणालङ्कारविशिष्टं काव्यम्, स्वेतरभिन्नम् (काव्येतरभिन्नम्)

2. रमणीयार्थप्रतिपादकत्वात्

3. यन्न काव्येतरभिन्नं तन्न रमणीयार्थप्रतिपादकशब्दत्ववत् यथा 'पुत्रस्ते जातः' 'धनं ते दास्यामि' इत्येवं रूपाः शब्दाः

4. काव्येतरभिन्नत्वव्याप्यरमणीयार्थप्रतिपादकशब्दत्ववाँश्च काव्यम्

---
3 न्या.मं. आ.1 श्लो.30 पृ. 23

पुनरग्रे शिष्यसंशयः काव्यलक्षणान्तर्गतरमणीयतापदार्थमधिकृत्य सञ्जायते, 'रमणीयता, अर्थे विद्यमाना सौन्दर्यस्वरूपा भिन्नधर्मरूपा वा' इति। संशयस्यास्य वारिका शास्त्रपङ्क्तिः - **'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता'**। काव्यलक्षणे 'रमणीयार्थ' इति कथनं तावदर्थे रमणीयत्वं रमणीयता वाऽस्तीति द्योतयति। एवमेवार्थे विद्यमानायाः रमणीयताया विवरणं लोकोत्तर-आह्लादजनकज्ञानगोचरता क्रियते चेत्, अर्थे रमणीयता का इति जिज्ञासावत् 'आह्लादे विद्यमाना लोकोत्तरता जातिः, उपाधिः वा' इति संशयः सहजमेव शिरः उन्नमयति। संशयस्यास्य समाधाने अग्रेतना शास्त्रपङ्क्तिः समवतरति- **'लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः।'** समाधानेऽस्मिन् 'लोकोत्तरत्वं जातिविशेषः' इत्यंशेन पूर्वप्रस्तुतस्य संशयस्य समाधानं तु भवत्येव सहैव 'लोकोत्तरत्वम् आह्लादे अन्यत्र वा' 'लोकोत्तरत्वपर्यायः विलक्षणत्वं न वा' इत्यादिस्वरूपाणामपि संशयानां निरयासं समाधानमपि जायत एव।

एतावता साहित्यशास्त्रसामर्थ्यातिशयेन पण्डितराजजगन्नाथस्वीकृत-न्यायशैल्या परिष्कृतं त्रिविधं काव्यलक्षणं निःसंशयमेवं परिस्फुरति-

रमणीयता → विशिष्ट → अर्थप्रतिपादकः शब्दः काव्यम्

लोकोत्तरत्व → विशिष्ट → आह्लादजनकज्ञानगोचरता → विशिष्ट → अर्थप्रतिपादकः शब्दः काव्यम्

(आह्लादगत) चमत्कारत्व → विशिष्ट → आह्लादजनकज्ञानगोचरता → विशिष्ट → अर्थप्रतिपादकः शब्दः काव्यम्

(तदवच्छिन्ने)चमत्कारत्व → विशिष्ट → आह्लादे कारणं=जनकं भावना =ज्ञान-विषयता=गोचरता → विशिष्ट → अर्थप्रतिपादकः शब्दः काव्यम्

चमत्कार-जनक-भावना-विषय → अर्थप्रतिपादक → शब्दत्वम् काव्यत्वम्

**१.चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्**

**चमत्कारजनकता** → अवच्छेदकं → **( भावना )त्वम्** **तत्त्वम् =** काव्यत्वम्

भावना ← विषयक ← प्रतिपादितार्थ ← शब्द ← **यत्**

# भूमिका

**कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः।**
**मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः॥**

परब्रह्मस्वरूपः परमेश्वरः स्वमायया मोहापरपर्यायया नूनं सम्पूर्णं ब्रह्माण्डं सम्मोहयत्येव। परितः समभिव्याप्तं मोहनिबिडान्धकारं समूलमुत्सारयितुकामा मनीषिणस्तत्तच्छास्त्रप्रवर्त्तका उद्योगविशेषमपि शास्त्रप्रणयनमुखेनाकुर्वन्निति सुविदितमेव विदुषाम्। यद्यपि सर्वेषु शास्त्रेषु प्रायः संशयमूलकस्यास्य मोहस्यापनयनार्थं पर्याप्तः प्रयासस्तत्र-तत्र दरीदृश्यते। तथापि यादृशो मोहावरोधप्रयासो न्यायशास्त्रे सुलभो न तथाऽन्यत्र क्वापीति निरवद्यन्तथ्यम्। मन्य अत एव किरणावलीकारेणोदयनेन निरुपमं तर्कशास्त्रमधिकृत्य समुद्घोषितम्-

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं।**
**सूते च संस्कृतपदव्यवहारशक्तिम्॥**

**शास्त्रान्तराभ्यसनयोग्यतया युनक्ति।**
**तर्कश्रमो न कुरुते किमिहोपकारम्॥**

विविधो मोहो बहुविधशास्त्रसम्बद्धो लौकिकव्यवहारेऽपि प्रतिपदमनुभूयमानस्तर्कशास्त्रेणावरुद्धो भवतीति कथनं, तर्कशास्त्राऽनर्थान्तरभूतस्य न्यायशास्त्रस्य, लक्षणस्वरूपप्रामाण्यादिभिस्सामान्यविशेषस्वरूपेण पृथक्पदार्थरूपेण च मोहप्रतिपादनपरत्वमपि दृढं प्रकाशयति।

प्रथमं न्यायसूत्रं महर्षिगौतमविरचितं सन्दर्भेऽस्मिन् परमप्रमाणभूतम्। अत्र परिगणितेषु षोडशपदार्थेषु तृतीयः संशयः सर्वविधविचारप्रवर्त्तको मोक्षसाधनत्वेन तत्त्वतो ज्ञेयतया समुपदिष्टः। आत्मतत्त्वज्ञानं मोक्षात्मकस्य परमपुरुषार्थस्य जनकमित्याञ्जस्येन स्वीकर्त्तुं शक्यं परं संशयादिपदार्थानां

तात्त्विकं ज्ञानं कथं मोक्षं जनयतीति जिज्ञासां समादधता महर्षिणा वात्स्यायनेन संशयतत्त्वज्ञानस्यात्मतत्त्वज्ञानजनकतां प्रसाध्य मोक्षजनने प्रयोजकतापि सयुक्ति प्रसाधिता। अत्र संशयनिरूपणस्य मोक्षप्रयोजकतां प्रसाध्य पुनरस्य पृथक्प्रस्थानसाधनतामपि साधु व्यवस्थाप्य न्यायशास्त्रस्योपनिषद्विद्या-मात्रपरताया आपत्तिरपि सविधि तावन्निराकृता मुनिनेति विशेषतोऽवधेयम्।

प्राय: संशयग्रस्तेऽस्मिन् विमूढे संसारे चतुर्विधा:[1]

पुरुषा: सञ्चरन्ते। केचन तावत् प्रतिपन्ना: पुरुषा भवन्ति। केचन तु विप्रतिपन्ना: सर्वथा दृश्यन्ते। पुन: केचन सन्दिग्धास्तावदनुपदं संसरन्ते। शिष्टा अन्ये खलु विपर्यस्तास्तत्र-तत्र मुग्धा: किंकर्त्तव्यविमूढा: समवलोक्यन्ते।

सूक्ष्मेक्षिकया परित: व्याप्तं संसारं साक्षात्कुर्मश्चेत् प्रायश्चतुर्धा विभक्ता: पुरुषा अनायासन्तावदाविद्वदङ्गनागोपालं प्रसिद्धा एव। एवंविधेषु पुरुषेषु मध्य आद्ययोर्द्वयो: प्रतिपन्नविप्रतिपन्नपुरुषयो: सन्दर्भे लौकिकानां विशेषत: शास्त्राणाञ्च समुत्साहो नैव परिलक्ष्यते, प्रथमस्य तत्त्वज्ञानदार्ढ्यात् द्वितीयस्य पुरुषस्य च विपरीतं प्रतिपन्नत्वात्।

अन्त्ययो: द्वयो: पुरुषयो: सन्दिग्धविपर्यस्तयोर्मोहान्धकारनिवारणार्थमेव लोके शास्त्रे च प्राय: समान: संरम्भ: समुपलभ्यते। एतेषु चतुर्विधेषु

---

1. पुरुष: पुनश्चतुर्धा भिद्यते प्रतिपन्नोऽप्रतिपन्न: सन्दिग्धो विपर्यस्तश्चेति तत्र प्रतिपन्न: प्रतिपादयिता। इतरे सापेक्षा: सन्त: प्रतिपाद्या:। ते यदेन्द्रियादिसन्निकर्षमपेक्षन्ते तदा प्रत्यक्षेण, यदा लिऽङ्गदर्शनस्मृत्याद्यपेक्षन्ते तदाऽनुमानेन यदा पुनरुपदेशमपेक्षन्ते तदा शास्त्रं प्रवर्त्तते। न्या.द.भा.वा., अ.1 आ.1 सू01पृ.5
भवति च चतुष्प्रकार: पुरुष:; अज्ञ:, सन्दिग्ध:, विपर्यस्त:, निश्चितमतिश्चेति। तत्र निश्चितमतिरेव मुनि: अमुना शास्त्रेण अज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं व्युदस्यतीति तान् प्रति युक्त: शास्त्रारम्भ:। कुत: पुनरस्य मुने: निश्चितमतित्व जातम्, उच्यते- भवति तावदेष निश्चितमति:, स तु तप: प्रभावाद्वा देवताराधनाद्वा शास्त्रान्तराभ्यासाद्वा भवतु। किमनेन? तत्रैतत् स्यात्, तत एव शास्त्रान्तरादस्मदादेरपि तत्त्वाधिगमो भविष्यतीति किमक्षपादप्रणीतेन शास्त्रेण? परिहृ तमेतत् सङ्क्षेपविस्तरविधया शास्त्रप्रणयनस्य साफल्यात्, विचित्रचेतसश्च भवन्ति पुरुषा इत्युक्तम् । येषामित एवाज्ञानसंशयविपर्यया विनिवर्त्तन्ते, तान् प्रत्येतत् प्रणयनं सफलमितीदं प्रणीतवानाचार्य:। न्या.मं.आ.1पृ. 4-12
2. बृह. उ. 2.4.5

प्रसिद्धेषु पुरुषेष्वन्त्ययोरुभययोः पुरुषयोरज्ञकोटौ समावेशो मम दृष्ट्या सम्भवदुक्तिकः। अनयोरेव मूढनाम्नाऽपि लोके प्रायो व्यवहारो भवतीत्येतदपि रम्यं वचः। एषु प्रथमः प्रतिपन्नपुरुषस्तु विशेषज्ञकोटौ प्रविशतीति विज्ञेयम्। विप्रतिपन्नस्तावद्विशिष्टः पुरुषः ज्ञानलवदुर्विदग्धसमाख्ययाऽलङ्कर्त्तुं शक्य इति मे भाति। फलतः प्रसिद्धोऽयं श्लोकोऽप्यभिमतं तथ्यं पोषयितुमलम्भवतीति ध्येयम्–

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि तन्नरं न रञ्जयति।।**

एतावताऽज्ञा मूढाः सन्दिग्धा विपर्यस्ताश्च वा ये पुरुषा लोकेऽस्मिन् लोकान्तरे वा परिभ्रमन्ति तेषामेवोपकारधिया लोके सुधियां शास्त्रकाराणाञ्च शास्त्रसंरचनादौ प्रवृत्तिर्भवतीति सर्वमवदातम्। सन्दिग्धविपर्यस्तयोः पुरुषयोरपि सन्दिग्धस्य संशयः सारल्येनापाकर्त्तुं शक्यो विपर्यस्तस्य च पुरुषस्य शुक्तिकादौ रजतबुद्ध्यापन्नस्य विपर्यासो भ्रमो वा नेदं रजतमित्याकारकाऽऽबाधज्ञानं ब्रह्मणाऽप्यपनेतुमशक्यमेव।

मन्ये अत एव सर्वत्र शास्त्रादौ संशयानाः शिष्या विराजन्ते येषां संशयापनयनार्थं शास्त्रचर्चा नूनमहमहमिकया प्रतिपदं संशयतन्निवारणपुरस्सरा तत्त्वज्ञानार्थं प्रसरति।

न्यायदर्शनकर्त्तुर्मुनेरक्षपादस्यादिमं न्यायसूत्रं श्रुत्वा शिष्यस्य संशयो जागर्ति किं षोडशतत्त्वानां तत्त्वज्ञानात् साक्षान्निःश्रेयसाधिगतिर्भवति? संशयस्यास्य निरसनार्थं 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायाद् अपवर्गः' इति सूत्रमवतरति।

वैशेषिकदर्शनकर्त्तुः कणभक्षस्यादिमं सूत्रम् 'अथाऽतो धर्मं व्याख्यास्यामः' इति विश्रुत्य 'सूत्रनिर्दिष्टो 'धर्म' शब्दः पुण्यवाचकः पदार्थधर्मवाचको वा' इति तावदन्तेवासिनो संशयः समुदेति यस्य निरासार्थं 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति द्वितीयं वैशेषिकसूत्रमवतरति।

महर्षिजैमिनिप्रणीतायां द्वादशलक्षण्यां 'अथाऽतो धर्मजिज्ञासा' इति पूर्वमीमांसारम्भोपपादनपरस्यादिमस्याधिकरणस्य प्रथमं सूत्रम्। मीमांसाशास्त्रे

संस्कृतवाङ्मयः शास्त्रार्थसङ्कुलः वादकथास्वरूपेण राराजते। न्यायदर्शनदिशा 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्ष-परिग्रहो वादः' इति सूत्राधारेण समग्रेऽपि भारतीये शास्त्रे कस्यापि विषयस्य विजिज्ञासितस्य, प्रमाणैः तर्कैश्च साधनं निषेधः वा क्रियते उपक्रमेऽस्मिन् सिद्धान्तविरोधः नैव सह्यते। वादेऽस्मिन् पक्षप्रतिपक्षपरिग्रहपुरस्सरा या चर्चा प्रवर्त्तते सा नियमितं पञ्चावयववाक्योपपन्ना भवतीति विशेषतो ज्ञेयम्।

यस्य संशयस्य प्रभावेण विचारः प्रवर्त्तते तत्रापि संशयपुरस्सरो विचारो नितान्तमावश्यक इति तावन्निर्विवादं तथ्यम्। लक्षणस्वरूप्रामाण्यादिभिः संशये विज्ञात एव संशयकरण-निराकरणपाटवं विज्ञातुं शक्यते। संशयस्वरूपञ्च यथाशास्त्रं विज्ञातुमेव दिवसत्रयव्यापिनी संशयसंवादसङ्गोष्ठी दर्शनसङ्कायान्तर्गतेन न्यायवैशेषिकविभागेन ससमारम्भं समायोजिता। संशयसंवादसङ्गोष्ठ्यामस्यां शास्त्रमर्मज्ञैश्चिन्तकैराचार्यैर्गवेषकैश्छात्रैश्च प्रस्तुतानां शोधप्रवणानां निबन्धानां सम्पादनं विधाय ग्रन्थाकारेण प्रकाशनं विधीयत इति नितरां प्रसन्नतास्थानम्।

प्रकाशनकर्मण्यस्मिन् दृष्ट्युन्मीलनदक्षा यशःशरीरा अस्माकं कुलगुरवः परमात्मस्वरूपाः शिवसायुज्यमवाप्ताः श्रद्धेयाः प्रो. वाचस्पत्युपाध्याया मूलप्रेरणास्त्रोतांसि सन्तीति सविशेषं संस्मर्यन्ते।

राष्ट्रियसंस्कृतसंस्थानेन मानितविश्वविद्यालयेन समायोजितायां राष्ट्रस्तरीयायां सङ्गोष्ठ्यां संशयमधिकृत्य मयैको निबन्धः कुलपतिवर्याणां प्रो. राधावधल्लभत्रिपाठिवर्याणां सभापतित्वे प्रस्तुतः। तदानीमेवाचार्याणां त्रिपाठिवर्याणां साक्षात् प्रेरणया संशयविषयं पुरस्कृत्य पुष्कलं विशिष्टं विचारयितुं सत्सङ्कल्पो मनस्यङ्कुरितोऽभूद्यस्य सुफलं संशयसंवादग्रन्थस्वरूपेण साम्प्रतं समुपस्थितं विद्यते। एवं नैकधाऽधीतिबोधाचरणप्रचारणमुखेन अस्मादृशान् सहजतया नियोजयतां कुलपतीनां प्रो. राधावल्लभत्रिपाठिमहाशयानां कार्त्तज्ञविशेषमत्राहमाविष्करोमि।

संशयवादस्यास्य सम्पादने संशोधनादौ च साहाय्यमनुतिष्ठतां न्यायवैशेषिकविभागीयानां सहायकाचार्याणां विद्याविनयसम्पन्नानां परमसुहृदां डा.विष्णुपदमहापात्राणाम् डा. महानन्दझामहाशयानां डा. रामचन्द्रशर्मणाञ्चा-

भारमावेदयामि।

विश्वविद्यालयस्यास्य प्रकाशनविभागे लब्धप्रतिष्ठानाम् आचार्याणां प्रो. रमेशकुमारपाण्डेयानां प्रकाशनसम्बद्धं प्राशासनिकं सामयिकं सहयोगं स्मारं-स्मारं स्वीयां कृतवेदितामावेदयामि। प्रकाशनविभागं स्वानुभवेन श्रमेण च अनवरतं सम्पोषयन्तो डा.ज्ञानधरपाठकमहोदया अपि अवसरेऽस्मिन् सविशेषं समर्यन्ते। संशयवादग्रन्थप्रकाशनप्रसङ्गे एतेषां सहयोगः नूनं स्तुत्यः।

अस्माकं विभागीयैश्छात्रैः श्रीछविलालन्यौपाने श्रीसम्मन्विश्व-प्रकाशादिभिश्च समये-समये यद्योगदानं टङ्कणादिकर्मणि विहितं तदर्थमिमे साशीर्वादं स्निग्धैः स्नेहैः सभाज्यन्ते। संशयसंवादसङ्गोष्ठ्याः समायोजनावसरेऽहर्निशं साहाय्यमाचरताञ्जोगीन्द्र-दीपक-सियङ्का-धीरज-रामनिहोर-राजेशप्रभृतीनामन्तेवासिनामनितरसाधारणमुत्साहमवेक्ष्यातितरां प्रीता वयं शुभाशीर्भिरेतान् दृढं सम्पोषयामः।

अन्ते येषां सहयोगविशेषेण संशयवादस्यास्य मनोरमं पुस्तकाकारं स्वरूपं प्रकाशमागतं तेषां श्रीमतां हीरालालमहोदयानां निरतिशयमुद्योगविशेषं नितान्तं विपरीतायां स्थितावपि निभाल्य स्नेहसम्मिश्रैः साधुवादैः एतानभिनन्द्य सज्जनान् पद्येनानेन संस्मरामि -

**स्यादेव मेऽलसतया मतिमान्द्यतो वा**
**दोषः क्वचित्क्वचिदथापि न कापि शङ्का ।**
**नैसर्गिकी खलु गुणीकरणप्रवीणा**
**शक्तिः सदा विजयते भुवि सज्जनानाम् ॥**

**पीयूषकान्तदीक्षितः**
आचार्यः, अध्यक्षश्च न्यायवैशेषिकविभागे

सम्वत् - 2069
पौषकृष्ण, दशमी

संस्कृतवाङ्मयः शास्त्रार्थसङ्कुलः वादकथास्वरूपेण राराजते। न्यायदर्शनदिशा 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्ष-परिग्रहो वादः' इति सूत्राधारेण समग्रेऽपि भारतीये शास्त्रे कस्यापि विषयस्य विजिज्ञासितस्य, प्रमाणैः तर्कैश्च साधनं निषेधः वा क्रियते उपक्रमेऽस्मिन् सिद्धान्तविरोधः नैव सह्यते। वादेऽस्मिन् पक्षप्रतिपक्षपरिग्रहपुरस्सरा या चर्चा प्रवर्त्तते सा नियमितं पञ्चावयववाक्योपपन्ना भवतीति विशेषतो ज्ञेयम्।

यस्य संशयस्य प्रभावेण विचारः प्रवर्त्तते तत्रापि संशयपुरस्सरो विचारो नितान्तमावश्यक इति तावन्निर्विवादं तथ्यम्। लक्षणस्वरूप्रामाण्यादिभिः संशये विज्ञात एव संशयकरण–निराकरणपाटवं विज्ञातुं शक्यते। संशयस्वरूपञ्च यथाशास्त्रं विज्ञातुमेव दिवसत्रयव्यापिनी संशयसंवादसङ्गोष्ठी दर्शनसङ्कायान्तर्गतेन न्यायवैशेषिकविभागेन ससमारम्भं समायोजिता। संशयसंवादसङ्गोष्ठ्यामस्यां शास्त्रमर्मज्ञैश्चिन्तकैराचार्यैर्गवेषकैश्छात्रैश्च प्रस्तुतानां शोधप्रवणानां निबन्धानां सम्पादनं विधाय ग्रन्थाकारेण प्रकाशनं विधीयत इति नितरां प्रसन्नतास्थानम्।

प्रकाशनकर्मण्यस्मिन् दृष्ट्युन्मीलनदक्षा यशःशरीरा अस्माकं कुलगुरवः परमात्मस्वरूपाः शिवसायुज्यमवाप्ताः श्रद्धेयाः प्रो. वाचस्पत्युपाध्याया मूलप्रेरणास्रोतांसि सन्तीति सविशेषं संस्मर्यन्ते।

राष्ट्रियसंस्कृतसंस्थानेन मानितविश्वविद्यालयेन समायोजितायां राष्ट्रस्तरीयायां सङ्गोष्ठ्यां संशयमधिकृत्य मयैको निबन्धः कुलपतिवर्याणां प्रो. राधावधल्लभत्रिपाठिवर्याणां सभापतित्वे प्रस्तुतः। तदानीमेवाचार्याणां त्रिपाठिवर्याणां साक्षात् प्रेरणया संशयविषयं पुरस्कृत्य पुष्कलं विशिष्टं विचारयितुं सत्सङ्कल्पो मनस्यङ्कुरितोऽभूद्यस्य सुफलं संशयसंवादग्रन्थस्वरूपेण साम्प्रतं समुपस्थितं विद्यते। एवं नैकधाऽधीतिबोधाचरणप्रचारणमुखेन अस्मादृशान् सहजतया नियोजयतां कुलपतीनां प्रो. राधावल्लभत्रिपाठिमहाशयानां कार्त्तज्ञविशेषमत्राहमाविष्करोमि।

संशयवादस्यास्य सम्पादने संशोधनादौ च साहाय्यमनुतिष्ठतां न्यायवैशेषिकविभागीयानां सहायकाचार्याणां विद्याविनयसम्पन्नानां परमसुहृदां डा.विष्णुपदमहापात्राणाम् डा. महानन्दझामहाशयानां डा. रामचन्द्रशर्मणाञ्चा–

भारमावेदयामि।

विश्वविद्यालयस्यास्य प्रकाशनविभागे लब्धप्रतिष्ठानाम् आचार्याणां प्रो. रमेशकुमारपाण्डेयानां प्रकाशनसम्बद्धं प्राशासनिकं सामयिकं सहयोगं स्मारं-स्मारं स्वीयां कृतवेदितामावेदयामि। प्रकाशनविभागं स्वानुभवेन श्रमेण च अनवरतं सम्पोषयन्तो डा.ज्ञानधरपाठकमहोदया अपि अवसरेऽस्मिन् सविशेषं समर्यन्ते। संशयवादग्रन्थप्रकाशनप्रसङ्गे एतेषां सहयोगः नूनं स्तुत्यः।

अस्माकं विभागीयैश्छात्रैः श्रीछविलालन्यौपाने श्रीसम्मन्विश्वप्रकाशादिभिश्च समये-समये यद्योगदानं टङ्कणादिकर्मणि विहितं तदर्थमिमे साशीर्वादं स्निग्धैः स्नेहैः सभाज्यन्ते। संशयसंवादसङ्गोष्ठ्याः समायोजनावसरेऽहर्निशं साहाय्यमाचरताञ्जोगीन्द्र-दीपक-सियङ्का-धीरज-रामनिहोर-राजेशप्रभृतीनामन्तेवासिनामनितरसाधारणमुत्साहमवेक्ष्यातितरां प्रीता वयं शुभाशीर्भिरेतान् दृढं सम्पोषयामः।

अन्ते येषां सहयोगविशेषेण संशयवादस्यास्य मनोरमं पुस्तकाकारं स्वरूपं प्रकाशमागतं तेषां श्रीमतां हीरालालमहोदयानां निरतिशयमुद्योगविशेषं नितान्तं विपरीतायां स्थितावपि निभाल्य स्नेहसम्मिश्रैः साधुवादैः एतानभिनन्द्य सज्जनान् पद्येनानेन संस्मरामि -

**स्यादेव मेऽलसतया मतिमान्द्यतो वा**
**दोषः क्वचित्क्वचिदथापि न कापि शङ्का ।**
**नैसर्गिकी खलु गुणीकरणप्रवीणा**
**शक्तिः सदा विजयते भुवि सज्जनानाम् ॥**

**पीयूषकान्तदीक्षितः**
आचार्यः, अध्यक्षश्च न्यायवैशेषिकविभागे

सम्वत् - 2069
पौषकृष्ण, दशमी

# प्रथमः
## निबन्धस्तबकः

# अनुक्रमः

## प्रथमः निबन्धस्तबकः

## द्वितीयः मूलग्रन्थस्तबकः

# DOUBTING AS PRECURSOR OF KNOWING

**Prof. S.R.Bhatta**

## Introduction

Every school of philosophy in India has attempted a theory of knowledge on which its metaphysical and axiological structures are based. The ultimate goal of all philosophizing, and for that matter of all human enterprises, is to realize 'perfection' or fullest all round efflorescence of ones potentialities (*mokṣa* or *niḥśreyasa*) as the *summum bonum* of life and existence. For this realization knowledge of reality (*Tattvajñāna*) is an essential and necessary prerequisite. So, a theory of knowledge is regarded as *propaedeutic* to a theory of reality because before knowing reality one has to know knowledge itself. This requirement is grounded in the fact that to philosophize is to reflect on the nature of reality given in experience. Every experience is caused by and pertains to an object. This reference to an object can be cognitive or non-cognitive, such as emotive, volitional etc. A cognitive reference consists in revelation of an object (*prakāśa*) or in making a cognizer aware of it. Though every cognitive reference reveals an object, there is always a possibility of going astray in this reference and there is no guarantee that it will adequately and faithfully reveal its object. This possibility of error and doubt in cognitive reference necessitates an enquiry into its veracity.

The entire epistemological pursuit begins with and centers round this task. So along with consideration of objects of knowledge *(prameya)* and modes of knowing *(pramaṇa)* there has to be awareness about error and doubt as well so that they can be eliminated.

## Need for evidencing knowledge

A cognitive reference is cognition of an object in terms of its existence, nature, characteristics, relations and functions etc. It may reveal its object *as it is* *(yathārtha)* or *different from what it is (ayathārtha)* or there may be lack of determination of this ( *samśaya*).That cognition is knowledge which reveals its object as it is..., i.e., which is non-discordant *(avisamvādaka)* with its object. Such cognition is technically known as *pramā* (*pramāṇa* in some schools where no distinction is drawn between *pramā* and *pramāṇa*). All other varieties of cognition are treated as different from knowledge. In other words, only that cognition can claim the status of knowledge the non-discordance or truth of which is well established through adequate evidences. There has to be assuredness/indubitability (*asaṃdigdhatva*) with regard to the truth of that cognition. The truth of knowledge is to be established on the basis of cogent and convincing evidence known as *pramāṇa*.

Indian thinkers point out three essential components of knowledge. They are cognitive reference to an object (*arthaviṣayakatva),* exactitude of reference (*yathārthatva*) and indubitability (*asaṃdigdhatva*) about exactitude. The object must be real and not fictitious. The exactitude of reference means true apprehension of the object and indubitability means adducing adequate and sufficient evidence (s) for its truth.

In this paper an attempt will be made to analyze the phenomenon of doubt in its diverse forms and facets and

from different perspectives. The treatment is not confined to any one system of thought as the chief feature of Indian thought is '*bahuvidhavāda*' and the mode of philosophizing is '*Vāde vāde jāyate tattvabodhaḥ*'.

## Importance of doubt

Doubting is very important in human life to avoid credulous nature leading to blind faith and dogmatic belief. That is why Lord Buddha used to advise '*parīkṣya madvacaḥ grahyaḥ*' (Accept what I say only after proper inquiry). This is what Pyrrho said among the Stoics in ancient Greece.

Vātsyāyana, the commentator on the Nyāyasūtrās, opines that inquiry or logical investigation begins only in respect of '*saṃśayite'arthe*'[1] (doubtful object of cognition), though of course Jayanta, another Nyāya thinker, states that '*saṃśayamantareṇāpi*' inquiry can begin apart from doubt as well. The other factor can be *jijñāsā* (inquisitiveness), *siṣadhayiṣā* (will to prove), or *paripriccha* (questioning attitude). That is why in Indian epistemological thinking we find different approaches to '*pakṣa*' mainly discussed in the context of *anumāna.*

## Need to eliminate doubt

Though doubting is useful, persistent doubting is detrimental, as Yājñavalkya rightly says about persistent questioning in the Bṛhadāraṇyakopaniṣad. Doubting can be a starting point for rise of knowledge or for verification of knowledge. This is what the *Bhagavadgīṭā* advised (*Tadviddhi praṇipātena paripraśnenasevayā*)[2] or Lord Buddha

---

1. तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते। तत्र नानुपलधे न
न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशयितेऽर्थे।
न्या.सू. वा.भा. अ.1 सू.1 पृ. 04

2. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।
श्रीमद्भगवद्गीता, अ.4, श्लो. 34

advised as stated earlier. But persistent doubt is harmful to mental peace (*aniṣṭanivārana prasaṅga*). That is why the *Bhagavadgītā* says, '*Saṃsayātmā vinaśyati*'. In order to have unwavering activity *(niśkaṃpapravṛtti)* also resolution or elimination of doubt is necessary. So doubt should be initial and not final.

Here a distinction can be drawn between cessation of doubt and elimination of doubt. Cessation of doubt is psychological and elimination of doubt is logical. Psychological satisfaction may lead to cessation but doubt may crop up again. Only logically there can be final elimination. This distinction becomes significant in the context of the controversy between Udayana and *Śrīharśa* and *Śrīharśa* and Gaṅgeśa and we shall revert to it later on. A deeper analysis of this issue is really enlightening and outstanding contribution to epistemology.

**Some conceptual distinctions**

The theorizing about doubt is known as *saṃśayavāda*. *Saṃśayavāda* (Skepticism) is to be distinguished from *Ucchedavāda* (Nihilism). In *Ucchedavāda* doubting leads to denial of possibility of acquiring knowledge . It can be brought under *Vitaṇḍā*. The Tattvopaplavasiṃha of Jayarāśi Bhaṭṭā belongs to this category. Likewise, Skepticism is to be distinguished from *ajneyāvāda* (Agnosticism). The *'Neti Neti'* statement of the Upaniṣads can be subsumed under this. In Lokāyata/ Cārvāka philosophers and in Bhartṛhari, the author of Vākyapadīya ( II.32-35), we find Limited Skepticism. In Nāgārjuna (Vigrahavyāvartinī and Mādhyamikakārikā) and Śrīharsa (Khaṇḍanakhaṇḍakhādya) we have Methodological Skepticism. In western thought we find several other verities of *Saṃśayavāda* like Epistemological Skepticism of Descartes and Psychological Skepticism of Hume. One can find their parallels also in Indian thought

referred to in the Pālī Ṭripiṭakās. It has to be noted that the Lokāyata Skepticism has provided tremendous impetus for the development of Nyāya and Buddhist epistemology. Likewise Śrīharṣa's contribution can not be minimized in respect of Gaṇgeśa's philosophy. It is not the objective of this paper to go into details of these multiple approaches and their inputs.

## Nature of doubt

Gautama in the Nyāyasūtras has given a very precise and comprehensive definition of *saṃśaya* which needs cognizance and analysis. He defines it as follows : "*Samānekadharmrpapatteovipratipatterupalabdhyanu-palabdhyavyavasthtasca viśeṣāpekṣo vimarśaḥ samśayaḥ*".[1] It can be split as follows:

1. *Samanadharma*
2. *Anekadharma*
3. *Tayorupapatti*
4. *Vipratipatti*
5. *Upalabdhi*
6. *Anupalabdhi*
7. *Avyavasthataḥ*
8. *Visesāpekṣaḥ*
9. *Vimarśaḥ*

The above definition can be explained as follows:

Doubt arises due to having conflicting notions about one and the same object. Here mind oscillates ( *dolayate*)

---

1. न्या.सू. अ.1, आ.1, सू.23, पृ. 30

between two or more alternative characterisations of that object arising from the cognition of common qualities of two or more objects and non-cognition of specific qualities of that object. Due to intervention of memory (Praśastapāda rightly brings in the role of memory) mutually incompatible notions are suggested simultaneously and there is no fixity on any one notion resulting in absence of firm assuredness in anyone. Here there is no assertion or denial of anyone and hence there is no definite judgment. It is absence of assured cognition and oscillation between conflicting notions. Symbolically it can be put as "It may be this or that" or "It may be this or that or none or something else".

### Difference among *pramā*, *viparyaya*, *saṃśaya* and *anadhyavasāya:*

It may be useful to draw briefly distinction among some cognate epistemic terms stated above.

*Pramā* stands for a true cognition which carries certitude in its truth. It is uni-judgmental and well-evidenced.

*Viparyaya* means a false judgment which was earlier taken to be true and later on its falsity is exposed on valid grounds and assuredness in its truth is withdrawn. It is also uni-judgmental.

*Saṃśaya* is multi-judgmental and here there is no fixity on one single judgment. It is indecisive *(anavadhāranaka).*

*Anadhyavasāya* is incipient cognition. It is vague sensation. It is unripe cognition and non-judgmental. We may not call it as cognition at all. That is why in the Nyāya system it is not given cognizance. It is also different from pre-judgmental cognition known as *nirvikalpaka pratyakṣa*. *Saṃśaya* is also to be distinguished from '*Iha*' accepted in the Jaina tradition. Likewise Pt. Badarinath Shukla in his Hindī Commentary on the Tarkabhāṣā of Keśavamiśra

(p.337-8) has differentiated *saṃśaya* from *samuccaya.* But he regards '*saṃbhāvanā*' (probability) as a variety of saṃśaya.

## Typology of doubt

On different grounds there can be different classifications of doubt. One classification can be as follows:

1. About the existence or absence of an object, e.g., whether a tumor is cancerous or not, or whether God exists or not etc.

2. About properties of a substantive, e.g. whether sound is eternal or not, or whether light traverses in the form of waves or corpuscles

3. About the presence of this or that object, e.g. whether it is a post or a human.

Here the alternatives can be two or more. The alternatives may all be false and this may necessitate further investigation. The alternatives may all be true in different contexts or from different perspectives. Or, only one alternative may be true and the rest false. It will be an interesting as well as rewarding exercise to work this out.

The other typology is on the basis of type of *pramāṇa*. For example in the Nyaya system four types of *pramāṇa* are accepted and hence there can be four types of doubt pertaining to perceptual, inferential, testimonial and analogy-based identificational cognitions.

## Generating conditions of doubt

Doubt may be generated by any defect in the causal collocation (*kāraṇa sāmagri*) of knowledge as follows

(a) Defective functioning of cognitive senses due to various reasons. Epistemological thinkers have discussed these factors in great depth.

(b) Doubt may be generated due to faulty intervention of memory.

(c) Mental delusion or disturbance may cause doubt.

(d) And finally absence of conclusive evidence may result in doubt.

**Role of *Tarka* in removal of doubt**

We may now revert to the problem of elimination of doubt. Just as doubting is helpful in arriving at truth, removal of doubt is also equally needed. Doubt arises due to presentation of conflicting alternatives *(koṭis)* which may be contrary or contradictory, each one claiming truth. This leads to oscillation and indecision in mind. So doubt has to be overcome to remove the deadlock and unless this is done knowledge can not be arrived at.

In the case of different *pramāṇas* there are different *modi operandi.* For example, in the case of perceptual and analogical cognitions repeated observation, controlled experiment, crucial evidence (*vinigamaka*) etc. are helpful. In testimonial cognition conscience may be helpful but it can not provide logical elimination. The Pūrva Mīmāṃsā system accepts 'Codanā' for this purpose which is regarded as infallible. But this problem of elimination of doubt has been discussed threadbare in the context of *anumāna* and this needs some analysis.

The Carvaka/Lokayata thinkers raised serious objection for accepting validity of *anumāna*. Bhartṛhari gave a classical formulation to their objections. This was extended by Nāgārjuna and Śrīharṣa in their own way. Though Udayana in Nyayakusumāñjali (Chapter III) and Śāntarakṣita in Tattvasaṃgraha (1481-3) try their best to answer Cārvāka/ Lokāyata objections, their replies have

not been logically satisfactory. Any recourse to *tarka* or *kalpana* does not satisfy logical requirements. Udayana's arguments have been responded to by Śriharṣa, and Gangeśa's replies to Śriharṣa have been infirm. One may even refer to Raghunātha's commentary on Khaṇḍana-khaṇḍakhādya for this. *Tarka* rests on contradiction and contradiction itself rests on *tarka*. This involves the fallacy of *petitto principii*. In fact no human experience is immune from doubt and Śabara, the Pūrva Mīmāmsā thinker, is right in this. For empirical purposes epistemology works well but ultimately it falls down. That is why Adi Saṃkara has put all *pramāṇavyavahāra* under *avidyā* following the Upaniṣads. I have discussed this in great detail in my paper "Some Reflections on Advaita Vedāntic Concepts of Māyā and Avidyā" in the book "The Tradition of Advaita" edited by Prof. R Balāsubramanian. The point is that only on psychological grounds can doubt can be resolved and there can not be logical elimination of doubt. The devil of doubt will always haunt human cognitive enterprises and we have to put up with that. But this is not pessimism but a warning to be vigilant. We do need epistemological inquiries but we have to be cautious and on guard.

# DOUBT IN NYAYA PHILOSOPHY

सुधारससहोदरा सरसभावपूर्णान्तरा
जयत्यमरभारती भुवनमोदमातन्वती।
जयत्यपि गजाननो विविधविघ्नविद्रावणो
जयत्यपि च शङ्करः सकलमङ्गलस्याकरः।।

**Prof. Piyushkant Dixit**

The English word Doubt is made of five letters and according to the Nyaya-Philosophy the cause of doubt is also five-fold. In the Nyaya Philosophy there are sixteen categories of elements, in which the third element is doubt[1]. After discussing the means of knowledge and the subject of knowledge, Gautama, the author of the Nyaya-Sutras mentions doubt as the third element for discussion. All the elements in this World could be known by Pramanas or the means of knowledge. Thus, first of all, the means of knowledge or Pramana are discussed in Nyaya-Darshan. After knowing the means of knowledge, it becomes necessary that we should know the subject of knowledge. Thus in Nyaya-Philosophy, Prameya or the Subject of knowledge is next in priority at the time of composition of sixteen categories. This process of arranging different objects according to the Nyaya school is accepted as a base by reputed thinkers.[2]

When we prepare ourselves to arrange the elements through Nyaya or we start to examine the elements through the means of knowledge, then we necessarily need the prior presence of doubt. In this way, it is a well-established fact that to start any thinking process anywhere, the background of doubt is very important.

Though the merger of doubt and certain other categories of elements is possible in Prameya[3] or the subject of the means of knowledge, but Doubt and certain other subjects are specially mentioned as elements in Nyaya-Philosophy. This is one of the distinguishing aspects of Nyaya-Philosophy that sets it apart from other streams of Indian Philosophies which are chiefly concerned with discussing only spiritual elements like the supreme spirit.

It is true that doubt is the starting point in the examination of any element through different means of knowledge. At the same time, it is also very clear that if any knowledge is certain to begin with, then no one can try to examine it through the means of knowledge. In Nyaya-Darshan when Maharshi Gautam defines Nirnaya or decision, the first word 'Vimrishya'[4] is indicating the existence of doubt, the second word 'Pakshapratipakshabhyam' is devoted to supposition and apposition and the third word 'Arthavadharanam' denotes the decision of any element. From this definition we can see that how doubt is accepted as the base situation in the effort to reach any decision in life.

The process of Nyaya is said to become active[5] only then when there is Samshaya or doubt. According to Vatsyayan, Nyaya is "Pramanaih Artha-Pareekshanam" i.e. Examination through means of knowledge. I think that Anveeksha also has a similar meaning to Nyaya. According to Vatsyayan "Pratyakshagam-ashritanumanam" i.e. inference (Anumanam), based on perception and oral testimony is Anveeksha[6], and that particular treatise or Shastra is Anveekshikee, Nyaya-vidya or Nyaya-Shastra where inference, based on perception and oral testimony is used to take proper decisions.

At the very starting of Nyaya-Darshan, Vatsyayana, explaining the definition of doubt clarifies that "Vimarsha"[7] is Samshaya or doubt. When we read the writings of Vatsyayan carefully in this context, then it becomes very clear that doubt or Samshaya is just the opposite of Nirnaya or certain decision or Tatva-Jnana. Further, clarifying doubt or Samshaya, Vatsyayana

mentions that "there is something, may be this or that" this form of indefinite knowledge or Vimarsh is Samshaya.

When Gautama defines doubt then he put the most clear picture of it in the following Sutra—

***'Samananekadharmopapattervipratipatter-upalbdhyanupalabdhyavyavasthatash cha Visheshapeksho Vimarshah Samshayah'***[8]

In this Sutra, the last two words 'Vimarshah Samshayah' are meant as the definition of Samshaya or doubt by Maharshi Gautama. Here, the second word— Samshya the Lakshya or locus of the definition of doubt and the first word Vimarsha is the Lakshana or definition of Doubt or Samshya. The word 'Vimarsha' is made by two words - 'Vi' and 'Mrishi'. Here 'Vi' is the prefix and 'Mrishi, is a root. The meaning of the prefix 'Vi' is 'opposite' and the meaning of the 'Mrishi' root is 'knowledge'[9]. To get full meaning of 'Vimarsha' we understand the intent by adding here another phrase - 'at the same locus'. In this way the full meaning of Vimarsha becomes "at the same locus, the knowledge of elements which have an opposite sense to each other'. This type of knowledge is called 'Doubt' according to Nyaya-Shastra. Really this is a general definition of doubt.

Due to the existence of different causes of doubt, Maharshi Gautama has divided doubt into five. Among the five identified causes of doubt, the **first cause is 'Samana-dharmopapatti'** i.e., at the same locus, knowledge of two opposite elements with equal qualities.[10] For example, during dusk when we see any old dry tree from a particular distance then we fall into doubt that 'is it a dry tree or any human body?'. In this example the common locus is the object -dry tree. The two opposite elements that are cognized are a dry tree and a person. These two elements have similar qualities of tallness and form etc. (which gives rise to the confusion) which remains in the dried tree and person equally. Because of the knowledge of these equal qualities at the same

locus, a genuine doubt comes into existence. According to Muni Vatsyayana, at a particular locus, where we become genuinely confused that 'is it a dry-tree or any human form?' one feels that 'here I recognize equal qualities i.e. tallness and form but was not able to find any specific quality of dry tree or person to discriminate between the two'. This type of feeling is called 'Visheshapeksha'[11]. This Visheshapeksha is also a common cause of doubt.

According to Gautama-Sutra the second cause of doubt is "Aneka-dharmopapatti". Here, the meaning of 'Aneka-Dharma' is 'Asadharana-Dharma' i.e. unique quality of any element[12]. In other words, the unique quality of any particular element, separates that element from other similar elements. At the same time, such a quality also differentiates the element from dissimilar elements. In this way 'Aneka' meaning is similar and dissimilar elements.[13] Due to knowledge of these similar and dissimilar elements, on the suggestion of a unique quality or property, often people fall into doubt. For example in the case of Shabda or 'word', the unique property is 'creation due to separation' (when we utter the word through the mouth then, before uttering the word many parts of the mouth organ get connected and separated from each other to produce the sounds that constitute a word. Thus, we can say that a word was created due to separation.) After knowing this unique property i.e. 'existence due to separation', we develop doubt whether the 'word' is substance, quality or action; [14]because all these three elements (substance, quality and action) can be said to be created due to separation. The doubt is with regard to understanding whether 'word' (Shabda) should be classified as a substance (Dravya), quality (Guna) or action (Karma).

The third cause of doubt is 'Vipratipatti' i.e. that particular sentence which is the cause of doubt. According to Vatsyayana the meaning of Vipratipatti is the non-confirmation of a single knowledge. For example one Shastric tradition confirms the existence of the soul whereas another Shastric tradition says that there is no soul in the world. If there is no specific forceful argument

to support any one view, then 'in this world soul exists or not' is a doubt comes in existence.[15]

The fourth cause of doubt is 'Upalabdhi-Avyavastha'. It means the irregularity of perception. When we see that in the pond water exists and the knowledge of water also occurs, but in desert sand during summer the water factually does not exist whereas the knowledge of water occurs. In such cases, the occurence of the knowledge of water is indicative of the factual (confirmed) presence of water in one case (pond etc.) whereas in other cases it is indicative of only a mirage not accompanied by the factual presence of water. The doubt that arises is with respect to the significance of the knowledge of water itself. It is not certain if knowledge of water indicates the factual presence of water or not[16].

The last and fifth cause of doubt is 'Anupalabdhi-Avyavastha'. It means the irregularity of non perception. We see that in the root of any tree there is water but it is not known or actually perceived. There are also obvious impossible elements whose presence is not perceived (like the horn of a hare). In this position, it is not certain if the non perception of an element indicates the impossibility of an element or the mere inability to perceive an element.[17].

In Gautam-Sutra there is 'Cha' which indicates that the listing of doubts is not comprehensive. Due to this 'Cha' we can understand that another cause of doubt is "Vyapya-Samshaya'. Because of Vyapya-Samshaya we fall into doubt about Vyapaka or that element that overcovers (Parvades).

Doubt comes to end (is resolved) when we are able to know any specific property in the subject of doubt. Keeping this situation in mind we can say that 'Visheshadarshan-janyh Samshyah'. That is, due to the lack of specific knowledge doubt takes place in our life[18]. Once the specific confirmatory knowledge is obtained, the doubt ceases to exist. It is pertinent to understand

this in the light of the exhortations in the Vedas, Upanishads and Shastras that Manan or re-appreciation of elements is necessary. Once an element has been realized through Shastric knowledge, there should be no scope for the presence of doubt that will facilitate Manan or re-appreciation. In this context, the answer is very clear that in this type of condition we can put Aharya-Sanshaya[19] or artificial-doubt to make the basis for Manan or examination of Shastric elements. This reinforces the importance of the element of doubt to keep alive the Shastric tradition.

In western philosophy the idea that doubt cannot exist in doubt is credited to Descartes. However, even in ancient Nyaya texts, this sentiment is found. For example in the Nyaya Sutras it is mentioned that___**'yathoktadhyavasayadeva tdvisheshapekshat Samshaye Nasamshayo Natyanta Samshayo Va'**[20]. This clearly reflects the fact that Shastric traditions have been the torch bearers leading the intellect of mankind for the benefit of all.

---

१. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वा–भासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगम: न्या०सू०१

२. अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपितमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देश:। ततोऽवसरतो बुभुत्सितप्रेयमेयस्य, ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपणीयेऽभ्यर्हितयोर्न्यायपूर्वाङ्गयो: संशयप्रयोजनयो:, तत्राप्यभ्यर्हिततया संशयस्य प्रथमम्। न्या०सू०, अ०१ आ०१ सू०१ वृ० पृ०५

३. तत्र संशयादीनां पृथक्वचनमनर्थकम्; संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति। सत्यमेतत्, इमास्तु चतस्रो विद्या: पृथक्प्रस्थाना: प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या। तस्या: पृथक्प्रस्थाना: संशयादय: पदार्था:। तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात्, यथोपनिषद:। तस्मात् संशयादिभि: पदार्थै: पृथक् प्रस्थाप्यते।

४. 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय:' इति। न्या०सू०, अ०१ आ०१ सू०४१ पृ०४४

५. तत्र नानुपलब्धे न निर्णीतेऽर्थे न्याय: प्रवर्त्तते, न्या०सू०, भा० अ०१ आ०१ सू०१ पृ०४

६. क: पुनरयं न्याय:? प्रमाणैरर्थपरीक्षणं न्याय:। प्रत्यक्षाऽऽगमाश्रितमनुमानं, साऽन्वीक्षा, तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्। न्या०सू०, भा० अ०१ आ०१ सू०१ पृ०४

७ यथोक्तम्– 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' इति। विमर्शः संशयः। पक्षप्रतिपक्षौ न्यायप्रवृत्तिः। अर्थावधारणं निर्णयः। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः प्रमेयेन्तर्भवन्नेवमर्थं पृथगुच्यते। न्या०सू०, भा० अ०१ आ०१ सू०१ पृ०४

८ न्या०सू० अ०१ आ०१ सू०२३ पृ० ३०

९ क्रमप्राप्तं संशयं लक्षयति। संशय इति लक्ष्यनिर्देशः, विमर्श इत्यत्र 'विशब्दो विरोधार्थः, मृषिर्ज्ञानार्थः। एकस्मिन् धर्मिणीति पूरणीयम्। तेन "एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञानं संशयः"। न्या०सू०, अ०१ आ०१ सू०२३ वृ० पृ०३०

१० तत्र कारणमुखेन विशेषलक्षणान्याह– समानेति। उपपत्तिर्ज्ञानं, तथा च समानस्य विरोधिकोटिद्वयसाधारणधर्मस्य, ज्ञानादित्यर्थः। न्या०सू०, अ०१ आ०१ सू०२३ वृ० पृ०३०

११ समानमनयोर्धर्ममुपलभे, विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्तिका वर्त्तते। तेन विशेषापेक्षो विमर्शः संशयः। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३०

१२ अनेकधर्मः असाधारणधर्मः, तज्ज्ञानादित्यर्थः। तथा च साधारणधर्मवद्धर्मिज्ञानजन्यः, असाधारणधर्मवद्धर्मिज्ञानजन्यश्चेत्यर्थः। न्या०सू०, अ०१ आ०१ सू०२३ वृ० पृ०३०

१३ अनेकधर्मोपपत्तेरिति। समानजातीयमसमानजातीयञ्चानेकम्। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३०

१४ अस्ति च शब्दे विभागजन्यत्वं विशेषः। तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३०

१५ व्याहतमेकार्थदर्शनं विप्रतिपत्तिः। व्याघातो विरोधोऽसहभाव इति। अस्त्यात्मेत्येकं दर्शनमाह। नास्त्यात्मेत्यपरम्। न च सद्भावासद्भावौ सहैकत्र सम्भवतः। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३०

१६ सच्चोदकमुपलभ्यते तडागादिषु। मरीचिषु वाऽविद्यमानमुदकमिति। ततः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते, अथासत्? इति संशयो भवति। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३१

१७ सच्च नोपलभ्यते मूलकीलकोदकादि। असच्चानुत्पन्नं विरुद्धं वा ततः क्वचिदनुपलभ्यमाने संशयः। किं सन्नोपलभ्यते उतासत्? इति संशयो भवति। न्या०सू०, अ०१ आ०१ सू०२३ भा० पृ०३१

१८ चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति। विशेषापेक्षः कोटिस्मरणसापेक्षः। वस्तुतस्तु संशये धारावाहिकत्वं स्यादत आह– विशेषेति। "विशेषं विशेषदर्शनं अपेक्षते निवर्त्तकत्वेन" तथा च विशेषदर्शननिवर्त्त्यत्वकथनमुखेन विशेषादर्शनजन्यसंशय इत्युक्तम्। न्या०सू०, अ०१ आ०१ सू०२३ वृ० पृ०३१

१९ न च निर्णीतेऽपि मननविधानान्न संशयस्य न्यायाङ्गत्वम् इति वाच्यम्, आहार्यसंशयोपगमात्। न्या०सू०, अ०१ आ०१ सू०१ वृ० पृ० ५

२० यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा। न्या०सू०, अ०२ आ०१ सु०५ पृ० ६५

# संशयविषये आचार्याणां दृष्टिः

**डॉ. विष्णुपदमहापात्रः**

परमपुरुषार्थस्यापवर्गस्यावाप्त्यर्थं न्यायसूत्रकारैः आदौ न्यायशास्त्रारम्भे प्रमाणादिषोडशपदार्थानामुल्लेखः कृतः "**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ताऽवयव-तर्कनिर्णय-वाद-जल्प- वितण्डा- हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः**"[1] इति न्यायसूत्रकारस्य मतपोषणाय चरमोत्कर्षप्रतिपादनाय च तत्त्वचिन्तामणि-कारैरुच्यते- "**अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय**"[2] इति तत्र प्रमाणप्रमेयेषु संशयादिपदार्थानामन्तर्भावित्वात् तेषां संशयादिपदार्थानां पृथक् निर्वचनं निरर्थकमिति केचन जल्पन्ति। तेषां मतनिरासार्थं नैयायिकाः पञ्चकल्पान् सयुक्तिकमुपस्थापयन्ति।

**प्रथमकल्पे** तावदित्थं प्रवदन्ति- यदि संशयादिपदार्थानां पृथग् निर्वचनं नैव क्रियते तर्हि इयं न्यायविद्या अध्यात्मविद्यामात्रं स्यात्। न्यायविद्यायाः पृथक्प्रस्थानत्वव्यवस्थापनाय संशयादीनां पृथग्निर्वचनं कर्तव्यमिति भाष्यकारस्याशयः। तथा हि "**इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतानामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः तेषां पृथग्वचनमन्तरेणा-ऽध्यात्मविद्यामात्रमियं स्याद् यथोपनिषदः तस्मात् संशयादिभिः पदार्थैः पृथक्प्रस्थाप्यते**"[3]।

**द्वितीयकल्पे** च शास्त्रप्रवृत्तौ उद्देश्यलक्षणपरीक्षेति "**त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति**"[4] त्रयाणां कारणत्वं साधितं भाष्यकारैः। "**तत्र लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा**"[5] भवति। विचाराङ्गत्वेन परीक्षाङ्गत्वेन संशयस्योपयोगित्वं विद्यत

एव। अतः वार्तिककारैरुक्तं "**परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते**"[6] इति। निश्चितवस्तुनः शास्त्राभ्युपगमकपरत्वाद् यद्यपि शास्त्रे संशयः नैव विधेयः तथापि शास्त्रे विचारस्य साधनसामर्थ्यासामर्थ्यपरिज्ञानत्वाद् विचारः संशयपूर्वक एव भवतीत्युक्तं वार्तिककारैः–"**तस्मात् संशयपूर्वक एव विचारस्तन्मूलकत्वात् परीक्षाविधेः संशयपूर्वं परीक्ष्यते**"[7] इति। अर्थात् संशयमन्तरा विचारस्य प्रसक्तिरेव नास्ति। "**अथातो ब्रह्मजिज्ञासा**"[8] इत्यत्र ब्रह्मजिज्ञासायाः कारणं संशय एव भामत्यां मिश्रपादैः प्रतिपादितम्–"**तदनेन विप्रतिपत्तिः, साधकप्रमाणाभावे संशयबीजमुक्तम्। ततश्च संशयाज्जिज्ञासोपपद्यते**"[9] इति।

**तृतीयकल्पे तु "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"**[10] इति न्यायसूत्रे प्रमाणलक्षणमन्तरा प्रमाणविभागदर्शनात् "**सामान्यज्ञानमन्तरा विशेषजिज्ञासानुदयात्**" इति नियमव्यतिक्रमाच्च भवति संशयः, किं सूत्रकारैः प्रमाणसामान्यलक्षणं कृतं न वा? टीकाकारैस्तु तादृशसंशयनिवृत्त्यर्थं भामत्यामुक्तं सूत्राणां बह्वर्थसूचनादिति। एतेन ज्ञायते संशयस्य न्यायविद्यायामुपयोगित्वं विद्यत एव।

**चतुर्थकल्पे च "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम-व्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति"**[11] सूत्रे संशये प्रत्यक्षलक्षणस्याति-व्याप्तिवारणाय व्यवसायात्मकमिति पदं सूत्रकारैः उपात्तम्। संशयस्य अनिन्द्रियार्थसन्निकर्षपूर्वकत्त्वात् मानसप्रत्ययात्मकत्वाच्च इन्द्रियार्थसन्निकर्ष-पदोपादानेनैव संशयव्युदाससंभवात् व्यवसायात्मकं पदं व्यर्थम्। तत्र व्यवसायात्मकपदस्य सार्थक्यज्ञापनाय वार्तिककारः भणति "**संशयस्योभय-निमित्तत्त्वात्, उभयन्तु संशयस्य निमित्तमात्मान्तःकरणसंयोग इन्द्रियार्थसन्निकर्षश्चेति। तत्र यदिन्द्रियार्थसन्निकर्षानवधारणपूर्वकं मनसानवधारणं तदिह सम्बध्यते। तस्य हीन्द्रियार्थसन्निकर्षः कारणम्। पूर्वं तु न सम्बध्यते, यदाऽऽत्मान्तःकरणसंयोगाद्भवति**"[12] इति पुनश्च अज्ञातपदार्थे निश्चितपदार्थे च न्यायस्य प्रवृत्त्यभावात् संदिग्धपदार्थे प्रवृत्तिदर्शनात्[13] प्रतिज्ञादिपञ्चावयवसमुदायस्य न्यायात्मकत्वात् परार्थानुमितौ अवयवसमुदायस्य प्रयोजकत्वाच्च परार्थं च मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाध-नरूपत्त्वाच्च संशयस्य पृथग्निर्वचनमवश्यं कर्तव्यम्। टीकाकारैरपि भाषितं

यद् "**यदि न्यायस्याङ्गं संशयो भवेत् सोऽपि व्युत्पाद्यते**"[14] इति।

**पञ्चमकल्पे** तु इत्थं वक्तुं शक्यते यत् सिद्धिसत्त्वदशायां साध्यसंशयस्य पक्षतात्त्वात्, योग्यतायाः संशये शब्दबोधस्य दर्शनादनुमितेश्चा-दर्शनात्, प्रामाण्यसंशयस्य प्रवृत्तिप्रतिबन्धकत्त्वात्, व्याप्तिसंशयस्य अनुमिति-प्रतिबन्धकत्त्वात् प्रतिबन्धकाभावस्य निश्चयस्य कारणत्वाच्च कोटिद्वयोपस्थितेः साध्यसंशयजनकत्वाच्च संशयस्य न्यायशास्त्रे महत्त्वपूर्णं स्थानं विद्यत इति निश्चप्रचं वक्तुं शक्यते, अतः संशयस्य पृथग् निर्वचनं युक्तमिति मे भाति।

न्यायाभिमतषोडशपदार्थेषु संशयास्तावत् तृतीयपदार्थः। तस्य पदार्थस्य किं सामान्यलक्षणमिति जिज्ञासायां तत्तदाचार्यैः स्व-स्वमत्या शास्त्रसम्मतं लक्षणमुपपादितम्। तथाहि–तर्कसंग्रहे यथा–"**एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वा**"[15] इति। तर्कभाषायां–"**एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः**"[16] इति। तर्कामृते–"**समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटि-द्वयस्मरणैरयं स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते स एव संशय इति**"[17] न्यायसिद्धान्तमुक्तावल्यां तु "एकधर्मिकविरुद्धभावाभावप्रकारकज्ञानं संशयः"[18]। न्यायसारे–"**तत्रानवधारणज्ञानं संशयः**"[19] तार्किकरक्षायाम्–

**संशयः कथितो ज्ञानमवधारणवर्जितम्।**
**अनवधानात्मकः प्रत्ययः संशय इति**[20]॥

तत्तद्ग्रन्थे एतादृशसंशयलक्षणस्य विवेचनसत्त्वेऽपि किं सूत्रकारैः किमपि नाभिहितमिति नैवाशङ्कनीयम्। यतः प्रमेयपदार्थस्वरूपनिर्वचनानन्तरं संशयपदार्थस्वरूपोल्लेखात्। तथा सूत्रम्–"**समानानेकधर्मोपपत्तेर्विप्रतिपत्ते-रुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः**"[21] इति सूत्रे विमर्शपदस्यार्थो भवति विरुद्धपदार्थविषयकं ज्ञानमर्थाद् एकस्मिन् पदार्थे नानाविरुद्धपदार्थविषयकं ज्ञानं संशय इति। टीकाकारैस्तु "**अत्र च विमर्शः संशय इति संशयसामान्यलक्षणम्। तत्र संशय इति लक्ष्यनिर्देशः, विमर्श इति लक्षणपदम्, एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः किं स्विदिति ज्ञानम्**"[22] भाष्यकारादयस्तु प्राचीनाः विमर्शो नाम अनवधारणज्ञानमिति वदन्ति। तत्र अनवधारणघटकीभूतावधारणपदस्यार्थो यदि निश्चय इति अभ्युपेयते तर्हि निश्चयाभावस्य संशयत्वापत्तिः, यतः

यत्पदार्थविषयकज्ञानस्योत्पत्तिरेव नास्ति तत्रापि निश्चयाभावस्य सत्त्वात्। अत: उच्यते पूर्वं यस्य सामान्यज्ञानं विद्यते तस्य संशयो भवति। एवञ्च पूर्वज्ञातस्य पदार्थस्य यो हि विशेषधर्म: तस्य अनवधारणात् संशयस्योत्पत्ति:। अत: अनवधारणं ज्ञानं संशय इति। तत्रेदमवधातव्यं यद् विशेषधर्मस्य निश्चयात्मकं ज्ञानं संशयस्य प्रतिबन्धकम्। अर्थाद् विशेषधर्मनिश्चये सति न संशयस्योत्पत्ति:। एतादृशार्थलाभाय सूत्रकारै: "विशेषापेक्ष:" इति शब्दस्य प्रयोग: कृत:। तत्रेदमपि ज्ञातव्यं यद् विशेषधर्मस्योपलब्धि: संशयमात्रस्य प्रतिबन्धक:, विशेषधर्मस्योपस्थिति: संशयकारणम्। अत एव वार्तिककारैरुक्तं– **"सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय"**[23] इति। एतेन प्रसिद्ध्यति यदेकधर्मिकनानाविरुद्धधर्मप्रकारकज्ञानं संशय इति। एकस्मिन् धर्मिणि नानाविरुद्धधर्मावगाहिज्ञानं समूहालम्बनज्ञानं यद्यपि भवति तथापि समूहालम्बनज्ञाने विशेषणभेदाद् धर्मिगतविशेष्यताया: भेददर्शनात् समूहालम्बनज्ञानं न संशय:। संशये च तादृशभेदाभावाद् विभिन्नप्रकारतानिरूपि-तैकविशेष्यताया: स्वीकारात् संशय: समूहालम्बनज्ञानाद्भिन्नो भवति। यत: **"अयं स्थाणु: पुरुषो वा"** इत्यत्र इदन्त्वावच्छिन्न: मुख्यविशेष्य:, तस्मिन् विशेष्ये विशेष्यतारूपा विषयता एकैव, तत्र स्थाणुत्वपुरुषत्वोभयधर्म: विशेषणात्मकविषय:। अर्थात् तत्र प्रकारतात्मकविषयताद्वयस्य सत्त्वाद् एकविशेष्यतानिरूपितनानाविरुद्धधर्मप्रकारताशालिज्ञानं संशय इति। अत्रापि कश्चित् मतभेदो दृश्यते, केचन इत्थं प्रवदन्ति– संशयज्ञाने कोटिद्वयस्य विरोधोऽपि विषयो भवति। **नव्यास्तु**– संशयविषयीभूतकोटिद्वयस्य विषयता-विशेष एव कोटिता। संशये कोटिताया: अवगाहनात् समूहालम्बने च तस्या: अवगाहनात् संशय: समूहालम्बनज्ञानद्भिन्न एव।

तत्र **केचन नव्या:** इत्थं निगदन्ति– भावाभावपदार्थं संशयकोटि-रूपेणाभ्युपगत्य केवलं भावकोटिकसंशयस्योत्पत्तिर्भवतीति वक्तुं नैव शक्यते। अपि तु **'अयं स्थाणुर्वा, अयं पुरुषो न वा'** इत्याकारकसंशयस्योत्पत्ति:। अर्थात् स्थाणुत्व-स्थाणुत्वाभाव: पुरुषत्व-पुरुषत्वाभावश्च संशयस्य कोटि: भवति। विश्वनाथै: **'नरो वा स्थाणुर्वा'** इत्याकारकं ज्ञानं संशय इति निगदितम्। **"नरो वा स्थणुर्वा"** इत्यत्र वा पदेन अभावस्य बोधस्वीकारे **"पर्वतो वह्निमान् न वा"** इत्यादिवाक्ये **'नञ्'**पदस्य व्यर्थत्वापत्ति: स्यात्। वस्तुत: यत्कोटिद्वयविषये संशयोत्पत्तिस्तद्विषये पूर्वसंस्कारजन्यस्मरणस्य

संशयमात्रं प्रतिकारणत्वमभ्युपेयम्। अर्थात् यदि बाधकप्रमाणाभाव: विद्यते तर्हि स्थाणुत्व-पुरुषत्वोभयभावकोटिकस्मरणसद्भावे भावकोटिकसंशयस्योत्पत्ति: भवत्येव नान्यथा। भाष्यकारैस्तु बहुभावपदार्थकोटिकसंशयस्य प्रदर्शनं कृतम्। भाष्यकाराभिमत: बहुभावपदार्थकोटिकसंशय: कालिदासेनाऽपि शाकुन्तले प्रदर्शित:। तथाहि–**"स्वप्नो नु माया नु मतिभ्रमो नु, क्लिष्टं नु तावत्फलमेव पुण्यम्"**[24] एवञ्च विक्रमादित्यसभायां कालिदासेनोक्तमिति प्रवाद: श्रूयते यथा–

**किमिन्दु: किं पद्मं किमु मुकुरबिम्बं किमु मुखम्।**
**किमब्जे किं मीनौ किमु मदनवाणौ किमु दृशौ।**
**नगौ वा गुच्छौ वा कनककलसौ वा किमु कुचौ**
**तडिद्वा तारा वा कनकलतिका वा किमबला।। इति।**

**विशेषापेक्षो विमर्श: संशय:**, स च पञ्चविध: इतिभाष्यकारै: प्रदर्शित:। तत्र–

**समानधर्मोत्पत्ते: विशेषापेक्षो विमर्श: संशय:**– स्थाणुर्वा पुरुषो वेति प्रथम:। अत्र समानश्चासौ धर्म: समानधर्म: इति कर्मधारयसमासं स्वीकृत्य तुल्यधर्म: साधारणधर्मो वा अर्थ: भाष्यकारैरङ्गीकृत:। वार्तिककारैस्तु समानोधर्मो यस्य इति बहुब्रीहिसमासमादृत्य समानधर्मविशिष्टधर्म्युपपत्ति-जन्यसंशय इत्यर्थ: प्रतिपादित:। वस्तुत: साधारणधर्मवद्धर्मिज्ञानजन्यसंशय इति प्रथम:।

**अनेकधर्मोत्पत्तेर्विशेषापेक्षो विमर्श: संशय** इति द्वितीय:। अस्य व्याख्यानावसरे भाष्यकारै: अनेकस्य धर्म: अनेकधर्म: इति विग्रहमाश्रित्य सजातीयविजातीयव्यावर्त्तकधर्म: अनेकधर्म: इति अर्थोऽभ्युपगत:। टीकाकारैश्च लक्षणावृत्तिमभ्युपगत्य सजातीयविजातीयपदार्थव्यावर्तकार्थ: अनेकशब्दस्य इति समाश्रित:। विग्रहवैचित्र्येऽपि उभयमते सजातीयविजातीयव्यावर्त्तकधर्म: एव अनेकधर्म:। अर्थाद् असाधारणधर्मवद्धर्मिज्ञानजन्य: संशय इति। यथा– **"गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजन्यत्वं विशेष:, तस्मिन् द्रव्यं गुण: कर्म वेति सन्देह:।"**[25]

**विप्रतिपत्तेर्विशेषापेक्षो विमर्शः संशय** इति तृतीयः। अत्र विप्रतिपत्ति-शब्दस्य कोऽर्थः? इति जिज्ञासायां भाष्यकारैरुच्यते **"व्याहतमेकार्थदर्शनं विप्रतिपत्तिः"**[26] अर्थाद् एकस्मिन् पदार्थे विरुद्धदर्शनम्, एकपदार्थे नानाविरुद्ध-धर्मस्य निश्चयो वा विप्रतिपत्तिः। **"विरुद्धा प्रतिपत्तिः"** इति विप्रतिपत्तिपदस्य व्युत्पत्तिः यदि स्वीक्रियते तर्हि तस्यार्थो भवति विरुद्धनिश्चयः, अर्थाद् एकस्मिन् पदार्थे वादिनां विरुद्धनानापदार्थनिश्चयः विप्रतिपत्तिः। यथा एकः वदति नित्योऽऽत्माऽस्ति, अपरः प्राह- नित्योऽऽत्मा नास्ति इति। अत्र अस्तित्वनास्तित्वयोः परस्परविरुद्धत्वाद् एकस्मिन् धर्मिणि धर्मद्वयं स्थातुं नार्हति। एवञ्च आत्मनो विशेषधर्मविषये वादिनां बहुविवादो दृश्यते। अत एव शारीरकभाष्ये प्रथमसूत्रस्य व्याख्यानावसरे शङ्कराचार्यैरुक्तं **"तद्विशेषं प्रति विप्रतिपत्तेः"** इति। किन्तु वादिप्रतिवादिनोः आत्मगततादृशविरुद्धार्थ-निश्चयात्मिका विप्रतिपत्तिः साध्यसंशये न कारणमपि च वादिप्रतिवादिनोः तादृशनिश्चयात्मकविप्रतिपत्तिप्रयुक्तवाक्यस्य संशयकारणत्वाद् विप्रतिपत्तिशब्देन एतादृशार्थः स्वीकार्यः इति टीकाकारस्य आशयः। भाष्यकारैरपि अयमेवार्थः **"यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नाऽसंशयो नाऽत्यन्तसंशयो वा"**[27] इति सूत्रभाष्ये स्पष्टीकृतः, तथाहि **"समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः"**[28] इति। अर्थाद् वादिप्रतिवादिनोः विरुद्धार्थ-वाक्यद्वयमेव विप्रतिपत्तिपदस्यार्थः।

एवञ्च **"व्याहतमेकार्थदर्शनं विप्रतिपत्ति"**रिति भाष्यकारैः यद्भदाषितं तत्र दर्शनशब्दस्य कोऽर्थः? इति जिज्ञासायामुच्यते– दर्शनं नाम वाक्यम्। दृश्यते ज्ञायतेऽनेन इति व्युत्पत्त्या वाक्यात्मकशास्त्रविशेषार्थे दर्शनशब्दस्य प्रयोगदर्शनात्। यथा–

**एतदाहुर्महाप्राज्ञाः सांख्यं वै मोक्षदर्शनम्।**
**शास्त्रं सांख्योक्तं योगदर्शनमेव तत्॥"**[29]

भाष्यकारेणापि **"प्रतिपक्षहीनमपि वा प्रयोजनार्थमार्थित्वे**[30]**"** इति सूत्रभाष्ये उक्तं **"अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि"**[31] इति। अत्रापि दर्शनशब्दस्य शास्त्रार्थे प्रयोगः विहितः। प्रशस्तपादाचार्यैरपि स्वभाष्ये तथैवार्थः अभ्युपगतः। उक्तं च **"त्रयीदर्शनविपरीतेषु शाक्यादि-दर्शनेषु"**[32] इति। तत्र परवर्तिनः नैयायिकाः इत्थं प्रवदन्ति–तादृशविरुद्धार्थ-

बोधकैकवाक्यं विप्रतिपत्तिः। **'शब्दो नित्यो न वा'** इत्यत्र एतादृशवाक्य-श्रवणजन्यः शब्दो नित्योऽनित्यो वा इत्याकारक शाब्दबोधः नैव संभवति। यतः शब्दे नित्यत्वानित्यत्वरूपविरुद्धधर्मयोः अविद्यमानत्वात् योग्यतायाश्च असंभवात् न शाब्दबोधः, परन्तु तत्र कोटिद्वयस्मरणवशात् मनसा एव तादृशसंशयोत्पत्तिः। उक्तञ्च विश्वनाथेन **"यद्यपि शब्दस्य न संशायकत्वं तथापि शब्दात् कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति।"**[33] विश्वनाथनये यद्यपि विप्रतिपत्तिवाक्यश्रवणादिजन्यशाब्दसंशयो नैव संभवति अपि च साधारणासाधारणोभयजन्यकोटिद्वयविषयकमानसः संशयः सम्भवति, तथापि तत्र विप्रतिपत्तिवाक्यस्य कोटिद्वयस्मारकत्वेन प्रयोजकत्वं स्वीकार्यम्। यतः सूत्रकारैः पञ्चम्यन्तवाक्यस्य **'विप्रतिपत्ते'**रित्यस्य प्रयुक्तत्वात्। रघुनाथ-शिरोमणिनाऽपि ज्ञायमानविप्रतिपत्तिवाक्यजन्यशाब्दसंशयोऽभ्युपगतः। तथाहि– **"पदजन्यधर्मिकोटिद्वयतदुभयविरोधिज्ञानसंशयात्मकयोग्यताज्ञान-सहितात् शाब्दादिहैव संशयः। 'समानानेके'त्यादि सूत्रं प्रणयतो महर्षेरपि सम्मतमिदम्"**[34] शंकरमिश्रैरपि विप्रतिपत्तिशब्दस्यार्थः विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयमित्यङ्गीकृतः। उक्तञ्च **"विप्रतिपत्तिरपि विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयम्"**[35] इति।

चतुर्थस्तावद् उपलब्ध्यव्यवस्थातः संशयो भवति। यथा किं विद्यमानं सत् जलमुपलभ्यते उत अविद्यमानम्। तथाहि– **"उपलब्ध्यव्यवस्थातः खल्वपि सच्चोदकमुपलभ्यते...."।** अनुपलब्ध्यव्यवस्थातो भवति संशयः। यथा किं विद्यमानः पिशाचो नोपलभ्यते किं वाविद्यमान इति। अत्रापि भाष्यकारैरुच्यते **'अनुपलब्ध्यव्यवस्थातः खल्वपीत्यादि।'** भाष्यकारैः **"खल्वपि"** शब्दस्य प्रयोगः कृतः, तस्य कोऽर्थः इति जिज्ञासायामुच्यते प्रकाशटीकाकारैः **"आयोजनात् खल्वपि"**[36] इत्यस्य व्याख्याने– **"खल्वपीति निपातसमुदायः उदाह्रियते इत्यर्थे वर्तते, न समुच्चयार्थः"** इति।

तत्रेदं चिन्तनीयं यद्–भाष्यकारैः संशयस्य योहि पञ्चप्रकारः प्रदर्शितः वार्तिककारैस्तु तथा नाभ्युपगतः। यतः **'उपलब्ध्यव्यवस्था'** इत्युक्तेरभिप्रायस्तु एकतरपक्षस्य साधकप्रमाणाभाव **"अनुपलब्ध्यव्यवस्था"** इत्युक्तेश्चार्थः बाधकप्रमाणाभावः। एतदुभयस्य संशयमात्रे कारणत्वात् कस्यापि विशेषसंशयस्य

अनयो: पृथक्कारणत्वं नास्तीति। अत: साधारणादित्रिविधकारणजन्य: त्रिविध-संशय: स्वीकार्य:। वार्तिककारपक्ष: प्रायो नव्यै: स्वीकृत:। शिष्यबुद्धिवैशद्यार्थं सूत्रकारै: भाष्यकारैश्च संशयस्य पञ्चविधत्वं प्रतिपादितम्। सूत्रे प्रतिपादित-**'च'** शब्देन व्याप्यसंशयाद् व्यापकसंशयस्य ग्रहणं भवतीति गौतमस्याशय इति न्यायसम्प्रदाया: वदन्ति। अनुमानचिन्तामणिग्रन्थस्योपाधिप्रकरणे रघुनाथशिरोमणिना एतादृशाभिप्रायोऽभ्युपगत इति संशयस्य त्रिविधिकारणजन्यत्वं स्वीकार्यम्। प्रामाण्यवादस्य गादाधर्यां भट्टाचार्यै: संशयपदार्थस्य निष्कृष्टं लक्षणं प्रतिपादितं यत् **"स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानं संशयपदार्थ:"**[37] इति। एतेन ज्ञायते संशयं प्रति उभयसाधारण-धर्मज्ञानम्, असाधारणधर्मज्ञानम्, विप्रतिपत्तिवाक्यजन्य-कोटिद्वयज्ञानञ्च कारणम्। विषयसंशयं प्रति प्रामाण्यसंशयो भ्रमत्वसंशयश्च कारणम्। व्यापकसंशयं प्रति च व्याप्यसंशय: कारणं भवतीत्यलम्। इति दिक्।

## सन्दर्भग्रन्थसूची-


1. न्यायसूत्रम्, 1-1-1
2. प्रा. वा. प्रकरणम्, पृ. 7
3. न्यायभाष्यम्, पृ.5
4. न्यायभाष्यम्, पृ.17
5. विचार: विपरीतोद्भावकपरजिगीषया न्यायप्रयोगो विचार:, अवयव-गादाधरी, भावदीपिकाटीका।
6. न्यायवार्तिकम्, पृ.181
7. न्यायवार्त्तिकम्, पृ. 182
8. ब्र. सू. 1.1.1
9. ब्र. सू. 1.1.1 भामतीव्याख्या।
10. ब्र. सू. 1.1.1 भामतीव्याख्या।
11. न्यायसूत्रम्, 1.1.3
12. न्यायवार्त्तिकम्, पृ. 37
13. नानुपलब्धे न निर्णीतेऽर्थे न्याय: प्रवर्तते किं तर्हि संशयितेऽर्थे। न्यायभाष्यम्, पृ.6
14. न्यायवार्त्तिकतात्पर्यटीका, पृ.39

15. तर्कसंग्रहः, पृ.157
16. तर्कभाषा, पृ.570
17. तर्कामृतम्।
18. न्यायसिद्धान्तमुक्तावली, संशयप्रकरणम्, गुणखण्डः।
19. न्यायसारः, पृ.6
20. ता.रक्षा. का.55
21. न्यायसूत्रम्, 1.1.23
22. न्यायवार्त्तिकतात्पर्यटीका, पृ.475
23. न्यायवार्तिकम्, पृ. 99
24. अभि. शाकु., 6-10
25. न्यायभाष्यम्, संशयप्रकरणम्।
26. न्यायभाष्यम् संशयप्रकरणम्
27. न्यायसूत्रम्, 2.1.6
28. न्यायभाष्यम्, पृ.96
29. महा., शान्तिपर्व।
30. न्यायसूत्रम्, 4-2-49
31. न्यायभाष्यम्, पृ.416
32. प्रशस्तपादभाष्यम्, पृ.177
33. न्यायसिद्धान्तमुक्तावलीसंशयप्रकरणम्।
34. पदार्थतत्त्वनिरूपणम् संशयप्रकरणम्।
35. वैशेषिकसूत्रम्, 2.2.17, उपस्कारव्याख्या।
36. न्यायकुसुमाञ्जलिः, पञ्चमस्तबकः।
37. प्रामाण्यवादः, पृ.21

# न्यायदर्शने संशयस्वरूपपरीक्षणम्

**डॉ. महानन्दझा**

अप्रमाज्ञानस्य त्रयो भेदाः सन्ति। संशयः, विपर्ययः, तर्कश्च। एतल्लक्षणं हि–

**स संशयो मतिर्यास्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्**[1]**॥**

तथा च एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः। उभयसाधारणधर्मज्ञानम्, असाधारणधर्मज्ञानं, विप्रतिपत्तिवाक्यजन्यकोटिद्वयज्ञानं संशयस्य कारणं भवति। एकवृत्तिभावाभावविषयकज्ञानत्वस्य वृक्षे कपिसंयोगतदभावज्ञानेऽतिव्याप्तिस्तद्वारणाय एकधर्मिकविरुद्धेति पदम्। वृक्षे कपिसंयोगतदभावयोरविरुद्धत्वात् तद्वारणम्। भूतलं घटवद् पृथिवीघटाभाव-वतीत्यत्र ज्ञानेऽतिव्याप्तिवारणाय एकधर्मितावच्छेदकविशिष्टविशेष्य-कत्वावच्छिन्नेति उक्तम्। भूतलं घट–तदभाववत् इति ज्ञानवारणाय विरुद्ध भावाभावेति पदम्। भूतलं भूतल–तदभावाभावमिति ज्ञानवारणाय प्रकारकमिति। इच्छादिवारणाय ज्ञानमिति पदम्।

ननु भूतलं संयोगेन घटवत् समवायेन घटाभाववच्च इतिज्ञानेऽतिव्याप्तिः इति चेन्न तत्सम्बन्धावच्छिन्नतन्निष्ठप्रकारता-निरूपितविशेष्यतावच्छेदकताकविशेष्यतानिरूपित तत्संबन्धावच्छिन्नप्रतियोगिता-कतद्विरुद्धं तदभावनिष्ठप्रकारताकज्ञानत्वमिति विवक्षणात्। वस्तुतस्तु स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधि-करण्योभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानत्वं संशयत्वम्।

अन्ये तु तद्विरोधविशिष्टदैशिकविशेषणतासंसर्गावच्छिन्न-प्रकारतानिरूपकत्वं तत्संशयत्वम्। अपरे तु तन्निष्ठप्रकारतानिरूपिता या प्रतियोगितासम्बन्धावच्छिन्नतन्निष्ठप्रकारतानिरूपिताऽभावत्वावच्छिन्न-प्रकारतानिरूपिता च विशेष्यता तन्निरूपकत्वं तत्संशयत्वमिति वदन्ति।

कोटिद्वयसहचरितत्वेन गृह्यमाणो यो धर्मः ऊर्ध्वत्वादिस्तत्प्रकारक-निश्चयः संशयकारणम्। तेन घटत्वतदभावसहचरित पटत्ववानयमिति भ्रमात् "अयं घटो न वा" इति संशयोत्पत्तिः। उच्चैस्तरत्वम्–स्थाण्वस्थाणुसाधारण-धर्ममुच्चैस्तरत्वं संशयधर्मिणि ज्ञात्वा " अयं स्थणुत्ववान् तदभाववान्वा" इति संदिग्धे स्थाण्वस्थाणुसहचरितत्वेन वर्तमानग्रहविषयधर्मप्रकारक-पुरोवर्तिविशेष्यकज्ञानात् पुरोवर्तिविशेष्यकस्थाणुत्वतदभावकोटिसंशयो भवति।

अत्र साधारणधर्मवद्धर्मिज्ञानजन्यकोटिद्वयस्मरणस्यैव संशयजनकत्वं धर्मिज्ञानं तु प्रयोजकत्वमात्रम् इति प्राचीनानामाशयः। नवीनास्तु— कोटिद्वयस्मरणक्षणे एव संशयोत्पत्तिसंभवात् क्षणविलम्बकल्पनायां मानाभावात् साधारणधर्मवद्धर्मिज्ञानजन्य कोटिद्वयस्मरणत्वेन कारणत्वे गौरवात् तत्तद्व्यक्तित्वेन हेतुत्वे व्यभिचारात् साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वं युक्तमिति।

अत्र "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः[2]" इति गौतमसूत्रे "विरुद्धकोटिद्वय-वाक्यात्मकविप्रतिपत्तेः" शब्दो नित्यो न वा इत्याकारिकायाः अर्थद्वयस्मृतिद्वारा संशयजनकत्वमुक्तं तत्खण्डयति–"विप्रतिपत्तिस्तु शब्दो नित्यो न वा इत्यादि शब्दात्मिका न संशयकारणं भवति[3]" तथा च संशयात्मक-शाब्दबोधोऽपि नाङ्गीकर्त्तव्यः। शब्दज्ञानस्य व्याप्तिज्ञानस्य अतिदेशवाक्यार्थज्ञानस्य च प्रत्यक्षान्यनिश्चयमात्रजनकत्वात्मक असाधारणधर्मवत्त्वात्। तथा च विप्रतिपत्त्यादि शब्दज्ञानं न संशयजनकं प्रत्यक्षान्यनिश्चयकारणत्वात् व्याप्तिज्ञानादिवद् इत्यनुमानेन विप्रतिपत्तेः संशयाजनकत्वसिद्धिः।

ननु विप्रतिपत्तेः संशयाजनकत्वे उक्तसूत्रस्याप्रामाण्यापत्तेः, किं समाधानमित्यत्रोच्यते। "तत्र शब्देन कोटिद्वयज्ञानं जन्यते[4]" तथा च कोटिद्वयव्याप्यवत्ताज्ञानकाले भावाभावरूपकोटिद्वय शाब्दसामग्रीसत्वे एकैकशाब्दं प्रति अपरशब्दसामग्र्याः प्रतिबन्धकत्वात् शाब्दसामान्यानुपपत्तिरेव तदा अनुभूयमानसंशयोत्पत्तिः कथमिति चेत् "संशयस्तु मानस एव" इत्याह।

वैशेषिकाचार्यास्तावत् विद्याविद्याभेदेन बुद्धेः भेदद्वयं मन्यन्ते[5]। अविद्यायाश्चत्वारो भेदाः। (1) संशयः (2) विपर्ययः (3) अनध्यवसायः (4) स्वप्नश्च।

संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभय-विशेषानुस्मरणादधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशयः[6]।।

अयम्भावः प्रसिद्धाः पूर्वं प्रतीताः अनेकविशेषाः असाधारणधर्मा वक्रकोटरादयः शिरः पाण्यादयश्च ययोः स स्थाणुपुरुषयोस्तयोः सादृश्यमात्रस्य साधारणधर्ममात्रस्य क्वचिदेकत्रधर्मिणि दर्शनाद् उभयोः स्थाणुपुरुषयोर्विशेषाणां वक्रकोटरादीनां शिरः पाण्यादीनाञ्च पूर्वं प्रतीतानां स्मरणादधर्माच्च किञ्स्विदिति उभयावलम्बी विमर्शः संशयः। किं स्थाणुः? किं वा पुरुषः? इति अनवस्थितोभयरूपेण उभयविशेषसंस्पर्शी विमर्शः विरुद्धावमर्शो ज्ञानविशेषः संशयः।

मात्रग्रहणसामर्थ्यात् विशेषाणामनुपलम्भः गम्यते। दर्शनशब्दः उपलब्धिवचनो न प्रत्यक्षप्रतीतिवचनोऽनुमेयस्यापि सामान्यस्य हेतुत्वात्। सादृश्योपलम्भाभिधानाहर्म्युपलम्भोऽपि लभ्यते। अस्यानुपलम्भेः तद्धर्मस्य सादृश्यस्योपलम्भाभावात् संशयोऽपि धर्मिण्येव, न सादृश्ये, तस्य निश्चितत्वात्। सादृश्यमिति च साधारणधर्ममात्रं कथ्यते, नानेकार्थसमवेतं सादृश्यम्, अस्पर्शवत्त्वस्य स्पर्शाभावस्याकाशान्तःकरणगतस्य प्रतीत्यात्मन्यणुत्व-महत्वसंशयदर्शनात्।

यदा अयं प्रतिपत्तावुभयसाधारणं धर्म क्वचिदेकत्र धर्मिणि उपलभ्यते, कुतश्चिन्निमित्तात् तस्य धर्मिणो विशेषं नोपलभ्यते, पूर्वं प्रतीतयोः स्मरति विरुद्धविशेषयोः, न च उभयोरेकत्र सम्भवति सद्भावं, विरुद्धत्वात्। नाप्यभावं तदविनाभूतस्य साधारणधर्मस्य दर्शनात्। तदा अस्य साधारणधर्म-विषयत्वेनावधारिते धर्मिणि विशेषविषयत्वेन अनवधारणात्मकः प्रत्ययः संशयो भवति।

संशयः अविद्या एव[7]। अविद्या पुरुषं नश्यति। अतएवोक्तं संशयः अधर्मादुत्पद्यते। सामान्यं दृष्ट्वा यदेकं विशेषमनुसृत्य विशेषमनुस्मरति तदा सामान्यदर्शनस्य विनष्टत्वात् संशयहेतुत्वानुपपत्तिरिति चेन्न, उभयविशेषविषयाभ्यां संस्काराभ्यां युगपत्प्रबुद्धाभ्यामुभयविशेषविषयै-कस्मरणजननात्, तत्काले च विनश्यदवस्थस्य सामान्यज्ञानस्य सत्त्वात्।

स च संशयः द्विविधः। अन्तर्बहिश्च[8]। अन्तस्तावद् आदेशिकस्य

सम्यङ्मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति "किन्नु सम्यङ्मिथ्या वा" इति।

आदेशिकोज्योतिर्विद्पदवाच्यः। तेन ज्योतिर्विदा एकदा कस्यचित् पुरुषं तद्ग्रहसंचारादिनिमित्तमुपलभ्य आदिष्टं किञ्चिदनिष्टं किञ्चिदिष्टं वा अत्र अभूत्, वर्तते भविष्यति च तत् तथैव तदा संवृत्तम्। पुनश्च तादृश एव निमित्तानि उपस्थितानि। तानि दृष्ट्वा तदादेशिकस्य ज्योतिर्विदः पुरुषस्य स्वज्ञाने संशयो जायते यत् एतन्मम नैमित्तिकं ज्ञानमभूत् तत्किं सत्यमसत्यं वा[9]?।

बहिः संशयो द्विविधः–(1) प्रत्यक्षात्मकः (2) अप्रत्यक्षात्मकश्च[10]। यत्र साधारणलिङ्गदर्शनादुभयविशेषानुस्मरणाद् अधर्माच्च संशयो भवति तदप्रत्यक्षात्मकः। यथा–अरण्ये विषाणमात्रदर्शनाद् अयं गौर्गवयो वा इति संशयः।

प्रत्यक्षात्मकश्च संशयः यथा–स्थाणुपुरुषयोः सम्बन्धिनी योर्ध्वता तन्मात्रस्य प्रत्यक्षविषये पुरोवर्तिनि धर्मिणि दर्शनात् भवति। वक्रकोटरादेः स्थाणुधर्मस्य शिरः पाण्यादेर्विशेषस्य पुरुषधर्मस्यानुपलब्धितः। स्थाणुत्वादिसामान्य-विशेषानभिव्यक्तावित्यादिपदेन पुरुषत्वाद्यवरोधः। वक्रकोटरादयः स्थाणुत्वाभिव्यक्तिहेतवः, शिरः पाण्यादयः पुरुषत्वाभिव्यक्ति हेतवः, तेषामनुपलम्भात्। स्थाणुत्वपुरुषत्वयोरनभिव्यक्तौ सत्यामुभयोः स्थाणुपुरुषयोः प्रत्येकमुपलब्धानां विशेषाणामनुस्मरणादुभयत्राकृष्यमाणस्य उभयत्र स्थाणौ पुरुषे वा आकृष्यमाणस्य प्रतिपत्तुः ऊर्ध्वतादर्शनात् स्थाणुरयमिति निश्चेतुमिच्छति तदा पुरुषविशेषानुस्मरणेन पुरुषे समाकृष्यत इत्युभयत्राकृष्यमाणः अत एवास्य प्रत्ययो दोलायते, नैकत्र नियमेन अवतिष्ठते–"किन्तु खल्वयं स्थाणुः स्यात् पुरुषो वेति"[11]।

वैशेषिकदर्शनकारः कणादः संशयस्वरूपमित्थं निगदति। तथा च सूत्रम् "सामान्य- प्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः[12]" सामान्यवतो धर्मिणः प्रत्यक्षात् विशेषस्य परस्परव्यावर्तकस्य धर्मस्य वक्रकोटरादेः शिरः पाण्यादेश्चाप्रत्यक्षादग्रहणात्। विशेषस्मृतेः विशेषस्य कोटिद्वयस्य

स्थाणुत्वपुरुषत्वलक्षणस्य स्मरणात्।

अत्र स्मरणमपि ग्रहणपरम्[13]। क्वचिदनुभूयमानधर्मयोरपि कोटित्वात्, चकाराद् अदृष्टादे: संशयकारणस्य संग्रहात्।

ननु सामान्यधर्म एव तत्तदभावसमानाधिकरण इति तत्तद्धर्मिणो एकतरानिश्चायकत्वात् संशयहेतुत्वं युक्तम्—असाधारणस्य तु तत्तदभावव्यावृत्तरूपस्य साधारणत्वाभावात् कथं संशयजनकता इत्याशंक्य प्राचीनमताभिप्रायेण निराकरोति[14]—"असाधारणो धर्मोऽनध्यवसायात्मकज्ञानजनक इति नोक्त:[15]। तत्र समाधत्ते—असाधारणधर्मोऽपि एकसम्बन्धिज्ञानमपरं स्मारयति इति नियमेन व्यावृत्तत्वसम्बन्धज्ञानद्वारा तत्तदभावरूपकोटिद्वयं स्मारयन् कोटिद्वयज्ञानसम्पादनद्वारा संशये प्रयोजकमिति एतन्मते संशयातिरिक्त अनध्यवसायात्मकज्ञानस्यासत्त्वेऽपि न क्षति:[16]। विप्रतिपत्तिरपि विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयं शब्दो नित्य इत्यपरं तदुभयं, तदुभयजन्यञ्च ज्ञानद्वयमयुगपद् भावित्वात्। सम्भूय न संशायकमतस्तत्र शब्दत्वादिरसाधारण: सत्त्वप्रमेयत्वादि साधारणो वा धर्म: संशय: इति पृथङ्नोक्ता:[17]।

समानतन्त्रे गौतमीये अनध्यवसायज्ञानस्यानभ्युपगमाद् असाधारणो धर्म: संशयकरणत्वेन उक्त:। विप्रतिपत्तेर्विरुद्धवाक्यद्वयस्य अन्वयव्यतिरेक-शालितया संशयकारणत्वमुक्तम्। न्यायभाष्ये च उपलभ्यमानत्वं यत् संशयकारणत्वमुक्तं सदप्युपलभ्यते असदप्युपलभ्यते इति उपलभ्यमानमिदं सदसद्वेति, यच्चानुपलभ्यमानत्वं सदपि नोपलभ्यते मूलकीलकोदकादि, असदपि नोपलभ्यते गगनारविन्दादि: तथा च पञ्चविध: संशय[18] इति।

न्यायवार्तिकेऽपि यत्कारणभेदेन संशयस्य त्रित्वमुक्तं तदपि न सम्भवति, व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैबासम्भवात्[19]। न हि तृणारणिमणिजन्यवह्नौ वैजात्यवदत्रापि वैजात्यं कल्पनीयम्- संशयत्वावच्छिन्न-कार्यं प्रति समानधर्मत्वेनैव कारणताया: कल्पनात्। यच्च प्रधानविधिकोटित्व-प्रधाननिषेधकोटित्वादिवैजात्यमुक्तम्, तदनुगतत्वान्नावच्छेदकम्[20]। तथा च संशयो न त्रिविध: न वा पञ्चविध: किन्त्वेकविध[21] एव। प्रकारान्तरेण संशयस्य द्वैविध्यं सूत्रकृता कणादेन स्वयमेव स्पष्टयति।

ननु जिज्ञासा जनकज्ञानं संशय इति न लक्षणम्, अनध्यवसायेऽपि गतत्वात्। संस्काराजनकज्ञानं संशय इत्यपि निर्विकल्पकसाधारणं विशिष्टाज्ञानत्वेन संशयस्यापि संस्कारजनकत्वात्। संशयत्वञ्च जातिरपि न लक्षणं धर्म्यंशे[22] संशयत्वाभावेन तदंशे तज्जात्यभावात् जातेश्चाव्याप्यवृत्तित्वानभ्युपगमादिति चेद् एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय[23] इति लक्षणात्।

संशयो द्विविध: बहिर्विषयक: अन्तर्विषयकश्च[24]। बहिर्विषयकोऽपि द्विविध:—दृश्यमानधर्मिक: अदृश्यमानधर्मिकश्च। तत्र दृश्यमानधर्मिको यथा ऊर्ध्वत्वविशिष्टस्य धर्मिणो दर्शनाद् अयं स्थाणु: पुरुषो वा इति। अदृश्यमानधर्मिको यथा—गोगवयादिपिण्डे विषाणमात्रदर्शनाद् अयं गौर्गवयो वेति।

वस्तुतस्तत्रापि विषाणधर्मिक एव संदेहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वा? विवक्षामात्रात्तु[25] द्वैविध्याभिधानम्। यत्सामान्यं संशये हेतुस्तदनेकत्र दृष्टं संशायकमेकत्र धर्मिणि वा दृष्टं संशयहेतुरित्यत्र प्रथमां विधामाह—"दृष्टञ्च दृष्टवत्"[26]।

दृष्टमूर्ध्वत्वं संशयहेतु:। दृष्टवदिति वति प्रत्यय: तेन दृष्टाभ्यां स्थाणुपुरुषाभ्यां तुल्यं वर्तते पुरोवर्तिनि यदूर्ध्वत्वं तद्दृष्टं संशयहेतु:।

एकधर्मिविषयं यद्दृष्टं तदुदाहरति—"यथा दृष्टमयथादृष्टत्वाच्च[27]" संशय हेतुरित्यर्थ:। चकार: समुच्चयार्थ:। अयथादृष्टत्वाद्धेतोर्यथादृष्टमपि संशायकम्। यथा—चैत्रो दृष्ट: केशवान्, कालान्तरे अयथादृष्ट: केशविनाकृतो दृष्ट:। क्रमेण तत्रैव चैत्रे वस्त्रावृतमस्तके दृष्टे सति भवति संशयश्चैत्रोऽयं सकेशो निष्केशो वेति। तत्र हि चैत्रत्वं समानो धर्म: संशायक: स च एकत्रैव दृष्ट इत्यभिन्न एव धर्मिणि दृष्ट: संशयहेतु:।

उपलभ्यमानत्वं समानमेव धर्मं संशयकारणमाह—"विद्याऽविद्यातश्च संशय:[28]" संशयो हि विद्याऽविद्याभ्यां भवति। यथा—मौहूर्तिक: सम्यगादिशति चन्द्रोपरागादि, असम्यगपि। तत्र स्वज्ञाने संशयोऽस्य जायते सम्यगादिष्टमसम्यग्वा? यद्वा ज्ञानं हि क्वचिद् विद्या भवति क्वचिच्चाविद्या

अप्रमा भवति। तथा च ज्ञायमानत्वाद् इदं सद्–असद् वा इति संशयो जायते। पुनः संशयग्रहणमिहापि सामान्यप्रत्यक्षादेव संशयो न तु निमित्तान्तरादिति सूचनार्थम्। तथा च "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुप-लब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः[29]" इति गौतमीये लक्षणे उपलब्ध्यनुपलब्ध्यव्यवस्थेत्यस्य पृथगेव संशयकारणत्वं यदुक्तं[30] तन्निरस्तम्।

महर्षि गौतमेन षोडशपदार्थेषु मध्ये प्रमाणप्रमेयानन्तरं संशयस्य गणनां कृत्वा एतस्य पर्याप्तप्रमुखता प्रदत्ता। भगवता वात्स्यायनेन उक्तं यत् संशयः न्यायस्याङ्गभूतः। न्यायञ्च अननुभूते अनिर्णीते च प्रवर्तते। इत्थं भारतीयनैयायिकानामिदं मतं डेकार्ट सिद्धान्तानुसारमेव यद् दर्शनस्याविर्भावः संशयाज्जायते। भारतेऽपि "वादे–वादे जायते तत्वबोधः" इति या धारणा, अस्यां धारणायामपि संशय एव। शुद्धचिन्तनदृष्ट्येयं जिज्ञासापि कथ्यते। इदं नावश्यकं यत् यद्वस्तुविषये संशयः तत्परिणामेऽपि संशयः स्यात्। वस्तुतः संशयस्य सत्ता तावता कालेन भवति यावद्विशेषं नोपलभ्यते। गौतमानुसारेण समानधर्मोपलब्धितः, अनेकधर्मोपलब्धितः, विप्रतिपत्तितः, उपलब्ध्यव्यवस्थातः, अनुपलब्धि अव्यवस्थातश्च विशेषापेक्षा विमर्शः संशयः। तथा च सूत्रम्–"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः[31]।"

( 1 ) **समानधर्मोपपत्तिमूलकः संशयः**–स्थाणुपुरुषयोः समानं धर्ममारोहपरिहाणौ पश्यन् पूर्वदृष्टञ्च तयोर्विशेषं बुभुत्समानः किंस्विदित्यनन्तरं नावधारयति तदनवधारणं ज्ञानं संशयः। "समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य नोपलभे[32]" इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्तिका तेन विशेषापेक्षो विमर्शः संशयः।

( 2 ) **अनेकधर्मोपपत्तिमूलकसंशयः**–समानजातीयमसमान-जातीयञ्चानेकं तस्यानेकस्य धर्मोपपत्तेः। अस्ति च शब्दे विभागजत्वं विशेषः तस्मिन् द्रव्यं गुणः कर्म चेति संशयः। अन्यतमस्य व्यवस्थापकं धर्मं नोपलभे इति[33]।

(3) **विप्रतिपत्तिमूलकः संशयः**—अस्त्यात्मा इत्येकं दर्शनं नास्त्यात्मा इत्यपरम्। न च सद्भावासद्भावौ सहैकत्र सम्भवतः। न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशयः[34]।

(4) **उपलब्ध्यव्यवस्थामूलकः संशयः**—सदप्युदकं तडागादिषूपलभ्यते असदप्युदकं मरीचिषूपलभ्यते[35]। तथा च सदेवोपलभ्यते इति नियमो नास्ति किन्त्वसदपि प्रतीयते यथा शुक्तिरजतम् इत्येषोपलब्ध्यव्यवस्था। अतः क्वचिदुपलभ्यमाने जलादौ सत्त्वासत्त्वयो-र्व्यवस्थापकस्य प्रमाणस्यानुपलब्धौ सत्वासत्वयोरन्यतरस्य निश्चयासम्भवात् संशयो जायते।

(5) **अनुपलब्ध्यव्यवस्थामूलकः संशयः**—नियमाभावादपि "किं सन्नोपलभ्यते उत असन्नोपलभ्यते[36]" इति संशयो भवति। यथा—अन्तःप्रविष्ट कीलकमूलमुदकं च असदपि नोपलभ्यते यथानुत्पन्नं निरुद्धं मूलकीलकोदकादि तथा असद् एवानुपलब्धिर्भवतीति नियमो नास्ति—किन्तु सतोप्यावृत्तस्यानुपलब्धिर्भवति इत्येषाऽनुपलब्ध्यव्यवस्था ततश्च क्वचिदनुपलभ्यमाने सत्त्वासत्त्वयोरन्यतरस्य व्यवस्थापकाप्रमाणानुपलब्धौ निश्चयाभावात् संशयो जायते, यदिदं न प्रतीयते तत् सद्वासद्वा इति।

संशयस्य पञ्चसु भेदेषु अन्तिमौ द्वौ समानधर्मोपपत्तिमूलके संशये[37] एवान्तर्भूतौ इति उद्योतकराणामाशयः। वैशेषिकानुसारेण प्रथमे संशये एव सर्वेषामन्तर्भावः[38]। केशवमिश्रोऽपि अन्तिमयोः द्वयोः संशययोः गणना न कृतवानिति[39]।

---

1. कारिकावली—का. सं. 130।
2. न्यायसूत्रम् 1/1/23।
3. किरणावली टीका—का. सं. 130।
4. मुक्तावली टीका।
5. प्रशस्तपादभाष्यम्।
6. तत्रैव।
7. न्यायकन्दली, पृ. 421, सं. सं. वि. वि. प्रकाशिता—1977।
8. पदार्थधर्मसंग्रहे, पृ. 412—सं. सं. वि. वि. प्रकाशिता—1977।

9. न्यायकन्दली।
10. प्रशस्तपादभाष्यम्।
11. प्रशस्तपादभाष्यम्।
12. वैशे. सू. 2/2/17।
13. वैशेषिकसूत्रोपस्कार–ग्रहणपरं ज्ञानपरमित्यर्थः।
14. उपस्कारटिप्पणी, पृ. 75।
15. उपस्कारटीका–शंकरमिश्रः।
16. तत्रैव।
17. उपस्कारटिप्पणी।
18. न्यायभाष्यम्।
19. न्यायवार्तिकम्।
20. तादृशवैजात्यं कार्यतावच्छेदके न भवति सकलकार्याव्यापकत्वात्। उपस्कार टिप्पणी उ. टी. 77।
21. न्यासूत्रोपस्कारः पृ. 77।
22. वह्न्यंशे संशयात्मकस्यापि पर्वतांशे निश्चयात्मकस्यैव पर्वतो वह्निमान्नवेति संशयस्य स्वीकारात्। उ. टी.–77।
23. न्यायसूत्रोपस्कारः सू. सं. 2/2/17।
24. वै. सू. उपस्कार–प्रस्तावना सू. सं. 18।
25. विषाणमात्रदर्शनोत्तरसंदेहस्य दृश्यमानधर्मिकत्वेऽपि गोवलिवर्दन्यायेन विषाणधर्मिकान्यदृश्यमानधर्मिकत्वं तदन्यदृश्यमानधर्मिकत्वञ्चेति कौचिद्धर्मावाश्रित्य विभाजकेच्छामात्रेण द्विधोक्तिर्बहिर्विषयस्य संशयस्येत्यर्थः। –न्यायसूत्रोपस्कारटिप्पणी।
26. वैशे. सू. 2/2/18।
27. वै. सू. 2/2/19।
28. कणाद सू. 2/2/20।
29. न्या. सू. 1/1/23।
30. भाष्यकारेण वात्स्यायनेनोक्तम्।
31. न्या. सू 1/1/23।
32. न्या. भा. सू. 1/1/23।
33. वात्स्यायनभा. 1/1/23।
34. तत्रैव।
35. न्याय. भा. प्रसन्नपदाटीका।
36. न्यायभाष्यम्।
37. उद्योतकरः।
38. वैशे. सू. 2/2, 17–20।
39. तर्कभाषा।

# "न्यायनये संशयस्वरूपविचारः"

डॉ. रामचन्द्रशर्मा

"वादे वादे जायते तत्त्वबोधः", तत्त्वबुभुत्सोः कथा वादः, तत्त्वञ्च याथार्थ्यम्, सति हि तत्त्वविज्ञानेऽभ्युदयनिःश्रेयससिद्धिः। अत एवोक्तं परमर्षिणा श्रीगौतमेन–"प्रमाणादितत्त्वाज्ञानान्निःश्रेयसाधिगम"[1] इति। महर्षिकणादोऽपि प्रकारान्तरेणेदमेवाह–"द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति।"[2] साधर्म्यवैधर्म्याभ्यां विचारपूर्वकं प्रमेयतत्त्वविमर्शेन तत्तत्प्रमेयासाधारणधर्मनिश्चयेन तत्स्वरूपनिश्चयः सञ्जायते। स्वरूपनिश्चय एव तत्त्वविज्ञानसिद्धिः, तया च लौकिकाभ्युदय सिद्धिपूर्वकपरमाभीष्टनिःश्रेयससिद्धिरिति पदार्थतत्त्वनिश्चयाय भूयो भूयो वादः समाचरणीयः समादरणीयश्च। अत एव विद्वद्भिराचार्यपरम्परया विद्याविनोदाय लोकशिक्षणाय च विद्वत्सङ्गोष्ठीनामायोजनं विधीयते।

तत्र आत्मैव परमः प्रमेयः। तथा हि निर्दिशति श्रुतिः–"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासिव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।"[3] इति दर्शनञ्च श्रवणाधीनमेव, तस्य प्रमाणान्तरागम्यत्वाच्छ्रवणाभावे मननादीनामवसर एव नास्ति, अतः श्रुतिरेव दर्शनहेतुतया श्रवणादीन् व्यवस्थापयति। तथाहि–

**"श्रोतव्यो श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥" इति**

---

1. न्यायसूत्रम्-1/1/1
2. वैशेषिकसूत्रम् 1/1/14
3. बृहदारण्यकोपनिषत्-2/4/5

यावदात्मावगमो न स्यात्तावच्छ्रवणादीनामावर्तनं करणीयम्, "आवृत्तिरसकृदुपदेशात्"[1]–इति ब्रह्मसूत्रेणेदं विज्ञाप्यते। युक्तिभिः श्रुतितात्पर्यावधारणमेव श्रवणं, तच्च जिज्ञासाजनितमीमांसारूपम्, पूजितविचारो हि मीमांसा, पूजिततत्त्वञ्च वेदानुगामितर्कैस्तत्त्वस्वरूपनिर्धारणकारणत्वम्, सत्तर्कानुगतविचार एव तत्त्वविज्ञानाय कल्पते, न तु कुतर्कानुगतः, तर्काप्रतिष्ठानात्"–इत्यभियुक्तोक्तेरिदमवधारणीयम्। भर्तृहरिणापि सम्प्रोक्तम्–

**"न चागामादृते धर्मस्तर्केण व्यवतिष्ठते।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमहेतुकम्॥[2]"**

अतः श्रुत्यनुगामियुक्तिभिरेव तत्त्वनिर्धारणं नान्यथा। महर्षि-गौतमकणादप्रणीता तर्कविद्यैव वेदानुगामित्वेन वस्तुतः तर्कविद्या! यथोक्तम् न्यायभाष्यकारेण आचार्यवात्स्यायनेन–"प्रत्यक्षागमाभ्यामीक्षितस्यान्वी-क्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्"[3]–इति। अत्र विषये आचार्यजयन्तभट्टोऽप्याह–"पूर्वत्र तर्कशब्देनोपात्तमुत्तरत्र न्यायशब्देनैतदेव शास्त्रमुच्यते। न्यायस्तर्कोऽनुमानं सोऽस्मिन्नेव व्युत्पाद्यते, यतः सांख्यार्हतानां तावत्क्षपणकानां कीदृशमनुमानोपदेशकौशलं, कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यते इति नासाविह गणनार्ह इति।"[4]

**चतस्रो विद्यास्तावल्लोकसंस्थितिहेतवः। तथा ह्युक्तम्-**

**"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती।**
**विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः।" इति**

आस्वपि चतसृषु विद्यासु तावदान्वीक्षिक्येव सर्वाधारभूता, सर्वोपकारकत्वात्। अत एवोक्तं राजशेखरेण काव्यमीमांसायाम्–" आन्वीक्षिक्या विवेचिता त्रयी वार्त्तादण्डनीत्योः प्रभवति" इति आचार्यकौटिल्योऽपि निगदति–

---

1. ब्रह्मसूत्रम्–4/1/1
2. वाक्यपदीयम् ब्रह्मकाण्डम्–30
3. न्यायदर्शनम्–पृष्ठ–8
4. न्यायमञ्जरी–पृष्ठ–9

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥"[1]**

मनुनाऽपि तर्कविद्याया महत्त्वं संस्थापयता सम्प्रोक्तम्–

**आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥[2]**

अत्र यद्यपि केचित्तर्कपदेन पूर्वमीमांसात्मकवाक्यविद्यामेवाभ्युपगच्छन्ति, वाक्यविद्यात्वेन वेदार्थनिर्धारकतर्करूपत्वात्, किन्तु यावद्गौतमीयप्रमाणविद्यारूपतर्केण दृढ़तरवेदप्रामाण्यन्नोपस्थाप्यते तावद्वाक्यविद्याया अवसर एव नास्ति। तथा चोक्तं न्यायमञ्जरीकारेण–

"न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां, वेदप्रामाण्यहेतुत्वात्। वेदेषु हि तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलास्थाः कथमिव बहुवित्तव्ययासादिसाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः? किं वा तदानीं स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यम्? तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढ़तरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षममक्षपादोपदिष्टमिदं न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनमिति परं विद्यास्थानम्।.... वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यामिदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम्।"[3]

अतो मननात्मिका एषा न्यायवैशेषिकासिद्धान्तरूपा आन्वीक्षिकीविद्या समग्रस्यापि वैदिकवाङ्मयशरीरस्य स्वरूपोपस्थापिका मेरुदण्डभूता। सा च सूत्रकारेण महर्षिगौतमेन संशयादिपदार्थानां पृथङ्निर्वचनेन पृथक्प्रस्थानतया समुपस्थाप्यते। तद्यथोक्तं भाष्यकारेण–"संशयादीनां पृथग्वचनमनर्थकं, संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्ती न व्यतिरिच्यन्ते इति। सत्यमेतत्। इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या। तस्याः पृथक्प्रस्थानाः संशयादयः

1. कौटिलीयार्थशास्त्रम्–विद्योद्देशः
2. मनुस्मृतिः–(12/106)
3. न्यायमञ्जरी–8-9

पदार्था:। तेषां पृथग्वचनमन्तरेणाऽध्यात्मविद्यामात्रमियं स्यात्, यथोपनिषद:। तस्मात्संशयादिभि: पदार्थै: पृथक् प्रस्थाप्यते। तत्र नानुपलब्धे न निर्णीतेऽर्थे न्याय:प्रवर्तते, किन्तर्हि? संशयितेऽर्थे। यथोक्तं–"विमृश्य पक्षप्रतिपक्षाभ्या-मर्थावधारणं निर्णय:" (न्या.सू. 1/1/41) इति। विमर्श:–संशय:, पक्षप्रतिपक्षौ-न्यायप्रवृत्ति:, अर्थावधारणं–निर्णयस्तत्त्वज्ञानमिति। स चायं किंस्विदिति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशय: प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यते।"[1] इति

वस्तुत: विचारमात्रप्रवर्तनमूलत्वेन संशयो महत्त्वपूर्णं स्थानं भजते। तथा ह्युक्तम्–

**"न संशयामनारुह्य नरो भद्राणि पश्यति।**
**संशयं पुनरारुह्य यदि जीवति पश्यति॥"**[2]

"जानाति, इच्छति, यतते"–इति हि जीवात्मन: स्वाभाविकी प्रवृत्ति:, ज्ञानवान् आत्मा, "इच्छाद्वेषप्रयत्नसुखदु:खज्ञानान्यात्मनो लिङ्गम्" ज्ञानं हि तस्य गुण:, "सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्" तच्च स्मृत्यनुभवभेदेन द्विविधं, संस्कारमात्रजन्यं ज्ञानं स्मृति:, तद्भिन्नं ज्ञानमनुभव:, स च यथार्थाऽयथार्थभेदेन द्विविध:, तद्धर्मवतितद्धर्मप्रकारकोऽनुभवो यथार्थ:, यथा–रजतत्ववति रजते "इदं रजतमि"त्याकारकं ज्ञानम्, तद्धर्माभाववति तद्धर्मप्रकारकोऽनुभवोऽयथार्थ: यथा–रजतत्वाभाववति शुक्तौ "इदं रजतम्"–इत्याकारकं ज्ञानम्, यथार्थानुभवश्चतुर्विध:–प्रत्यक्षानुमित्युपमितिशाब्दभेदात्, अयथार्थानुभवश्च त्रिविध:–"संशयविपर्ययतर्कभेदादिति बोध्यम्।"

तत्र जीवात्मन: प्रवर्तकं ज्ञानं निश्चयात्मकमेव, सति हि निश्चयात्मके ज्ञाने स्वेष्टविषये यथायोग्यं प्रवर्तते। यत्र च अनवधारणात्मकं "किंस्विदित्थमाहोस्विदित्थम्"–इत्याकारकं ज्ञानं जायते तत्र वस्तुस्वरूप-निश्चयाभावेन प्रवृत्तेर्व्याघातो जायते। तत्र संशयनिवृत्तिपूर्वकनिश्चयाय प्रवर्तते, स च विशेषदर्शनाधीन:, विशेषदर्शनञ्च तत्तत्प्रमाणाधीनम्, अत

1. न्यायभाष्यम्–पृष्ठ-6
2. हितोपदेश:–मित्रलाभ:-7।

एवोक्तं–"प्रमाणैरर्थपरीक्षणं न्यायः" परीक्षणञ्च–वस्तुस्वरूपमीमांसारूपम्। अतो यत्र संशयः तद्विषयपरीक्षणार्थं मनीषिणां वादकथाप्रवृत्तिः, ततश्च वस्तुस्वरूपनिर्णयात्मकफलसिद्धिः। तथा च प्रमेयमीमांसायां संशयस्य महत्त्वपूर्णं स्थानम्। संशयमारुह्यैव भद्रं द्रष्टुं शक्यम्। संशयान एव विशेषदर्शनप्रयोजकदृष्टसाधनैः पदार्थतत्त्वनिश्चाय प्रवर्तमानस्तत्त्वज्ञानपूर्वकं प्रवृत्तिसाफल्यं भजते। अभ्युदयनिःश्रेयसमेव भद्रं, तदर्थं स्वभावप्राप्त–विषयस्वरूपसंसर्गविषयसंशयं पुरतो निधाय बाह्यान्तःसकलपदार्थ–विज्ञाननिर्धारणार्थं विचारप्रवृत्तिरपरिहार्या! अत एवोक्तं "न संशयमना–रुह्येत्यादि!" अग्रिमा पंक्तिरितोऽप्यधिकमहत्त्वपूर्णा, यतो हि संशयारोहो भद्रदर्शनहेतुरिति मत्वा श्रुतिस्मृतीतिहासपुराणादिप्रामाण्ये संशयमावहमानो नास्तिकत्वं मा भजेदत एव सम्प्रोक्तं "संशयं पुनरारुह्येत्यादि। तथा च संशयमारुह्य यदि जीवति तदा पश्यति! यतो हि सर्वदा संशयारोहे ग्राह्य–स्वरूपनिश्चयाभावेन प्रवृत्तेर्वैफल्यं समापद्यते! प्रवृत्तिवैफल्यमेव मरणम्! शान्तिसौख्यावाप्तिरेव वस्तुतः जीवनम्! तच्च वस्तुतत्त्वनिश्चयाधीन–सफलप्रवृत्त्यैवाधिगन्तुं शक्यं, नान्यथा! यथा हि– सम्प्रोक्तञ्जगद्गुरुणा–

> **"श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
> **ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।**
> **अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति।**
> **नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥"**[1]

श्रुत्यादिप्रतिपादितार्थे गुरुवचनेषु च श्रद्धावान् आत्मादिप्रमेयविषयक–संशयं विच्छिद्य तत्त्वज्ञानं लभते! यतो हि सदाचार सम्पन्नः स तत्परो भूत्वा यतते, ततश्च साफल्यं भजते, यः खलु गुरूपदिष्टश्रुतिवाक्येषु विश्वासमविधाय स्वभावप्राप्तपशुसाधारणप्रवृत्तिमनुहरति, आत्मकल्याणाय च न यतते सोऽज्ञोऽश्रद्धधानश्च विनश्यति। अत्रविषय आचार्यशङ्करः प्राह–"अज्ञाश्रद्धधानौ विनश्यतः तथापि न तथा, यथा संशयात्मा! संशयात्मा तु पापिष्ठः सर्वेषाम्। कथम्? नायं साधारणोऽपि लोकोऽस्ति तथा न परो

---

1. श्रीमद्भगवद्गीता–4/39–40

लोको न सुखम्! तत्रापि संशयोपपत्तेः संशयात्मनः संशयचित्तस्य। तस्मात् संशयो न कर्त्तव्यः।"[1]

विनाशोऽत्र प्रेयःश्रेयोभ्याञ्च्युतिरेव! अज्ञः केवलं ज्ञानाभावाच्च्यवते, यद्यदृष्टवशात्सत्सङ्गलाभेन वस्तुतत्त्वं जानाति तदा स साफल्यं भजते। अत एवोक्तं–"अज्ञः सुखमाराध्यः" सुखतरमाराध्यते विशेषज्ञः। ज्ञान लवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति।।[2] इति। यथा अज्ञः कथञ्चित्फल-भाग्भवितुमर्हति, तथा अश्रद्धधानोऽपि कथञ्चिल्लोखसुखं, अदृष्टवशाच्छ्रद्धायां सत्यां परलोकसुखञ्चाधिगन्तुं शक्नोति, किन्तु संशयात्मनस्तु सर्वतोऽपि परिभ्रष्टता समापद्यते! तस्य ज्ञानलवदुर्विदग्धस्य विशेषदर्शनाभावेन सर्वदा सर्वत्र संशयशीलत्वात् विक्षिप्ततया न कुत्रापि सुखाभिव्यक्तिः, सत्स्वपि लोकपरलोकसुखसाधनेषु न तैः सुखभाग्भवितुमर्हति; "कर्त्तृकर्मसाधनवैगुण्यात् सम्यगनुष्ठानाभावेन फलाभावस्यावश्यम्भावात्। अत एवोक्तम्- "नायं लोकोऽस्ति न परो"--इत्यादि। आत्मविषय एव आस्तिकनास्तिकवादिभिः अस्तित्वेन नास्तित्वे च विरुद्धपक्षाः समुपस्थाप्यन्ते, तत्र "अस्ति वा नास्ति वा", "देह एव वा देहातिरिक्तो वा" इत्यादिसंशयसमापत्तौ तस्य शाश्वतत्वनिश्चयाभावेन कर्मफलसिद्धान्तनिश्चयाभावान्न सत्कर्मविषयिणी प्रवृत्तिः, प्रत्युत तात्कालिकसुखसाधकहिंसात्मकप्रवृत्तिरेव सञ्जायते, तेन सर्वलोकसौख्यहानिरेव! अतएवाचार्येणोक्तं–"संशयात्मा तु पापिष्ठः" इति। स हि "स्वयं नष्टः परान्नाशयति"–इति न्यायेन स्वपरघातकः सन् सर्वनाशहेतुभवतीति सम्यगुक्तं–"संशयात्मा विनश्यतीति।"

वस्तुतः प्रायः सकलोऽपि लोकः संशयसर्पग्रस्तः। वेदविहिते सनातनधर्मे संशयानोऽहरहं पतमानो दरीदृश्यते। ईश्वरसत्ताविषयकः संशयः सर्वत्रानुभूयते। आगमानुमानप्रमाणसिद्धत्वेऽपि वर्तमानकालिकवैज्ञानिक-विचारचातुरीं सम्प्रदर्शयन्तः केचन वैज्ञानिकास्तस्यास्तित्वं न्यक्कुर्वन्तो नास्तिकतामेव प्रमाणयन्तः समाजं विभ्रामयन्ति। अत्र विषये संशयापहारकमिदं पद्यं समवधारणीयम्–

---

1. गीताशाङ्करभाष्यम्-4/40
2. भतृहरिशतकत्रयम-नीतिशतकम्-3

**"अजन्मानो लोकाः किमवयववन्तोऽपि जगता-**
**मधिष्ठातारं किं भवविधिरनादृत्य भवति।**
**अनीशो वा कुर्याद्भुवनजनने कः परिकरो;**
**यतो मन्दास्त्वां प्रत्यमरवर! संशेरत इमे॥"[1]**

अतः भद्रदर्शनाय संशयारोहोऽप्यावश्यकः, संशयनिवृत्तिरप्यपरिहार्या। संशयस्यैव विद्यमानस्य सकलानर्थहेतुत्वात् तत्स्वरूपनिर्धारणपूर्वकतन्निवृत्तिरवश्यं विधेया! तत्र को नाम संशयः? इति जिज्ञासायां महर्षिगौतमेन तत्स्वरूपप्रतिपादकं सूत्रं समुपस्थापितम्–

**"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-**
**व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।"[2]**

विशेषापेक्षो विमर्शः संशयः! तथाहि "स्थाणुर्वा पुरुषोवा"–इत्यादौ स्थाणुपुरुषोभयसाधारणधर्मज्ञानपूर्वकपुरुषत्वादिविशेषधर्मनिर्णयापेक्षः विमर्शः जायते स एव संशयः। स च अनवधारणात्मकः "इदमित्त्थमाहोस्विदित्त्थमिति।" स च विमर्शः पञ्चभिर्हेतुभिर्विशेषापेक्षः सन् भासते। तद्यथा–"समानानेकधर्मदर्शनात्", अनेकपदस्य पुनरप्यावृत्त्या–"अनेकधर्मदर्शनात्" विप्रतिपत्तिवाक्यजन्यविपरीतबोधात्", "उपलब्ध्यव्यवस्थादर्शनात्", "अनुपलब्ध्यवस्थादर्शनाच्च।" तत्र प्रथमस्तावत्-समानानेकधर्मदर्शनाद्यथा–"स्थाणुर्वा-पुरुषो वा" इत्यत्रैव स्थाणुपुरुषसाधारणाः समाना अनेके च ये धर्मा "ऊर्ध्वत्व-स्थूलत्वादयः", तेषामुपपत्तेरुपलब्धेर्विशेषापेक्षो विमर्शः जायते। अत्र "समानमनयोर्धर्ममुपलभे, विशेषमन्यतरस्य नोपलभे"! इत्यपेक्षाबुद्धिः संशयप्रयोजिका बोध्या। अत्रैव प्रसङ्गान्महर्षिकणादसम्प्रोक्तं संशयस्वरूपनिर्धारकं सूत्रमपि विचारणीयम्। तद्यथा–

**"सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः"[3]**

सामान्यप्रत्यक्षात्–स्थाणुपुरुषसाधारणोर्ध्वत्वादिधर्मदर्शनात्, विशेषाप्रत्यक्षात्–स्थाणुपुरुषव्यावर्तकशिरःपाण्यादिवक्रकोटराद्यनुपलम्भात्,

1. शिवमहिम्नस्तोयम्-6
2. न्यायसूत्रम्-1/1/23
3. वैशेषिकसूत्रम्-2/2/17

विशेषस्मृतेः—स्थाणुत्वपुरुषत्वरूपविशेषाश्रयस्मरणात् संशयः जायत इति भावः। अत्र चकारोऽनुक्तसमुच्चयार्थः साधारणधर्मानुमितिविशेषानुमित्यादीनां समुच्चयं करोति। "विशेषौ विशेषाश्च" इति "विशेषाः", तेषां स्मृतेः संशयः। विशेषयोः स्मृतेर्यथात्रैव "स्थाणुर्वा पुरुषो वेति।" विशेषाणामनेकधर्माणां स्मृतेर्यथा—"विभागजः शब्दो द्रव्यं गुणः कर्म वेति", तथाहि—शब्देऽस्ति विभागजत्वं विशेषः, तत्रायं विशेषः "शब्दस्य सतः द्रव्यस्य गुणकर्मभ्यो विशेषः?" आहोस्वित्—"सतः गुणस्य द्रव्यकर्मभ्यो विशेषः?" अथ "सतः कर्मणो द्रव्यगुणेभ्यो विशेष?" इति अनेकविशेषस्मृत्या संशयः, अत्रान्यतमस्य व्यवस्थापकं धर्मं नोपलभे"—इत्यपेक्षा। तत्र "शब्दो न द्रव्यं, गुणाश्रयत्वाभावात्, नापि कर्म, संयोगविभागजनकत्वाभावात्, नापि सामान्यादिरूपो, विनाशित्वात्, नाप्यभावः, भावत्वेन प्रतीयमानत्वात्",—इति पारिशेष्याद् गुणत्वनिश्चयो भवति—"शब्दो गुणः, विभागजत्वात्, विभागजविभागवत्" इति गुणत्वव्याप्य-विभागजत्वरूपविशेषधर्मदर्शनेन एककोटिकनिश्चयात्संशयनिवृत्तिः। एवमेव "स्थाणुर्वा पुरुषो वा"—इत्यत्रापि "स्थाणुत्वव्याप्यवक्रकोटरादिमानयं", "पुरुषत्वव्याप्यकरादिमानयम्"—इति एकतरकोटिनिश्चयेन संशयनिवृत्तिः सञ्जायते।

"अनेकधर्मोपपत्तेः:-अनेकस्माद्व्यावृत्तो धर्मोऽनेकधर्मः, "असाधारणधर्मः" इत्यर्थः, समानजातीयमसमानजातीयमनेकं धर्मि, तस्माद्व्यावृत्तमितिभावः। तद्यथा—"गन्धवत्त्वात् पृथिवी अबादिभ्यो भिद्यते गुणकर्मभ्यश्च, तस्य पृथिवीमात्रवृत्तित्वात् तेन तत्र द्रव्यदिनिश्चयो न सम्मवतीति" पृथिवी द्रव्यं गुणादिर्वा" इति संशयो जायते। तत्र गन्धस्य गुणत्वेन गुणस्य च द्रव्यवृत्तित्वेन पृथिव्या द्रव्यत्वं निश्चीयते।

"विप्रतिपत्तेः"—विरुद्धार्थद्वयप्रतिपादकवचनद्वयं विप्रतिपत्तिः, व्याहतमेकार्थदर्शनमितिभावः, व्याघातो-विरोधोऽसहभाव इति यावत्। तद्यथा—"अस्त्यात्मा देहादिभिन्न" इत्यास्तिकवचनम्, "नास्तीति" "नास्तिकवचनम्", न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरस्य साधको हेतुरुपलभ्यते। अतः विशेषापेक्षो विमर्शः समापद्यते "अस्ति वा नास्ति वा" इति। तत्र मृतशरीरादौ चैतन्यव्यभिचाराद् देहादिभिन्न आत्मा अस्त्येवेति निश्चयः सञ्जायते।

"उपलब्ध्यव्यवस्थातः"–तथाहि–उपलब्धिर्ज्ञानं, तस्या अव्यवस्था–अनियमः, तस्मात् संशयः। तद्यथा–"विद्यमानं सदपि जलमुपलभ्यते कूप-तडागादिषु, अविद्यमानमसदप्युपलभ्यते मरुमरीचीषु। तथा च सदेवोपलभ्यत इति नियमनिर्धारणं कर्त्तुं न शक्यते, इत्येवमुपलब्ध्यव्यवस्थातोऽत्र तत्त्वव्यवस्थापकप्रमाणाभावात्संशयः" किं सदुपलभ्यते उतासदिति।" तत्र विशेषदर्शनव्यवस्थापकप्रमाणसाहाय्येन सत्त्वमसत्त्वं वा निश्चीयते, ततश्च संशयनिवृत्तिः।

"अनुपलब्ध्यव्यवस्थातः"–अनुपलब्धिरज्ञानं, तस्या नियमाभावादपि संशयः। तद्यथा–"विद्यमानं सदपि नोपलभ्यते मूलकीलकोदकादि, वृक्षादिमूलं भूम्यन्तर्गतं, कीलकं भित्त्यन्तर्गतं, उदकञ्च भूम्याद्यन्तर्गतम्। असदपि नोपलभ्यते अनुत्पन्नं विनष्टं वा। ततः क्वचिदनुपलभ्यमाने संशयो जायते–"किं सन्नोपलभ्यते उतासदिति।" तत्र तत्त्वव्यवस्थापकप्रमाणसाहाय्येनैकतर-कोटिनिश्चयात्संशयनिवृत्तिः।

इत्थमुपर्युक्तप्रकारेण "साधारणधर्मवद्धर्मिज्ञानजन्यम्, असाधारण-धर्मवद्धर्मिज्ञानजन्यं, विप्रतिपत्तिवाक्यजन्यञ्च "एकस्मिन्धर्मिणि विरुद्धनाना-धर्मावगाहि संशयात्मकं ज्ञानं जायते। तद्यथोक्तम्–

**स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥**[1]

अत्र न्यायसिद्धान्तमुक्तावलीकार आह–"एकधर्मिकविरुद्ध-भावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। उभयसाधरणो यो धर्मस्तज्ज्ञानं संशयकारणम्। यथा "उच्चैस्तरत्वं" स्थाणुपुरुषसाधारणं ज्ञात्वा "अयं स्थाणुर्न वा" इति सन्दिग्धे। एवमसाधारणधर्मज्ञानं कारणम्। यथा "शब्दत्वस्य" नित्यानित्यव्यावृत्तत्वं गृहीत्वा "शब्दो नित्यो न वा" इति सन्दिग्धे। विप्रतिपत्तिस्तु" शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम्। शब्द व्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात्, किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्यसंशयाद् विषयसंशय

1. कारकावली.का.–13।

इति। एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम्। किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति।[1]

अत्र संशयकारणेषु पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे बोध्ये। वस्तुतस्तु–उपलब्ध्यनुपलब्ध्यव्यवस्थास्थले समानानेकधर्मोपपत्तेः विप्रतिपत्तेर्वा संशयः जायते, न तु साक्षात्, अतः पृथग्वचनापेक्षा नास्ति, तथापि ज्ञातृगतयोरुपलब्ध्यनुपलब्ध्योः संशयजनकत्व-मस्तीति विज्ञापयितुं पृथगुक्तिरित्यवधेयम्। इत्थं संशयकारणसंग्रह-निर्देशोऽसत्पक्षप्रतिषेधार्थः। तथाहि–शब्दनित्यत्ववादिभिः "स एवायं गकार"–इत्यादिप्रत्यभिज्ञावशादविनाशित्वमुपपाद्य तस्य नित्यत्वं साध्यते। एवमेव नास्तिकैरदृष्टेश्वरादेश्चानुपलब्धेः तदसत्त्वमुपस्थाप्यते। तच्चायुक्तम्। विशेषग्रहणाभावे खलूपलब्धिमात्रस्यानुपलब्धिमात्रस्य च संशयहेतुत्वात्। तथा च नित्यानित्योभयव्यावृत्तशब्दत्ववान् शब्दो "नित्यो नवेति" संशयस्थले प्रत्यभिज्ञावशान्नित्यत्वं नैवावधारयितुं शक्यं, तस्याः "सेयं प्रदीपकलिका"–इतिवत् साजात्यमवलम्ब्यापि चारितार्थत्वात्। शब्दस्य प्रागभावप्रतियोगित्वेन कार्यत्वादनित्यत्वं निश्चीयते, "शब्दोऽनित्यः कृतकत्वाद्, घटवत्" इति। एवमेव–ईश्वराद्यनुपलब्धिरपि भूतलान्तर्गतजलादेरिवान्यथाप्युपपन्ना। योग्यानुपलब्धिरेवाभावग्राहिका नत्वनुपलब्धिमात्रम्। ईश्वरसाधकान्यनुमानानि यथा आचार्यनिर्दिष्टानि–

**"कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।**
**वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः।"[2]**

स एव भगवान् जगद्गुरुः परमकृपालुः स्वानुरागिभक्तजनं प्रति स्वात्मानं प्रकाश्य सर्वान् संशयान् सञ्छिनत्ति। मोहमयीमन्यथाख्यातिरूपां हृदयग्रन्थिमपि भिनत्ति। सर्वानर्थहेतुभूतां कर्मशृङ्खलाञ्च विनिवार्य, स्वशरणापन्नं प्रति "ददामि बुद्धिप्रयोगं तं येन मामुपयान्ति ते"–इति प्रतिज्ञया ज्ञानयोगं सम्प्रदाय, निखिलदुःखनिवृत्तिरूपां संविदानन्दमयीं मुक्तिं सम्प्रयच्छन् स्वात्मीकरोति। तथाहि–

---

1. मुक्तावली–पृष्ठ–477–79।
2. न्यायकुसुमाञ्जलिः–5/9

**"योगसन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।**
**आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय।।**
**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।**
**छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत।।"[1]**

श्रुतिरपि अमुमेवार्थं द्रढयन्ति। तद्यथा–

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।।"[2] इति**

अन्ते चाचार्योदयनमुखेन तमेव संस्मरन् समुपसंहरामि स्वीयां सरस्वतीम्–

**"कारङ्कारमलौकिकाद्भुतमयं मायावशात्संहरन्।**
**हारं हारमपीन्द्रजालमिव यः कुर्वञ्जगत्क्रीडति।**
**तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं,**
**विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि।।"[3]**

**इति शम्!**

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्ति! शान्तिः! शान्तिः!**

**सन्दर्भग्रन्थसूची–**

1. न्यायदर्शनम्, सं. दुण्ढिराज शास्त्री, चौखम्बा संस्कृत संस्थानम् सन् 2009

2. वैशेषिकदर्शन, व्या.-उदयवीर शास्त्री, विजयकुमार गोविन्दराय हासानन्द, नई सड़क दिल्ली, 2009

3. बृहदारण्यकोपनिषत्, गीताप्रेस, गोरखपुर, वि.सं. 2010

---

1. श्रीमद्भगवद्गीता-4/41-42
2. मुण्डकोपनिषद्-2/2/8
3. न्यायकुसुमाञ्जलिः-2/4।

4. वाक्यपदीयम्, ज्योतिषप्रकाश प्रेस, वाराणसी वि.सं. 1994

5. न्यायमञ्जरी, जयन्तभट्ट श्री सं. सं वि.वि. वाराणसी, सन् 1982

6. हितोपदेश॰, चौखम्बासुरभारती प्रकाशन, वाराणसी, वि.सं. 2031

7. श्रीमद्भगवद्गीता (शाङ्करभाष्ययुता) गीताप्रेस, गोरखपुर वि.सं.-2066

8. शिवमहिम्नस्तोत्रम् (मधुसूदनीयुतम्) श्रीसं.सं.वि.वि. वाराणसी, वि. सं-2039

9. कारिकावली (दिनकरीरामरुद्रीयुता) राष्ट्रियसंस्कृतसंस्थानम् सन् 2002

10. मुण्डकोपनिषत्, गीताप्रेस, गोरखपुर, वि.सं.-2010

11. भर्तृहरिशतकत्रयम्-चौखम्बा विद्याभवन, वाराणसी, सन् 2006

12. ब्रह्मसूत्रम्–मोतीलालबनारसीदास प्रब्लिशर्स, दिल्ली, सन् 1990

13. मनुस्मृतिः–

14. कौटिलीयार्थशास्त्रम्, सं.–विश्वनाथशास्त्रीदातार, सं.सं. वि.वि. वाराणसी, सन् 1991

# संशयस्य स्वरूपं तत्कारणविमर्शश्च

**प्रो. हरेरामत्रिपाठी**

भारतीयदर्शनस्य मुख्यं प्रयोजनं मोक्ष एव विद्यते। भारतीय-दर्शनस्यान्यतमं दर्शनं न्यायदर्शनमिति। न्यायदर्शनस्यापि मुख्यं प्रयोजनं मोक्ष एव दरीदृश्यते। तस्य प्राप्तिस्तु षोडशपदार्थानां तत्त्वज्ञानात् भवति। तेष्वन्यतमः पदार्थः संशयो वर्तते। दर्शनस्योत्पत्तौ संशयस्य प्रयोजकता अवलोक्यते। पाश्चात्यदर्शनग्रन्थेष्वप्युक्तं दर्शनस्योत्पत्तौ चत्वारः प्रयोजकाः भवन्ति। आश्चर्यं, संशयः,[1] जिज्ञासा, तात्कालिकसमस्याभ्यः असन्तोषश्चेति। आइंस्टीनः, एडिंग्टनः हैण्डेनः, हैंडर्सनः हिल्बर्टः, ह्वाइटहैडश्चेत्यादयः पाश्चात्यविद्वांसः दर्शने संशयस्य महत्त्वं प्रतिपादितवन्तः।[2] सर्वप्रथमं न्यायसूत्रे संशयस्य लक्षणमुपलभ्यते–

"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।[3]"

अनेन सूत्रेण संशयस्य विशेष-लक्षणत्रयं लभ्यते।

1. समानधर्मोपपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्।
2. अनेकधर्मोपपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्।
3. विप्रतिपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्।

विषयस्वरूपानवधारणप्रत्ययत्वमपि संशयस्य सामान्यं लक्षणं भवति। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेत्यस्य अर्थः क्रियते न्यायतात्पर्यटीकाकारेण[4] साधकबाधकप्रमाणाभावाच्च। तथाच साधकबाधकप्रमाणाभावात् विशेषापेक्षायाः

---

1. पाश्चात्यदर्शन डॉ. ब्रह्मस्वरूप अग्रवाल उ.प्र.हि. संस्थान 2002 पृ. 4
2. Introduction to Philosophy Pg-3
3. न्यायसूत्रम् अ. 1 आ. 1 सू. 23
4. न्यायतात्पर्यदीपिका पृ. 9

गृह्यमाणविशेषस्मरणाच्च संशयो जायते। स्थाणुर्वा पुरुषो वा एवं सत्त्वे सति विभागजननात् किं द्रव्यं, गुण: कर्म वा शब्द:। उपलब्ध्यनुपलब्ध्यव्यवस्थानत्वे सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवति इन्द्रियाणि भौतिकानि अभौतिकानि वा। समानविरुद्धकोटिद्वयसाधारणधर्मशब्दस्य तात्पर्य-मुक्तमुदयनाचार्येण ऊर्ध्वत्वं सदृशपरिमाणवत्त्वञ्चानयो: ज्ञानात् संशयो भवति। असाधारणानेकधर्मज्ञानात् संशयो भवति। विरुद्धकोटिद्वयोपस्थापकात् शब्दादपि संशयो जायते। उदयनाचार्यै: उक्तं लक्षणमालायाम्[1]–

यद्यपि शब्दस्य न संशायकत्वं तथापि शब्दात् कोटिद्वयोपस्थितौ मानस: संशयो भवति। रत्नकोशकारनये पक्षप्रतिपक्षपरामर्शसम्बलेनदशायां संशयकारानुमितिर्जायते। इति।

उदयनाचार्येण संशयस्य त्रीणि लक्षणानि निरूपितानि।

1. साधारणधर्मवद् धर्मिज्ञानजन्यत्वं संशयस्य लक्षणम्।
2. असाधारणधर्मवद् धर्मिज्ञानजन्यत्वं संशयस्य लक्षणम्।
3. विरुद्धकोटिद्वयोपस्थापकशब्दजन्यत्वं संशयस्य लक्षणम्।

द्वितीयवाचस्पतिमिश्रेणोक्तम्– यत् प्रमाणैरर्थपरीक्षणं न्याय:। तस्य पूर्वाङ्गत्वं संशयादिषु त्रिषु विद्यते। तेष्वन्यतमत्वात् संशयनिरूपणं भवति। यदा न्यायस्य निरूपणं भवति तस्याङ्गत्वात् पूर्वाङ्गत्वाद् वा संशयस्य निरूपणं क्रियते ग्रन्थकारेण यतोहि न्यायनिष्पादकप्रथमज्ञानगोचरत्वमेव पूर्वाङ्गत्वमिति। यद्यपि पूर्वाङ्गत्वं प्रयोजनस्य दृष्टान्तस्यापि च विद्यते तथापि सन्दिग्धे पदार्थे प्रयोजनस्य दृष्टान्तस्य च चिन्ता जायते न तु प्रयोजनमनुसन्धाय संशयो भवति। अत एव प्रयोजनादुत्कर्षत्वात् संशयनिरूपणं ग्रन्थकारेण कृतमिति द्वितीयवाचस्पतिमिश्रोऽपि प्रतिपादयति। अथवा प्रयोजनस्येच्छा निरूप्यत्वात् इच्छाविशेषस्य च संशयाधीनत्वात् संशयस्य प्रयोजनत: उत्कर्षात् संशयस्य निरूपणं भवति।

एकस्मिन् विषये विरोधिनानाप्रकारकं ज्ञानं संशय: इति। समानधर्मोपपत्ते: संशयो भवति अत्र द्वितीयवाचस्पतिमिश्रै: उक्तम्

1. लक्षणमाला

परस्परनिषेधवदुभयविधिप्राधान्यात्[1] साधारणस्य लक्ष्यतावच्छेदकमूर्ध्वत्वादय: धर्मा: भवन्ति इति तत: संशयो जायते इति। प्रमाणपरीक्षामुख्यत्वेऽपि सर्वपरीक्षासंशयपूर्विका इति निरूपयितुं प्रावृत्तिकक्रमप्राप्तप्रवृत्तिबाधरूप: प्रावृत्तिकक्रमबाध:। स च शाब्द:, आर्थ:, पाठक:, प्रावृत्तिक:, ऐच्छिक:, स्थानिक:, आङ्गिक:, प्राधानिकश्चेति अष्टधा भवति। तत्र शब्दप्रतिपाद्य: शाब्द: अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति। आर्थ: प्रयोजक: अग्निहोत्रं जुहुयात्, यवागूं पचति, अत्र पाठकक्रमेण यवागूपाकस्य चरमत्वेन यदि चरमानुष्ठेयतयैव स्यादिति। पाठपौर्वापर्योपस्थापितन्यायगम्य: क्रम: पाठकक्रम: यथा समिधो यजति। प्रथमप्रवृत्तिनियम्य: क्रम: प्रावृत्तिक: यथा पशूननक्ति, पशूनभ्युक्षति इत्यादय:, ऐच्छिको यथा पशूननक्ती इत्यत्र कुतश्चिदेव पशुतोऽञ्जनमिति। संशयस्य परीक्षायां पूर्वपक्षरूपेण पञ्च सूत्राणि सन्ति। समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद् वा न संशय: इति अर्थात् समानधर्ममात्रात्, अनेकधर्ममात्राद् स्वाध्यवसायरहितात् न संशयो भवति।

"विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च"[2] अर्थात् विप्रतिपत्तिमात्राद् अध्यवसायमात्राद् वा न संशयो भवति। यदि समानधर्मादिभ्य: स्वाध्यवसायरहितेभ्य: कारणेभ्य: संशय: स्यात् तदा तेषां कारणानां सततं विद्यमानत्वात् नित्यसंशय: स्यादिति चेन्न। समानानेकधर्मोपपत्ते: विशेषापेक्ष: संशय:। विप्रतिपत्ते: विशेषापेक्ष: संशय:। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्ष: संशय:। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्ष: संशयो भवति। वल्लभाचार्यैरुक्तम् परस्परविरुद्धार्थावमर्शत्वं संशयस्य लक्षणम्। वर्धमानोपाध्यायैरुक्तम्–

1. एकस्मिन् धर्मिणि विरोधि[3]नानाप्रकारवैशिष्ट्यं संशयविषय: इति।

---

1. न्यायतत्त्वालोक: द्वितीयवाचस्पतिविरचित:।
2. न्याय.सू. अ. 2 आ. 1 सू. 2
3. न्या. ली. पृ. 412

2. अत्र केचन वदन्ति जिज्ञासा[1]जनकत्वे सति ज्ञानत्वं संशयस्य लक्षणम् अस्य लक्षणस्य अपेक्षणीयसंशयेऽव्याप्तिः यद्युच्यते संस्काराजनकत्वे सति ज्ञानत्वं संशयस्य लक्षणं तदा क्वचित् निश्चयेऽतिव्याप्तिरिति। यदि एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशयः तदा वाक्यजज्ञानेऽतिव्याप्तिः। अतः विरोधिनानारूपावच्छिन्नविषयताप्रतियोगिज्ञानत्वं संशयस्य लक्षणम्। न्यायलीलावतीप्रकाशविवृतिकारोऽपि भणति–

एकस्मिन् धर्मिणि विरोधिनानावैशिष्ट्यविषयक[2] ज्ञानत्वं संशयस्य स्वरूपमिति।

शङ्करमिश्रस्तु एकधर्मिकविरोधि[3]नानाप्रकारकज्ञानत्वं संशयस्य लक्षणमिति वदति। उदयनाचार्यैः उच्यते सम्भावना[4] हि सन्देहः इति। एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानत्वं[5] संशयस्य स्वरूपमिति अन्नंभट्टः, न्यायबोधिनीकारस्तु एकधर्मावच्छिन्नविशेष्यतानिरूपिताभावाऽप्रकारकज्ञानत्वं[6] तत्स्वरूपमिति निरूपयति। अन्नंभट्टस्य लक्षणे एकस्मिन् इति पदं न दीयते तदा "घटपटौ" इति ज्ञाने घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वात् अतिव्याप्तिः। विरुद्धपदं न दीयते तदा घटः पृथिवी इत्यत्र एकस्मिन् धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिव्याप्तिः। नानापदानुपादाने "पटत्वविरुद्धघटत्ववान् घटः इत्यत्र अतिव्याप्तिर्दुर्वारैव। एकस्मिन्[7] पुरोवर्तिनि पदार्थे विरुद्धत्वेन व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां सम्बन्धः तदवगाहिज्ञानत्वं संशयपदार्थः। एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारताशालिज्ञानत्वं संशयस्य[8] लक्षणम्। अथवा स्वावच्छिन्नप्रतिबध्यतानिरूपित–

---

1. न्या. ली. पृ. 413
2. न्याय लीलावती पृ. 412
3. न्या. ली. टी. पृ. 412
4. न्या. कु. तृ. स्तबकः
5. तर्कसंग्रहः पृ. 157
6. तर्कसंग्रहः न्या. पृ. 157
7. पदकृत्यम् पृ. 157
8. किरणावली पृ. 158

प्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्ट-विषयिताशालिज्ञानत्वं[1] संशयस्य लक्षणमिति कृष्णवल्लभाचार्योऽपि वदति। संशयं प्रति कारणानि तु अधोलिखितानि भवन्ति।

संशयत्वावच्छिन्नकार्यतानिरूपितोभयसाधारणधर्मज्ञानत्वावच्छिन्न-कारणतावत्त्वं संशयं प्रति कारणं भवति। एवमसाधारणधर्मज्ञानमपि संशयं प्रति कारणं भवति। विप्रतिपत्तिवाक्यजन्यकोटिद्वयज्ञानमपि च संशयं प्रति कारणं भवति इति कृष्णवल्लभाचार्यैरुक्तमिति तत्र कारिकावली कारैरुक्तमपि च–

**स संशयो मतिर्या स्यादेकत्राभावभावयोः।[2]**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्।।**

अत्र न्यायसिद्धान्तमुक्तावल्यामुक्तं विश्वनाथेन "एकधर्मिकविरुद्ध-भावाभावप्रकारक[3] ज्ञानं संशयः। दिनकरीकारमते तु "स्वीयैककोटिप्रकारता-वच्छिन्नप्रतिबध्यता[4]निरूपितप्रतिबन्धकतावच्छेदकीभूतापरकोटिप्रकारता-शालिज्ञानत्वं संशयस्य लक्षणमिति। यत्तु मते संशयत्वं[5] जातिरस्ति अतः तन्मते संशयत्वजातिमत्त्वं संशयस्य लक्षणम् तन्न चाक्षुषत्वादिना सङ्कर-प्रसङ्गात्। विषयस्य संशये प्रामाण्यसंशयः, अप्रामाण्यसंशयश्च कारणं भवति। व्याप्यसंशयादपि व्यापकसंशयो भवति। संशये धर्मिज्ञानं धर्मीन्द्रिय-सन्निकर्षो वा कारणं भवत्येव। संशयस्य यल्लक्षणं गौतमेन कृतं तस्य विवरणं दिनकरभट्टः इत्थं करोति। कोटिद्वयसहचरितधर्मज्ञानात् एकधर्मिक-[6] भावाभावप्रकारकत्वरूपविशेषान् ज्ञानं संशयः। अनेकस्मात् सपक्षविपक्ष-व्यावृत्तो धर्मः अनेकधर्मस्तयोः ज्ञानात् संशयो जायते। प्रामाण्यस्य[7]

---

1. किरणावली टीका पृ. 158
2. कारिकावली ।।130।। पृ. 477
3. न्या.सि.मु. पृ. 477
4. न्या.सि.मु. दिनकरीटीका पृ. 477
5. दिनकरीटीका पृ. 477
6. दिनकरीटीका पृ. 479
7. तदेव पृ. 479

प्रामाण्यविरोधिभ्रमत्वस्य अव्यवस्थातः एकधर्मिकभावाभावप्रकारकत्व-रूपविशेषवज्ज्ञानं संशयपदार्थः इति। प्रामाण्यसंशयजन्यः अथ च भ्रमत्वसंशयजन्यः विषयसंशयो भवति। दिनकरीदिशा विशेषापेक्षत्वे सति विमर्शत्वमेव संशयस्य लक्षणम्, एकधर्मितावच्छेदकविशिष्ट[1]विशेष्यक-त्वावच्छिन्नविरोधावगाहिभावत्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्न-प्रकारताशालिज्ञानत्वं संशयस्य लक्षणं बोध्यमिति।

1. दिनकरी पृ. 477

# न्यायदृष्ट्या संशयस्वरूपं तस्य मोक्षोपयोगित्वचिन्तनम्

डॉ० शिवशंकरमिश्रः

विशेषतः संशयविषये मम शोधपत्रे विद्यते पक्षत्रयम्, प्रथमं तावत् संशयस्य महत्त्वम् इतिवृत्तं च द्वितीयं संशयस्य स्वरूपम्, अन्तिमं, तावत् संशयज्ञानस्य कथं मोक्षोपयोगित्वमिति। संशयस्य का आवश्यकता? किमर्थं संशयज्ञानमित्यादि जिज्ञासानां समाधानाय प्रथमं संशयस्य. महत्त्वमुपवर्ण्यते–महर्षिणा गौतमेन न्यायदर्शने सर्वप्रथमं निःश्रेयससाधनभूतं षोडशपदार्थात्मकं सूत्रमभिहितम्। प्रमाण–प्रमेय–संशयप्रयोजन............ ..निःश्रेयसाधिगमः।[1] अत्र तृतीयः पदार्थ संशयः, संशयस्य लक्षणं एकस्मिन् धर्मिणि विरुद्ध नानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। न्यायशास्त्रस्य परमप्रयोजनं आत्यन्तिकैकविंशति दुःखध्वंसो मोक्षः। अतएव सूत्रकारः सूत्रान्ते निग्रहस्थानानां तत्वज्ञानानिःश्रेयसाधिगमः इति भाषते। अत्र निःश्रेयसे संशयस्य किं प्रयोजनमिति पदे–पदे प्रश्नोत्तरमार्गेण संशयस्य अवतारस्तु भवत्येव कथं तस्य षोडशपदार्थान्तर्गतनिरूपणं इति शंका स्वयमेव भाष्यकारेण भाष्यभूमिकायां ससमाधानं विहिता विद्यते– तथाहि संशयस्य पृथक् वचनमनर्थकम् संशयादयो यथासंभवम् प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति। सत्यमेतद् मास्तु चतस्रो विद्या पृथक्प्रस्थानाः। प्रमाणभूतं अनुग्रहायोपदिश्यन्ते। यासां चतुर्थीयं आन्वीक्षिकी न्यायविद्या तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः तेषां पृथग्वचनमन्तरेणाध्यात्मविद्या मात्रमियं स्यात् यथोपनिषदः तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते[2]। तात्पर्यमिदं प्रतिभाति केवलमात्ममोक्षोपदेशार्थं एव यदियं विद्या भवेत्तर्हि आत्मशरीरेन्द्रियार्थ–बुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति प्रमेयमात्रनिरूपणं

भवेत् अपितु इयं न्यायविद्या आन्वीक्षिकी विद्या अनुमानप्रमाणप्रधाना अस्यां प्रमाणप्रमेयादि षोडशपदार्थानां व्यासेन निर्वचनविषयो विद्यते एतदर्थं संशयादीनां पृथक् संस्थापनं दरीदृश्यते। विरुद्धनानाधर्मावगाहि ज्ञानं संशयः, सकलधर्मार्थकाममोक्षपुरुषार्थाणां साधनप्रवृत्तिप्रतिबन्धकः विद्यते। संशयस्य सर्वात्मना यावन्निवृत्तिः न भवति तावत् सकलाः लौकिकपारलौकिकसिद्धयः विफलाः भवन्ति, अतः अस्य संशयस्य निराकरणाय सकलतन्त्रेषु प्रमिति ज्ञानं निरूपितमस्ति। यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः[3], चोदनालक्षणोऽर्थो धर्मः[4], दुःखत्रयाभिघाताज्जिज्ञासा[5], जन्माद्यस्य यतः[6] आदितन्त्रेषु सर्वत्र संशयनिवृत्तिपूर्वकं साधनसिद्धिप्रतिपादनं विद्यते। अभावज्ञानं प्रति प्रतियोगिज्ञानं यथाऽनिवार्यं भवति तथैव सकलेष्टसिद्धये सकलसंशयनिराकरणमावश्यकं दर्शितं विद्यते। अतः उक्तम्–

**अनेकसंशयच्छेदिपरोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।**[7]

**अज्ञश्चाश्रद्दधानश्च, संशयात्मा विनश्यति।**
**नायं लोकोऽस्ति न परो न सुखं संशयात्मनः।।**

**योगसन्यस्तकर्माणं ज्ञानसन्छिन्नसंशयम्।**
**आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय।।**

**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।**
**छित्वैनं संशयं योगमातिष्ठोतिष्ठ भारत।।**[8]

इत्यादिषु सर्वत्र संशयस्य विनाशाय उपदेशाः उपलभ्यन्ते। स च संशयः यथार्थज्ञानद्वारा विनष्टः भवति यज्ञादिकर्मसु निःश्रेयससिद्धये अध्यात्मसाधनेषु लौकिक त्रैवर्गिक धर्मार्थकामसिद्धये सर्वत्र संशयनिवृत्तिपूर्वकं यथार्थपदार्थज्ञानस्य परमावश्यकता विद्यते। अतः संशयस्य निराकरणाय संशयपदार्थत्वेन प्रमुखरूपेण संस्थापितः।

सूत्रे संशयस्य पदार्थरूपेण उल्लेखः आन्वीक्षिकी विद्यायामनुमानप्रधानायां पदे–पदे संशयस्य निराकरणाय आवश्यकतायाः

द्योतकः प्रतीयते। आन्वीक्षिकीविद्यायाः महत्त्वं विदधत भाष्यकारः निगदति–

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता।।**

अत्र सर्वविद्यानां प्रदीपसम्पादने सर्वकर्मणामुपायनिर्धारणे सर्वधर्माणामाश्रयसम्पादने च अनुमानमार्गे पदे–पदे संशय संकुलावृत्तिर्भवति, तस्य निर्मूलनं यथार्थज्ञानेन सम्पादनीयमिति द्योतनाय संशयपदार्थ निर्धारणमिति। वाचस्पतिमिश्रेणापि संशयस्य महत्त्वं प्रतिपादयता प्रोक्तम्– **संशयस्य कार्यं जिज्ञासा,** अर्थात् तदेव ज्ञानं संशयः येन जिज्ञासा उदेति। यस्मिन् विषये संशयो भवति तं ज्ञातुं जनाः उत्सुकाः भवन्ति, तं ज्ञातुमिच्छन्ति अवगते सति, निश्चिते वा सति पुनः तदेव ज्ञातुं न भवति कदाचिदपीच्छा, अतः एतेन सिद्धयति संशयदशायामेव जिज्ञासायाः सम्भवः न तु निश्चयदशायामतः जिज्ञासाजनकत्वेनापि संशयस्य परमोपयोगित्वं प्रसिद्धयति।

पाश्चात्यदर्शने संशयवादः "स्कैप्टिसिज्म" (Scepticism) इति शब्देन परिभाषितः। संशयवादस्य प्रारम्भः ख्रिष्टाब्दात् प्राक् चतुःशताधिकचत्वारिंशत् वर्षपूर्वं सञ्जातः। यूनानदेशस्य सोफिस् इति नाम्ना प्रसिद्धाः तर्कप्रधानविद्वांसः अस्य संशयवादस्य संस्थापकाः इति प्रसिद्धा अवधारणा, परञ्च एतेषां संशयवादः सामान्यरूपेण प्रसिद्धः, सुव्यवस्थिततया अस्य सिद्धान्तत्वेन स्वीकृतिः ख्रिष्टाब्दात् प्राक् त्रिशतवर्षपूर्वं पिरो (Pirrho) नामकेन प्रख्यातविचारकेण प्रदत्ता। एतन्मते स्पष्टतया इदं लिखितं यद् वास्तविकं ज्ञानं नहि कथमपि सम्भवमपितु सर्वथा असम्भवमिति।

मध्यकालीनपाश्चात्यसंशयवादिषु विद्वत्सु पैस्कल (Pascal) महोदयः सर्वप्रसिद्धः संशयवेत्ता। तथा च आधुनिक संदेहवादिषु विद्वत्सु डेविड ह्यूम (David hume) दार्शनिकः सर्वश्रेष्ठत्वेन प्रसिद्धः। पैस्कलमहोदयानां मते जगद्विषयकः कश्चनापि सिद्धान्तः निश्चितः संतोषप्रदः च इति बुद्धया न हि प्रतिपादयितुं भाव्यते। ह्यूम मते तु ऐन्द्रियानुभवातिरिक्ते यस्मिन् कस्मिन्नपि विषये निश्चितत्वेन इदमित्थं

इति तया प्रतिपादने न हि मनुष्याणामधिकारः। केचन चिन्तकाः प्रसिद्धजर्मनदार्शनिकं काण्टमहोदयं अपि संशयवादिरूपेण प्रतिष्ठापयन्ति, परञ्च काण्टमहोदयानां मते वस्तूनां वास्तविकं ज्ञानं अज्ञेयं बुद्ध्या अगम्यमिति प्रसिद्धं न तु संदेहास्पदमिति अतः स तु अज्ञेयवादी दार्शनिकः न तु संदेहवादी इति केषांचिन्मतम्।

भारतवर्षस्य कतिपयसंदेहवादिनां वर्णनं श्रामण्यफलसूत्रादि बौद्धग्रन्थेषु प्राप्यते। यथा **"अजितकेसकंवली"** नामकस्य विचारकस्य सुप्रसिद्धमिदं कथनम्-- यथार्थज्ञानं नहि कथमपि सम्भवमिति। एवमेव तत्वोपप्लवसिंहनामक पाण्डुलिपि लेखकः श्रीमान् जयराशिः एतावत्पर्यन्तं प्रवदति यत् प्रत्यक्षप्रमाणमपि नहि असंदिग्धज्ञानसाधनम् तर्हि किमुत अनुमानादिप्रमाणेन।

संशयः सर्वेषु भारतीयदर्शनसम्प्रदायेषु अयथार्थज्ञानरूपेण वर्णितो दृश्यते। अयथार्थानुभवस्त्रिविधः संशय–विपर्यय–तर्क भेदादित्यन्नंभट्टः, आचार्य विश्वनाथपादश्च।[९] प्रशस्तपादानां भांष्करमिश्राणां च मते स संशयः, विपर्ययः, अनध्यवसायः, स्वप्नश्चेति भेदेन चतुर्विधः। अयथार्थानुभवो मिथ्याज्ञानं, संशयः, स्मृतिः, संकल्पः, तर्कः स्वप्नश्चेति भेदेन षड्विधः इति केषांचिन्मतम्। वस्तुतः संशयः अयथार्थज्ञानभेदः इति प्रायशः समेषां दार्शनिकानां मतम्।

संशयः (सं+शी+अच्) सन्देहः इत्यमरः। तस्य लक्षणं यथा–

**सं संशयो भवेद् या एकत्राभावभावयोः।**
**साधारणादि धर्मस्य ज्ञानं संशयकारणम्।।**[९]

**(भाषापरिच्छेद)**

संशयं लक्षयति संशत इति। एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः इत्यर्थः। साधारणेति उभयसाधारणो यो धर्म्मस्तज्ज्ञानं संशयसाधनम्। यथा उच्चैस्तरत्वं स्थाणुत्वं साधारणं ज्ञात्वा अयं स्थाणुर्न वेति संदिग्धे। एवमसाधारणज्ञानं संशयकारणम्। यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे। विप्रतिपत्तिस्तु

शब्दोऽनित्यो न वेति शब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्। किन्त्वत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एवेति। एवं ज्ञानेऽप्रामाण्यसंशयाद्विषयसंशयः। एवं व्याप्यसंशयादपि व्यापकसंशयः इत्यादिकं बोध्यम्। किन्तु संशये धर्मिज्ञानं धर्म्मीन्द्रियसन्निकर्षो वा कारणमिति तट्टीका सिद्धान्तमुक्तावली।

संशयविषये प्रायशः सर्वेषां दार्शनिकानां समाना मतिः दृश्यते। प्रभाकरमतिरिच्य सर्वेऽपि दार्शनिकाः संशयं स्वीकुर्वन्ति। संशयलक्षणस्य स्वरूपं आपाततः सर्वेषु दर्शनेषु समानमेव केवलं निरूपणे शब्दानुपूर्व्याः प्रभेदो दृश्यते, यथा– समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य–व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः इति न्यायसूत्रकारः महर्षिगौतमः।[10]

* एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः इत्यन्नंभट्टः।[11]

* **स संशयोमतिर्या स्यात् एकत्राभावभावयोः।**
**साधारणादि धर्मस्य ज्ञानं संशयकारणम्।।**[12]

आचार्य विश्वनाथः।

* एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः इति केशवमिश्रः।[13]

* तत्रानवधारणज्ञानं संशयः।[14]

* पदजन्यधर्मिक कोटिद्वय तदुभयविरोधिज्ञान संशयात्मक योग्यताज्ञानसहितात् शब्दादाहत्यैव संशयः इति रघुनाथशिरोमणिकृतपदार्थत्वनिरूपणे।

स च संशयः तर्कभाषादृष्ट्या त्रिप्रकारकः –

1. विशेषादर्शने सति समानधर्मदर्शनजः
2. विशेषादर्शने सति विप्रतिपत्तिजः
3. विशेषादर्शने सति साधारणधर्मजश्चेति

न्यायसूत्रमतानुसारेण तु अयं संशयः पंचप्रकारकः—

1. समानधर्मोपपत्तिमूलकः
2. अनेकधर्मोपपत्तिमूलकः
3. विप्रतिपत्तिमूलकः
4. उपलब्ध्यव्यवस्थामूलकः
5. अनुपलब्ध्यव्यवस्थामूलकश्चेति।

एवमेव भासर्वज्ञमतानुसारेणापि समानधर्म—अनेकधर्म—विप्रतिपत्ति—उपलब्धि—अनुपलब्धिकारणभेदात् पंचधा भिद्यते।

एतेषां विविधसंशयप्रकाराणामुदाहरणमेवं प्रसिद्धम्—

* विशेषादर्शने सति समानधर्मदर्शनजः संशयः— किमयं स्थाणुर्वा पुरुषो वेति।

* विशेषादर्शने सति विप्रतिपत्तिजः संशयः— शब्दो नित्यः स्यादनित्यो वा।

* विशेषादर्शने सति असाधारण धर्मजः संशयः— नित्यादनित्याच्च व्यावृत्तेन भूमात्रासाधारण्येन गन्धत्वेन विशेषमपश्यतो भुवि नित्याऽनित्यत्वसंशयः भूः नित्या अनित्या वा इति।

* समानधर्मोपपत्तिमूलकः संशयः— किमयं स्थाणुः पुरुषो वा

* अनेकधर्मोपपत्तिमूलकः संशयः— शब्दो नित्यः स्याद् अनित्यो वा

* विप्रतिपत्तिमूलकः संशयः— किमिन्द्रियाणि भौतिकानि आहोस्विदभौतिकानीति।

* उपलब्धिमूलकः— किं सदुदकमुपलभ्यते उतासदिति।

* अनुपलब्धिमूलकः— किं विद्यमानः पिशाचो नोपलभ्यते किं वा अविद्यमान इति।

वस्तुतः समेषां संशयलक्षणानां तद्भेदोपभेदानां च विमर्शानन्तरं एष एव निष्कर्षः सम्प्राप्यते यद्– एकस्मिन् धर्मविशिष्टे पदार्थे एककालावच्छेदेन मिथो विरुद्धयोः, भावाभावयोः मिथो भिन्नयोः भावयोश्च ज्ञानं यदा उत्पद्यते तदा संशयस्यावकाशः इति संक्षेपतः संशयविषयकः सारवचः।

संशयज्ञानस्य मोक्षसिद्धौ कथं साधनत्वं? कथंच संशयज्ञानेन मोक्षसिद्धिः? इति जिज्ञासायाः प्रशमनाय संशयज्ञानस्योपयोगित्वं प्रदर्शयति। एकविंशतिदुःखध्वंसात्मक मोक्षलाभाय यथा प्रमाणस्य प्रमेयस्य च ज्ञानमपेक्षितं भवति तद्वदेव संशयनिराकरणपूर्वकनिश्चयप्रतिपादन द्वारा संशयज्ञानस्यापि मोक्षहेतुता सिद्ध्यति। यतः यावत् संशयस्य निराकरणं न संभवति तावन्निश्चयज्ञानमपि न कथमपि उपलभ्यते, अथ च असति संशयस्य निराकरणे कुत्रापि यज्ञधर्मानुष्ठानादिषु पुरुषस्य प्रवृत्तिः न कथमपि सम्भवति, अतः संशयस्यावश्यकता न हि संशयसंग्रहणाय सम्भवति अपितु संशयनिरासाय संशयस्यापेक्षा। यथा लोकजीवने अस्माभिः स्वमित्रस्य स्वशत्रोश्च ज्ञानमवश्यं करणीयं भवति, अर्थात् कः अस्माकं शत्रुः कश्च मित्रमिति ज्ञानमत्यन्तमपेक्षितं भवति स्वजीवन संरक्षणाय। शत्रोर्ज्ञानं शत्रुनिवारणार्थं शत्रुविनाशार्थं चापेक्षितं भवति मित्रस्य च ज्ञानं मित्रलाभार्थं प्रीतिसंवर्धनार्थं च सिद्ध्यति। एवमेव संशयस्यापि पदार्थत्वेनोपदेशः संशयः निराकरणपूर्वकतत्वज्ञानलाभाय कृतः न तु संशयसंग्रहणाय इति विचारः। वस्तुतः स्वरूपत्वेन संशयः बाधकः यथा इदं कार्यमस्माकं कल्याणाय अस्ति न वा, धर्मेण ऊर्ध्वगमनं भवति न वा, यज्ञेनाभीष्टसिद्धिः सम्भवति न वा, मातृ–पितृ–गुरु–देवपूजनेन भद्रं भविष्यति न वा, यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिः योगसिद्धिः भविष्यति न वा यद्येवंविधः सर्वत्र संशयो विद्यते चेत् तर्हि धर्म–यज्ञे–पूजनादौ च जनानां प्रवृत्तिः नहि कथमपि भविष्यति, अतः उक्तस्थलेषु संदेहस्य निराकरणं नितान्तमपेक्षितं अर्थात् संशयस्य तत्वज्ञानेन संशयनिवृत्तिद्वारा निश्चयज्ञानेन प्रवृत्तिः सम्भविष्यति। धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण, यज्ञेन नूनमभीष्टसिद्धिः, मातृ–पितृ–गुरु–देवपूजनेन सिद्ध्यन्ति मनोरथाः इत्यादि वचनेषु नितान्तं

विश्वासो अपेक्षितः। एवं सति तदाचरणे जनाः प्रवृत्ताः भविष्यन्ति, एवमेव संशयज्ञानस्यापि मोक्षविषये सन्देहनिवारणद्वारा विश्वाससम्पादनद्वारा मोक्षजनकत्वमिति मे विचारः।

सारांशतः संशयवादिनो यत्किमपि वदन्ति चेत् वदन्तु नाम, परंच संशयात्मिका मनःस्थिति नहि सुखसम्पादिका सम्भवति तदुक्तं गीतायाम्– न सुखं संशयात्मनः। एवमेव संशयात्मा विनश्यति इत्यादि वचनेनापि संशयवादः अग्राह्यः इति द्योतितः। परंचेदमपि न हि विस्मरणीयं यदपरीक्षितरूढिपरम्परागतविचाराणामन्धानुकरणं विचारविकासाय सर्वथा बाधकं भवति अतः यदा–कदा सामान्यरूपेण स्वीकृतमपि तथ्यं संदेहबुद्ध्या परीक्षणं ज्ञानवृद्धये निश्चयाय च परमावश्यकं यथोक्तं भामतीकारेण–जिज्ञासा संशयस्य कार्यमिति। काण्टमहोदयेनापि उद्घोषितम् यद् ह्यूमप्रतिपादितेन संशयवादेन वैचारिकरूढिगतनिद्रातः अहं जागृतः। अतः तत्वनिर्णयार्थं साधनत्वेन संशयस्य ज्ञानं परमावश्यकमिति।

## सन्दर्भ–सूची

1. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्प–वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः। न्यायसूत्रम् 01/01/01
2. वात्स्यायनभाष्यम् 01/01/01
3. वैशेषिकसूत्रम् 01/01/02
4. पूर्वमीमांसासूत्रम् 01/01/02
5. सांख्यकारिका 01
6. ब्रह्मसूत्रम् 01/01/02
7. हितोपदेशः
8. गीता– 4/40–42
9. तर्कसंग्रहः, न्यायसिद्धान्तमुक्तावली 130
10. न्यायसूत्रम् 02/01/01
11. तर्कसंग्रहः
12. कारिकावली का.सं. 130
13. तर्कभाषा
14. न्यायसारः , सप्तपदार्थी

# न्यायदर्शने संशयस्वरूपम्

डा. सत्यमकुमारी

"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[1] इति आत्मनो वाऽरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विज्ञातं भवतीति बृहदारण्यकोपनिषदि महर्षियाज्ञवल्क्यस्यायमुपदेशः भारतीयदर्शनानामाधारमित्यवधार्यते। दृश्यते ज्ञायते आत्मादितत्त्वमनेन इति दर्शनम्। इदं च दर्शनं नास्तिकास्तिकनाम्ना द्विविधं वेदप्रामाण्यानभ्युपगन्तृत्वेन दर्शनस्य नास्तिकत्वख्यातिः। वेदप्रामाण्याभ्युपगन्तृत्वेन दर्शनस्यास्तिकत्वप्रसिद्धिः। तत्र चार्वाकजैनबौद्धाख्यानि नास्तिकदर्शनानि इत्युच्यन्ते। न्याय-वैशेषिक सांख्ययोगमीमांसावेदान्ताभिधेयानि आस्तिकदर्शनानि निगद्यन्ते। तत्र चतुर्दशविद्यावर्णनक्रमे न्यायविस्तरशब्देन गौतमीयन्यायवैशेषिकदर्शनमेव समुद्दिष्टमस्ति न तु बोद्धजैनन्यायदर्शनानि तत्र उपदिष्टानि। वेदस्य साहचर्यदर्शनेन वैदिकानामेव दर्शनानां तत्र ग्रहणस्य औचित्यात्। यतोहि' समस्ताः चतुर्दशविधाः विद्याः वेदावलम्बिन्यः साक्षात् परम्परया वा परमपुरुषार्थस्य मोक्षस्य प्रवर्त्तिकाः भवन्ति। तत्रान्वीक्षिकीं निब्रुवता वात्स्यायनेन न्यायसूत्रभाष्ये तावदिदमुक्तं यत् प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा,[2] तया प्रवर्त्तते या विद्या सान्वीक्षिकी। इयमेव न्यायविद्यान्यायशास्त्रं, तर्कशास्त्रं च। यतो विधेयपदार्थशास्त्रम् अनयैव पदार्थाः परिच्छेद्यन्ते। पदार्थपरिच्छेदपरतन्त्रमेव च सर्वं कार्यजातमतो विद्येयं सर्वविद्यानां मूर्धन्यभूता। यथोक्तमाचार्यवात्स्यायनेन—

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता।।**[3] इति

तदेव विद्याया अस्या विधेयं प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणं तच्चप्रमाणैरर्थपरीक्षणं, स एव न्यायः। अनेन विधिना परीक्ष्य निर्णीता अर्था

एव आन्वीक्षिकीशास्त्रस्य न्यायशास्त्रस्य तर्कशास्त्रस्य वा प्रतिपाद्याः सिद्धान्तभूता विषयाः। न्यायशास्त्रप्रणेत्रा भगवता गौतमेन प्रमाणादिषोडशपदार्थेषु संशयः परिगणितः।[4] समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय,[5] इति अक्षपादमहर्षिणा प्रतिपादितम्। एकस्मिन् पदार्थे भावाभावात्मकविविधकोटिकं ज्ञानं संशय[6] इति विश्वनाथपञ्चानन: तदुत्पत्तिश्चोभयसाधारणधर्मदर्शनाद्भवति। संशयो हि जिज्ञासामुत्पादयतीति भवति न्यायाङ्गं मोक्षं प्रति सहायकश्च। अतएव भगवता गौतमेन प्रमाणादिषोडशपदार्थमध्ये अयं परिगणितः।

एकस्मिन् धर्मिणि भासमानविरुद्धानेकाकारावगाहिज्ञानत्वं संशयत्वम् अयं स्थाणुर्वा पुरुषो वा इत्याकारसंशये समन्वितं भवति, तथाहि एकस्मिन् धर्मिणि पुरोवर्त्तिपदार्थे भासमानविरुद्धानेकाकारौ स्थाणुत्वपुरुषत्वे तदवगाहि-ज्ञानं, अयं स्थाणुर्वा पुरुषो वा इत्याकारकज्ञानं, तस्मिन् ज्ञानत्वस्य सत्त्वात्। ज्ञानमित्युक्ते अयं घट इति ज्ञाने अतिव्याप्तिः अतो अनेकाकारावगाहीति ज्ञाने विशेषणं देयम्, अयं घट इति ज्ञाने एकाकारावगाहित्वेनानेका-कारावगाहित्वाभावान्नातिव्याप्तिः अनेकाकारावगाहिज्ञानत्वमित्युक्तेः स्थाणुपुरुषौ घटपटस्तम्भा इत्यादिके समूहालम्बनज्ञाने अतिव्याप्तिः तत्र अनेकाकाराव-गाहिज्ञानत्वस्य सत्त्वात्, तत्परिहारार्थं एकस्मिन् धर्मिणीति वक्तव्यं, समूहालम्बनात्मकज्ञानस्यानेकधर्मिकत्वेन एकधर्मिकत्वाभावान्नातिव्याप्तिः। उक्तं च – अभिनवामृते, तथाहि एकधर्मिकानेककोटिकः यथा अयं स्थाणुर्वा पुरुषो वा अनेकधर्मिक एककोटिको यथा किमयं ब्राह्मणः, अनेकधर्मिक अनेककोटिकः, यथा कालो वा कारणं राज्ञो राज्ञा वा कालकारणमित्यादिकः, तथा च अनेकधर्मिक संशये एकधर्मिकत्वाभावाद् अव्याप्तिः, तथा अनेक धर्मिकएककोटिक संशयेऽपि भासमान-विरुद्धानेकाकारावगाहित्वाभावादव्याप्तिश्च। अतः इदं संशयसामान्यलक्षणं न, किन्तु विशेषलक्षणं ज्ञेयम्।

ननु संशयलक्षणे एकस्मिन्धर्मिणीति मास्तु, किन्तु भासमान विरुद्धानेकाकारनिष्ठप्रकारतानिरूपित विशेष्यताकत्वमित्येव संशयलक्षणमस्तु, तथा च एकधर्मिकसंशये विशेष्यताकत्वस्य सत्त्वान्नाव्याप्तिरिति चेन्न, सम्भावनारूपे, बाह्यप्रदेशे अनेन पुरुषेण भाव्यमित्यन्यतरकोटिप्रधानरूप-

संशये, तथा अनेकधर्मिकै एककोटिकसंशये च भासमानविरुद्धानेकाकाराव-गाहित्वाभावादव्याप्तिर्भवत्येव। अतः संशय इत्युक्तं भवति, सर्वसंशयेष्वपि अस्य लक्षणस्य सत्त्वेन नाव्याप्त्यादिदोषावकाशः।

एकस्मिन् धर्मिणि अनेकाकारावगाहिज्ञानत्वं इत्येवोक्ते वृक्षः शिंशपा घटो द्रव्यमित्यत्र अतिव्याप्तिः। तत्र वृक्षधर्मिकवृक्षत्वशिंशपात्वानेकाकारावगाहि ज्ञानत्वस्य सत्त्वाद् अतिव्याप्तिः तद्वारणाय विरुद्धेति, वृक्षः शिंशपा इति ज्ञाने आकाराणाम् विरुद्धत्वात्, विरुद्धानेकाकारावगाहिज्ञानत्वमित्येवोक्ते इदं रजतमिति भ्रमे गतं तत्र एकस्मिन् धर्मिणि शुक्तौ रजतत्वानेकाकाराव-गाहिज्ञानत्वस्य सत्त्वाद् अतो भासमानेति विशेषणं देयं, इदं रजतमिति भ्रमे इदंत्व-रजतत्वयोर्विरोधसत्त्वेऽपि विरोधस्य भासमानत्वाभावान्नातिव्याप्तिः,

यद्यपि संशयस्य लक्षणं शब्दशास्त्राचार्यैर्न स्वातन्त्र्येण क्वचिदपि उक्तम्, तथाऽपि संशयमापन्न इति सूत्रयत्।[7] आचार्यस्य तत्र सम्मतमेवेति लोकप्रसिद्धे तल्लक्षण एव तात्पर्यमनुमीयते। तच्च लक्षणम् 'एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञान संशयः'[8] यथा स्थाणुर्वा पुरुषो वेति। एकधर्मिनिष्ठविशेष्यतानिरूपकं परस्परविरुद्धनानाधर्मनिष्ठप्रकारतानिरूपकं च ज्ञानं संशय इत्यर्थः। एवञ्च एकधर्मावच्छिन्नविशेष्यतानिरूपकत्वे सति ज्ञानत्वं संशयलक्षणम्। श्री नागेशभट्टेनापि उद्द्योते विरुद्धाऽनेककोटि-विषयकज्ञानस्यैव संशयत्वमुक्तम्।[9]

हेमचन्द्राचार्येण "अनुभयत्रोभयकोटिस्पर्शी प्रत्ययः संशयः इति सूत्रितम्, तद्व्याख्यानभूतां टिप्पण्याम् उभयेत्यस्योपलक्षणत्वमुक्त्वा त्र्यादिकोटिस्पर्शी अपि संशयो गृहीतः।[10]

किञ्च, सर्वात्मना शेते इवात्माऽन्तःकरणं वा यस्मिन् ज्ञाने सति तज्ज्ञानं संशय इत्युच्यते।[11] यथा अन्धकारे दूरादूर्ध्वाकारवस्तूपलम्भात् साधकबाधकप्रमाणाभावे सति स्थाणुर्वा पुरुषो वा अयमिति ज्ञानम्। एषा व्युत्पत्तिरपि तादृशे संशये अनुकूला वर्तते। प्रमेयकमलमार्त्तण्डे, जैनदर्शनग्रन्थेऽपि विरुद्धाभावद्वयकोटिकः संशयः प्रदर्शितः, सोपपत्तिसंशयस्वरूपमपि साधितम्। तत्र हि सर्वप्राणिनां चलितप्रतिपत्तिरूपः संशयः स्वात्मसंवेद्यः। प्रत्यक्ष सिद्धस्याऽप्पलापे सुखादेरप्यपलापः प्रसज्येत सर्वानुभवविरुद्ध इत्याद्यर्थक-

मुक्तम्।[12]

'श्रीनिवासतीर्थीये एवमुक्तं – न च संशयस्यापि धर्म्यंशे अवधारणत्वेन तत्रावधारणभिन्नत्वं वा अवधारणत्वानधिकरणत्वं वा नास्तीत्यसम्भव इति वाच्यं, प्रकारावधारणज्ञानत्वस्याभिमतत्वात्, अवधारणत्वं च निश्चयत्वं, तच्च व्यवस्थितकोटिकत्वमतो नात्र कश्चित् क्षुद्रोपद्रव इति। तथा च संशये धर्म्यंशेऽवधारणत्वेऽपि प्रकारांशे व्यवस्थित-कोटिकत्वरूपावधारणत्वाभावादवधारणत्वेऽपि प्रकारांशे व्यवस्थितकोटिकत्व-रूपावधारणत्वाभावादवधारणभिन्नत्वस्य तत्रापि सत्त्वेन नासम्भव इत्यभिप्रायः।'

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।[13] समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति स्थाणुपुरुषयोः समानधर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टं च तयोर्विशेष बुभुत्समानः किंस्विदित्यन्यतरं नावधारयति, तदनवधारणं ज्ञानं संशयः। एक किं स्विदित्यन्यतरं नावधारयति, तदनवधारणं ज्ञानं संशयः। एक-धर्मिकनानाविरुद्धधर्मप्रकारकज्ञानत्वरूपं कोटिद्वयविरोधिज्ञानसामग्रीसमाजाधीनं च संशयत्वं नीलघटत्ववन्न कार्यतावच्छेदकम्। एवं संशयत्वशून्यज्ञानत्वरूप निश्चयत्वमपि नीलत्वशून्यघटत्ववत्तथेति, नैयायिकाः संशयं प्रति पंचकारणानि वदन्ति–

1. साधारणधर्मः स्थाणुपुरुषयोः साधारणं ऊर्ध्वतालक्षणं धर्म-पुरोवर्त्तिन्युपलभ्य स्थाणुपुरुषौ स्मृत्वा विशेषजिज्ञासायां स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकं शिरःपाण्यादिकं च अनुपलभमानस्य पुंसो दोलायमानं संशयज्ञानमुत्पद्यते– किमयं स्थाणुर्वा पुरुषो वेति, अयं च साधारणधर्मजन्य संशयः।

2. असाधारणधर्मजन्यसंशयो यथा– शब्दे आकाशविशेषगुणत्वम-साधारणधर्ममुपलभमानस्य निर्णायकमजानतः संशयो भवति किमयं शब्दः नित्यो वा अनित्यो वेति।

3. विप्रतिपत्तिजन्यसंशयो यथा– इन्द्रियेषु वैशेषिकसांख्ययोः भौतिकत्वाभौतिकत्वविप्रतिपत्तिं पश्यतो निश्चायकमजानतः पुरुषस्य सन्देहो भवति किमिन्द्रियाणि भौतिकानि उत अभौतिकानीति।

4. उपलब्धिजन्यसंशयो यथा कूपखननान्तरं जलोपलब्धौ सत्यां निश्चायकाभावे संशयो जायते– किं प्राक् सदेवोदकं कूपखननेनाभिव्यक्तं उपलभ्यते उत प्रागविद्यमानमेवोदकं कूपखननेनोत्पन्नमिति।

5. अनुपलब्धिजन्यसंशयो यथा– अस्मिन्वटे पिशाचोऽस्तीति वार्त्तां श्रुतवतो हि वट समीपं गतस्य पिशाचानुपलब्धौ सत्यां निर्णायकाभावे संशयो भवति। किं विद्यमान एव पिशाचो अर्न्तधानशक्त्या नोपलभ्यते उत अविद्यमान एवेति।

उपलब्ध्यनुपलब्ध्योः साधारणधर्मजन्यसंशय एवान्तर्भावात् त्रीण्येव संशयकारणानीति नवीननैयायिकाः निगदन्ति। तदित्थम्–

उपलब्धिर्हि सतामेव घटादीनां प्रदीपारोपणेन द्रष्टा सतां घटादीनां च कुलालाव्यापारानन्तरं द्रष्टा। तथा च उपलब्धेः सदसत्साधारण्यात् साधारणधर्मजन्यसंशय एवायं संशयोऽप्यन्तर्भवति, अतो न पृथग् वक्तव्य इति।

तथा अनुपलब्धिः सतामीश्वरादीनां द्रष्टा असतां शशविषाणादीनां च द्रष्टेति अनुपलब्धेः सदसत्साधारण्यात् साधारणधर्मजन्यसंशय एवायमपि संशयोऽन्तर्भवतीति न पृथग् वक्तव्यः। अयं संशयस्त्रिविधः, तथाहि–

साधारणधर्मज्ञानजन्यः

असाधारणधर्मज्ञानजन्यः

विप्रतिपत्तिवाक्यजन्यश्च

1. साधारणधर्मज्ञानजन्यस्थाणुपुरुषसाधारणमुच्चैस्तरत्वमवगत्य अयं स्थाणुर्वा पुरुषो वेति संशयो जायते। अयं संशयो विरुद्धभावद्वयकोटिक एव बोध्यः स्थाणुपुरुषयोः साधारणं ऊर्ध्वतालक्षणं धर्मं पुरोवर्तिन्युपलभ्य स्थाणुपुरुषौ स्मृत्वा विशेषजिज्ञासायां स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकं शिरःपाण्यादिकं च अनुपलभमानस्य पुंसो दोलायमानं संशयज्ञानमुत्पद्यते किमयं स्थाणुर्वा पुरुषो वेति, अयं च साधारणधर्मजन्यसंशयः।

2. असाधारणधर्मज्ञानजन्य: संशय शब्दे आकाशविशेष-गुणत्वमसाधारणधर्ममुपलभमानस्य निर्णायकमजानत: संशयो भवति किमयं शब्द: नित्यो वा अनित्यो वेति महाभाष्येऽपि उपस्थापित: किं पुनर्नित्य: शब्द: आहोस्वित् कार्यं इत्येवरूपेण[14] शब्दत्वस्य नित्यानित्यव्यावृत्तत्वज्ञानेन शब्दासाधारणधर्मत्वज्ञानात्। प्रदीपकृद्भिस्तु विप्रतिपत्त्याऽयं संशय इति प्रादर्शि। एवं चासाधारणधर्मदर्शनादय: संशयो यदि, तदा प्रत्यक्षाभास इत्युच्यते। यदा तु विप्रतिपत्तिवाक्येन जायते, तदा शाब्दबोधरूपस्तृतीयोऽयमित्युच्यते। शाब्दिकनये शाब्दबोधस्याऽपि संशयभ्रमरूपतया अङ्गीकारात्।[15] न्यायनये तु शब्दस्य निश्चयमात्रजनकत्वमङ्गीकृतत्वादिति।

3. विप्रतिपत्तिजन्यसंशयो यथा–इन्द्रियेषु वैशेषिकसांख्ययो: भौतिकत्वाभौतिकत्वविप्रतिपत्तिं पश्यतो निश्चायकमजानत: पुरुषस्य सन्देहो भवति किमिन्द्रियाणि भौतिकानि उत अभौतिकानीति।

अयं तृतीयसंशयोऽन्यत्रापि दर्शितो भाष्ये यथा–

तदेतदत्यन्तं सन्दिग्धं वर्तते आचार्याणां विभाषाऽनुवर्तते न वा इत्यादौ अत्र विभाषा रूपे धर्मिणि अनुवृत्तिकर्तृत्वतद्भावरूपधर्मयो: संशय: शाब्द: विप्रतिपत्तिवाक्यजनितत्वात्। एकेनाचार्येण अनुवर्तते विभाषां इत्येतत्साधकं ज्ञापकवाक्यमुच्यते, अपरेण नैतदस्ति ज्ञापकमित्यादिना तन्निरुध्यत इति अन्यस्य सन्देहोऽर्थादापन्नो भवति।[16] अत: एकस्मिन् धर्मिणि विरुद्धानां नानाधर्माणां विशिष्टज्ञानं संशय इत्युच्यते।

**संदर्भ:–**

1. बृहदा. उप. 2/4/5
2. न्या.सू.वा.भा. 1/1/1 भाष्यम्
3. न्या.वा.भा. पृ. 11
4. न्या.सू. 1/1/1
5. न्या.सू. 1/1/23
6. कारिकावली
7. पा.सू. 51/1/73
8. तर्कसंग्रह:, पृ. 205
9. म.भा.उ. 1 अ. उपा. 1 आ. (19 सूत्र 194 पृ.)
10. उभयेत्युपलक्षणम्, आत्र्यादिकोटिसंस्पर्शेऽपि संशयस्य सद्भावात् (प्र.मी. हि. पृ. 5)

11. 'एरच' इति सूत्रेणाधिकरणेऽप्रत्ययः सम्पूर्वकात् शीङ्धातोः ततश्च ज्ञानविशेषे योगरूढोऽयमिति भावः। प्र.मी. पृ. 5
12. ननु संशयादिज्ञानस्यासिद्धस्वरूपत्वात् कस्य व्यवसायात्मकविशेषणत्वेन निरासः संशयज्ञाने हि धर्मी धर्मो वा प्रतिभाति? धर्मी चेत्, स तात्त्विकः, अतात्त्विको वा? तात्त्विकश्चेत्, कथं तद्बुद्धे संशयरूपता?
    तात्त्वकार्थ गृहीति (श्रीप्रभाचन्द्राचार्यविरचित प्रमेयकमलमार्त्तण्डे प्रथम परि. सू. 213)
13. न्या.सू. 1/1/23
14. महाभाष्यम् 1 अ. 1 पा. 1 आ. पृ. 46
15. परिभाषेन्दुः भूतितिलके तत्त्वप्रकाशिकायुते परि. 1 पृ. 5
16. न्याय. सि. मु. टीकाद्वययुता कारि. 30 पृ. 442

# न्यायाभिमतसंशयस्वरूपविमर्शः

**प्रो. शुद्धानन्दपाठकः**

सत्यस्य ज्ञानतत्त्वस्यान्वेषणार्थं सर्वे दार्शनिकाः सततं प्रयत्नशीलाः भवन्ति। स्वस्वमत्या च ज्ञानतत्त्वं विचारयन्ति। सत्यज्ञानमन्तरा मोक्षस्य असम्भवात् ज्ञानस्य च मुक्तौ सापेक्षितत्वात् न्यायसूत्रकारैः प्रमाणादि-षोडशपदार्थानामुल्लेखः कृतः। तथा च सूत्रम् "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[1] इति। प्रकृते च न्यायमते सर्वव्यवहारहेतुगुणः बुद्धिः इति बुद्धेः सामान्यलक्षणं भवति। सा च बुद्धिः न्यायमते प्रमेयान्तर्गता, वैशेषिकमते गुणपदार्थरूपा। वस्तुतः आत्मनो विशेषगुणो बुद्धिः, सा बुद्धिः स्मृत्यनुभवभेदाद्द्विविधा भवति।

**"अनुभूति स्मृतिश्च स्यादनुभूतिश्चतुर्विधा।**
**प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।।**[2]

स्मृतिश्च संस्कारमात्रजन्यं ज्ञानं भवति। स्मृतिभिन्नं ज्ञानमनुभवः। अनुभवस्तु यथार्थायथार्थभेदेन द्विविधः। तद्वति तत्प्रकारकोऽनुभवः यथार्थः, स च प्रत्यक्षानुमित्युपमितिशाब्दभेदाच्चतुर्विधः। तदभाववति तत्प्रकारको-ऽनुभवोऽयथार्थः। स च संशयविपर्ययतर्कभेदात् त्रिविध इति नैयायिकानां तत्रैव रुचिः। परन्तु जगदीशः संशयविपर्ययस्वप्नाध्यवसायभेदाद् अयथार्थज्ञानं चतुर्विधमिति वदति। मन्ये वैशेषिकैरपि अयथार्थज्ञानस्य चातुर्विध्यं स्वीक्रियते। एतेन ज्ञायते जगदीशः वैशेषिकमतमवलम्ब्य तथा प्रतिपादितवान्। न्यायसारकारस्तु ऊहानध्यवसायस्य संशयादौ अन्तर्भावत्वं स्वीकृत्य संशयविपर्ययभेदाद् अयथार्थज्ञानं द्विविधमिति स्वीकृतवान्। न्यायसूत्रानुसारेण संशयस्तावद् तृतीयपदार्थः। तस्य संशयस्य किं सामान्यलक्षणमिति जिज्ञासाया-मुच्यते अन्नम्भट्टेन तर्कसंग्रहे– "एकस्मिन् धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यवगाहिज्ञानं संशयः"[3] इति। अर्थाद् एकस्मिन्नेव पुरोवर्त्तिनि पदार्थे

विरुद्धत्वेन ज्ञायमानाः ये नानाधर्माः स्थाणुत्वपुरुषत्वादयः तेषां सम्बन्धावगाहिज्ञानं संशयः इति। "घटपटौ" इत्यादिसमूहालम्बनज्ञाने संशयलक्षणस्यातिप्रसक्तिवारणाय लक्षणे एकस्मिन्निति पदस्य व्यपदेशः। "घटो द्रव्यम्" इति ज्ञानस्य एकस्मिन्धर्मिणि घटे घटत्वद्रव्यत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिव्याप्तिरतस्तद्वारणाय विरुद्धपदस्योपादानम्। एवञ्च "पटत्वविरुद्धघटत्ववान् घटः" इत्याकारकज्ञानेऽतिप्रसक्तिवारणाय नानेति पदस्य व्यपदेशः। एतेन ज्ञायते यदेकधर्मनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारताशालिज्ञानं संशयः। स च संशयः साधारणधर्मवद्धर्मिज्ञानजन्यः, असाधारणधर्मवद्धर्मिज्ञानजन्यः, विप्रतिवाक्यजन्यश्च भवतीति नैयायिकानां सिद्धान्तः।

मुक्तावलीकारैस्तु कारिकावल्यामुच्यते यत्–

**"संशयोऽथ प्रदर्श्यते॥**

**किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः।**
**तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥**
**स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥[1]" इति।**

अभिप्रायस्तु एकस्मिन् धर्मिणि भावस्य अभावस्य च यज्ज्ञानं भवति सः संशयः इति। संशयकारणं त्रिविधम्– उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् अर्थात् कोटिद्वयसहचरितत्वेन गृह्यमाणो यो धर्मः ऊर्ध्वत्वादिस्तत्प्रकारकनिश्चयः संशयकारणमिति। यथोच्यैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्नवेति सन्दिग्धे। द्वितीयस्तु असाधारणधर्मज्ञानमपि संशयकारणमिति। अर्थात् कोटिद्वयाधिकरणाऽवृत्तित्वेन गृह्यमाणधर्मप्रकारकनिश्चयः संशयकारणम्। यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वं शब्दे गृहीत्वा शब्दो नित्यो न वेति सन्दिग्धे। तृतीयस्तु विप्रतिपत्तिवाक्यज्ञानं तु अर्थकोटिद्वयस्मरणद्वारा न संशयजनकम्, अपि च तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस एव। एवञ्च प्रामाण्यसंशयाद्विषयसंशयोत्पत्तिः, व्याप्यसंशयाद् व्यापकसंशयस्योत्पत्तिरिति नैयायिकानामाशयः।

सूत्रकारैस्तु विशेषापेक्षो विमर्शः संशय इति संशयलक्षणमुक्तम्। तथाहि "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"[5] इति।

सूत्रस्यावलोकनेन ज्ञायते यन्न्यायसूत्रकारैः संशयस्य पञ्चप्रकाराः स्वीकृताः। 1. समानधर्मोपपत्तेः विशेषापेक्षो विमर्शः संशय इति प्रथमः। यथा– किमयं स्थाणुः पुरुषो वा।

अनेकधर्मोपपत्तेः विशेषापेक्षो विमर्शः संशयः इति द्वितीयः। यथा आकाशविशेषगुणत्वात् किमयं शब्दो नित्यः स्यादनित्यो वा इति।

विप्रतिपत्तेः विशेषापेक्षो विमर्शः संशय इति तृतीयः। यथा एके भौतिकानीन्द्रियाण्याहुरन्ये त्वभौतिकानीति।

उपलब्धेरव्यवस्थातो भवति संशय इति चतुर्थः। यथा किं सदुदकमुपलभ्यते उतासदिति।

अनुपलब्धेरव्यवस्थातो भवति संशय इति पञ्चमः। यथा किं विद्यमानः पिशाचो नोपलभ्यते किं वाऽविद्यमान इति। एतेन ज्ञायते सूत्रकारैः भाष्यकारैश्च पञ्चविधः संशयः स्वीकृतः। इति शम्।।

संदर्भः–

1. न्या.सू. 1/1/1
2. कारिकावली-51-52
3. त.सं. पृ. 157
4. कारिकावली का. 128-130
5. न्या.सू. 1/1/23

# न्यायवार्तिकदिशा संशयस्वरूपविमर्शः

डॉ. जवाहरलालः

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्य प्राधान्यात् सर्ववादिसम्मतत्त्वात् सांसारिकदुःखानामसह्यत्वात् मोक्षतत्त्वावाप्त्यर्थं न्यायशास्त्रे– **"प्रमाण-प्रमेय-संशय-प्रयोजन- दृष्टान्त- सिद्धान्ताऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रह-स्थानानां तत्त्वज्ञानान्निः श्रेयसाधिगमः।"**[1] इति प्रमाणादि षोडशपदार्थानां निर्वचनं सूत्रकारैः कृतम्। तत्र च प्रमेयस्य सिद्धिः प्रमाणाधीनत्वाद् आदौ प्रमाणपदार्थस्योल्लेखः विहितः। प्रमाणं प्रत्यक्षानुमानोपमानशब्दभेदात् चतुर्विधं न्यायशास्त्रे स्वीकृतं विद्यते, तथा च सूत्रम्–"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[2] इति। प्रमेयं च आत्मशरीरेन्द्रियभेदात् द्वादशविधम् **"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"**[3] द्वादशविधेषु प्रमेयेषु बुद्धिः स्मृत्यनुभवभेदाद् द्विविधा न्यायनये स्वीकृता। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः, स्मृतिभिन्नं ज्ञानमनुभवः। स चानुभवः यथार्थायथार्थभेदेन द्विविधः। यथार्थानुभवः प्रमापदेन विवक्षितः। एवञ्च प्रमाणप्रमेयघटकीभूता या प्रमा सा का इति जिज्ञासायां न्यायशास्त्रे यथार्थानुभवः प्रमा इति प्रमालक्षणं आचार्यैः भाषितम्। परन्तु तत्र प्रमा लक्षणे यथार्थपदोपादानेन अयथार्थज्ञानानां व्यावृत्तिः अत एव भासर्वज्ञैः सम्यगनुभवः प्रमा, तत्साधनं प्रमाणमिति लक्षणं प्रतिपादितम्, अयथार्थानुभवः प्रमा इति अप्रमायाः लक्षणं दृश्यते खलु शास्त्रे। सा च अप्रमा संशयविपर्ययतर्कभेदात् त्रिविधा इति। उक्तं च तर्कसंग्रहकारेण **"अयथार्थानुभवः त्रिविधः, संशयविपर्ययतर्कभेदात्"**[4] न्यायाचार्यैः जगदीशतर्कालंकारैः अयथार्थानुभवस्य संशयविपर्ययस्वप्नानध्यवसायभेदात् चातुर्विध्यं स्वीकृतम्। न्यायसूत्रकारमते संशयः तृतीयः पदार्थः। संशयादिपदार्थाः यद्यपि प्रमाणप्रमेयेषु यथायथं अन्तर्भावयन्ति तथापि न्यायविद्यायाः पृथक्

निर्वचनार्थं तस्य वैशिष्ट्यप्रतिपादनार्थं च संशयादिपदार्थानां पृथग् निर्वचनं सूत्रकारैः कृतमिति भाष्यकारैः स्पष्टीकृतम्। उक्तं च **"तत्र संशयादीनां पृथग् वचनमनर्थकं संशयादयो यथासंभवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्ते इति। सत्यमेतत् इमास्तु चतस्रो विद्याः पृथक् प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः तेषां पृथग् वचनमन्तरेणाऽध्यात्मविद्यामात्रमियं स्याद् यथोपनिषदः तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते"**[5] इति। संशयादीनां पृथक् निर्वचने "पृथक् प्रस्थानाः" इति यद् भाष्यकारैः भाषितं तमर्थं विवृणोति उद्योतकरः— **"विद्याप्रस्थानभेदज्ञापनार्थत्वात्। चतस्र इमा विद्या भवन्ति ताश्च पृथक् स्वाम्यमात्यभेदानुविधायिनि दण्डनीतिः। संशयादिभेदानुविधायिनि आन्वीक्षिकी"**[6] इति। एतेन ज्ञायते खलु संशयादिपदार्थानां पृथग् निर्वचने सति न्यायशास्त्रस्य वैशिष्ट्यं भाति। प्रमाणशास्त्रस्य परिपोषणार्थं संशयादिपदार्थानां निर्वचनमवश्यं कार्यमिति धिया न्यायज्ञैः संशयपदार्थस्य निर्वचनं कृतम्। स च संशयपदार्थः कः? तस्य संशयस्य कथमुत्पत्तिः? स च कतिविधः? इत्यादि जिज्ञासायां न्यायसूत्रकारैः संशयलक्षणभेदपूर्वकं सूत्रमुपस्थापितं यत्— **"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"**[7] इति। संशयलक्षणविषये नैयायिकाः इत्थं प्रवदन्ति।—

1. तर्कसंग्रहे **"एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः"**[8]।
2. तर्कामृते **"समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिद्वयस्मरणैरयं स्थाणुर्वापुरुषोवेतिज्ञानं जन्यते स एव संशय इति।"**[9]।
3. न्यायसिद्धान्तमुक्तावल्यां **"एकस्मिन् धर्मिणि विरुद्धभावाभावप्रकारकज्ञानं संशयः"**[10]।
4. तर्कभाषायां **"एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः"**[11]।
5. न्यायसारे— **"तत्रानवधारणज्ञानं संशयः"**[12]।

6. तार्किकरक्षायाम्– **संशयः कथितो ज्ञानमवधारणवर्जितम्।** अनवधानात्मकः प्रत्ययः संशयइति[13]।।

अनेन प्रकारेण संशयस्य लक्षणं तत्तदाचार्यैः परिष्कृतम्। वस्तुतः सूत्रे विशेषापेक्षो विमर्शः संशयः इति संशयलक्षणम् अन्यत् कारणानि इति ज्ञायते। बुद्धिविशेषो यत्र स विशेषापेक्षः एतादृशो किमिदमित्याकारकमनिश्चयात्मकं ज्ञानं संशयो भवतीति सूत्रकाराणामाशयः। तत्र भाष्यकाराः संशयस्य पञ्च कारणानि स्वीकुर्वन्ति। तथा हि समानधर्मोपपत्तेः, अनेकधर्मोपपत्तेः, विप्रतिपत्तेः, उपलब्ध्यव्यवस्थातः, अनुपलब्ध्यव्यवस्थातश्च इति। परन्तु तत्र केचन टीकाकाराः समानाः सदृशाः अनेके च ये धर्मास्तेषामुपपत्तेरिति समानानेनकधर्मोपपत्तेरित्यस्य एकत्वं स्वीकृत्य संशयस्य चत्वारि कारणानि साधयन्ति। वार्तिककारैस्तु समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च भेदात् संशयस्य त्रैविध्यं स्वीकृतम्। उक्तञ्च तत्र **"समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च त्रिविध एव संशय इति पद विशेषणाद् भवतीति सूत्रार्थः"**[14] इति। भाष्यवार्तिकमतसमीक्षणेन ज्ञायते यत् भाष्यकारैः संशयस्य पञ्च कारणानि, वार्तिककारैः त्रीणि कारणानि, टीकाकारैस्तु चत्वारि कारणानि च स्वीकृतानि इति। एवञ्च सूत्रकारैः यत् विशेषापेक्षोविमर्शः संशय इति यत् संशयलक्षणमुक्तं तस्य सारल्येन एकं नवीनं संशयलक्षणं वार्तिककारैः उद्घाटितं, विषयस्वरूपानवधारणं प्रत्ययः संशय इति। उक्तञ्च **"तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशयः समानधर्मादिभ्यः उत्पन्नेविषयस्य विशेषं नावधारयति यः संशय इत्युच्यते"**[15] **इति।** मन्ये वार्तिकमतमभिलक्ष्य समानधर्मोपपत्तेरित्यस्य सूत्रस्य व्याख्यानावसरे भाष्यकारैः समानशब्दस्य कोऽपि अर्थः नैव प्रदर्शितः। परन्तु वार्तिककारैः तस्य अर्थं प्रदर्श्य तादृशपङ्क्तेः विग्रहोऽपि प्रदर्शितः। तत्र समान शब्दः साधारणार्थस्य वाचकः। उक्तञ्च **"समानशब्दः साधारणार्थः समानस्य धर्मस्योपपत्तेरितिसाधारणस्येति यावत्"**[16] **इति।** एतेन निश्चप्रचं वक्तुं शक्यते यद् अनुद्घाटिततत्त्वानां उद्घाटनं वार्तिककारैः कृतमिति वार्तिककारस्य वैशिष्ट्यम्। सोऽयं साधारण धर्मः संशयस्य कारणं भवति। समानधर्मोपपत्तितः संशयोदाहरणं स्पष्टयति–स्थाणुपुरुषयोः समानधर्ममूर्ध्वत्वादिकं पश्यन् स्थाणुपुरुषयोः पूर्वदृष्टं स्थाणुत्व पुरुषत्व विशेषधर्मं किं वा पुरुषत्वव्याप्यधर्मं

करचरणादिमत्वं जिज्ञासमानोऽपि तादृशसमानधर्मज्ञानानन्तरं किमिदं विशेषरूपं नावधारयति तदेव निश्चयात्मकं ज्ञानं संशय इति संशयस्य प्रथमपक्ष: वार्तिककारै: प्रदर्शित:।

अनेकधर्मोपपत्ते: सशय: इति सूत्रस्य व्याख्यानावसरे केचन इत्थं प्रलपन्ति अनेकस्य धर्मो अनेकधर्म: अनेकस्य द्रव्यगुणकर्मलक्षणस्य संयोगजत्वं धर्म: अनेकश्च धर्म: संयोगजत्वनिर्गुणत्वनिष्क्रियत्वानि शब्दे विद्यन्ते तदनेकधर्मोपपत्ते: संशय इति। परन्तु वार्तिककारै: तथा नाङ्गीकृतं यत: **"सामानधर्मोपपत्तेरित्यत्र चरितार्थत्वात्"**[17] इति। अत्र भाष्यकारै: समानजातीयसमानजातीयं चानेकं तस्यानेकस्य धर्मोपपत्तेरित यद् व्याख्यानं कृतं तदेव वार्तिककारै: स्वीकृतम्। द्वितीयं **"यथा गन्धवत्त्वात् पृथिवी अवादिभ्यो विशिष्यते गुणकर्मभ्यश्च"**[18] इति। अर्थात् तत्र गन्धवत्त्वस्य पृथिवीमात्रवृत्तित्त्वाद् गन्धवत्त्वात् पृथिव्या: द्रव्यत्त्वादिनिश्चयो न सम्भवतीति किं पृथिवी द्रव्यं वा गुणादिरूपा वेति संशय जायते। अनेन क्रमेण द्वितीयस्य कारणं सम्पद्यते।

विप्रतिपत्तितोऽपि संशयो उदेति। विप्रतिपत्तेरित्यस्यार्थ: भाष्यकारै: प्रकटित: **"व्याहतमेकार्थदर्शनं विप्रतिपत्ति:"**[19] इति। एतादृशमर्थं स्वीकृत्य वीर्तिककारै: एकं विशिष्टं व्याख्यानं प्रदत्तम्। **"विप्रतिपत्ते: संशय इति व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थ प्रवाद-विषयत्वमुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गत-विशेषानुस्मृतौ च सत्यां संशयो भवतीति।"**[20] एतन सिद्ध्यति यत् विप्रतिपत्तिवाक्यस्य संशयकारणत्वं विद्यत एव। यदि कश्चिद् वदति अस्ति आत्मा अपरश्च नास्ति आत्मा इति विरुद्धवाक्यद्वयश्रवणेन आत्मा अस्ति न वेति संशय: उदेति। न्यायवार्तिककारै: समानानेकादिभेदात् संशय: त्रिविध: उक्त: तेषामयामाशय: उपलब्ध्यनुपलब्ध्यव्यवस्थाया: त्रिविधेषु प्रत्येकेस्मिन् कारणत्वात्. तस्य पृथक् निर्वचनं निरर्थकमिति। उक्तञ्च **"समानोऽनेकश्चधर्मो ज्ञेयस्थ उपलब्ध्यनुपलब्धी पुनर्ज्ञतृस्थे इति भाष्यम्। तत्रोपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भवतीति चर्चितम्"**[21] **इति।** अर्थात् एतेषां नये समानधर्मवद् धर्मिज्ञानं, असाधारणधर्मवद् धर्मिज्ञानं विप्रतिपत्तिवाक्यजन्यं ज्ञानं च संशयकारणं। एतेन ज्ञायते यत् वार्तिककारै: संशयस्य त्रैविध्यं स्वीकृतमित्यलम्।

**संदर्भः-**


1. न्यायसूत्रम्, 1.1.1
2. न्यायसूत्रम्, 1.1.3
3. न्यायसूत्रम्, 1.1.8
4. तर्कसंग्रहः, पृ. ?
5. न्यायभाष्यम्, पृ. 5
6. न्यायवार्तिकम्, पृ. 12
7. न्यायसूत्रम् 1.1.23
8 तर्कसंग्रहः संशयप्रकरणम्
9. तर्कामृतम्
10. न्यायसिद्धान्तमुक्तावलिः
11. तर्कभाषा, पृ. 570
12. न्यायसारः, पृ. 6
13. ता. रक्षा. का. 55
14. न्यायवार्तिकम्, पृ. 87
15. न्यायवार्तिकम्, पृ. 87
16. न्यायवार्तिकम्, पृ. 88
17. न्यायवार्तिकम्, पृ. 91
18. न्यायवार्तिकम्, पृ. 46
19. न्यायवार्तिकम्, पृ. 47
20. न्यायवार्तिकम्, पृ. 96
21. न्यायवार्तिकम्, पृ. 96

# अद्वैतवेदान्ते संशयविचारः

डॉ. के.एस्. सतीशः

सर्वेष्वपि दर्शनेषु संशयस्य महत्त्वपूर्णं स्थानमस्तीति निश्चप्रचम्। अद्वैतवेदान्ते तस्य किं स्थानमिति प्रकृतशोधालेखद्वारा चिन्त्यते।

अद्वैतवेदान्तग्रन्थेषु बहुत्र संशयविषये चर्चा वरीवर्ति। प्रत्यक्तत्त्व-प्रदीपिकायां द्वितीयपरिच्छेदे संशयलक्षणं विभिन्नदार्शनिकोक्तं विकल्प्य खण्डितम्। यथा

किमनवधारणं ज्ञानं संशयः, विरुद्धोभयकोटिसंस्पर्शिज्ञानं वा, अनिर्धारितत्वविशेषितं तद्वा, जिज्ञासाजनकं मिथ्याज्ञानं वा, विपर्ययेतरमिथ्याज्ञानं वा, संशयत्वजातियोगि वा संशय इति तत्र संशयलक्षणे विकल्पाः।[1]

तत्रानवधारणज्ञानं संशय इत्यत्रावधारणानिरुक्त्यानवधारणत्वस्यापि निरुक्त्यसम्भवात्। अवधारणमपि न ज्ञानमात्रं न वैकाकारप्रतिनियतं ज्ञानं नापि संशयविरोधिप्रमाणज्ञानम्। आद्ये व्याघातः। द्वितीये चित्रः पटः इत्यादि निश्चयज्ञानेष्वतिव्याप्तिः। तत्रैकाकारप्रतिनियमाभावात्। तृतीये त्वात्माश्रयः। अतः न्यायभूषणकाराणामिदं संशयलक्षणं दुष्टमिति गम्यते।

विरुद्धोभयकोटिसंस्पर्शिज्ञानं संशय इति लीलावतीकारलक्षणे भेदाभेद-शीतोष्णादिविषयप्रमाणज्ञानेऽतिव्याप्तिः। जैनदार्शनिकोक्ततृतीयविकल्पस्तु प्रथमविकल्पनिरासेनैव निरस्तः। जिज्ञासाजनकं मिथ्याज्ञानं संशय इति चतुर्थे विकल्पेऽजिज्ञासोरपि स्थाण्वादौ संशयदर्शनेऽतिव्याप्तिः दोषः स्यात्। सर्वत्र संशयानन्तरं जिज्ञासा भवेदेवेति नियमो नास्ति। उपेक्षायाः अपि तत्र सम्भवात्।

---

१. प्रत्यक्तत्त्वप्रदीपिका-चित्सुखाचार्यः, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, 2007 पृष्ठसंख्या 222

विपर्ययेतरमिथ्याज्ञानं संशय इत्यत्र पञ्चमे विकल्पे संशयस्य विपर्ययात् किं निमित्तो भेद इति वक्तव्यम्। न च तत्र विषयविशेषेण भेदः, तस्यानिरुक्तेः।

तथाहि - यदि संशये उभयविधिर्विशेषस्तर्हि स्थाणुपुरुषाविति समुच्चयनिश्चयस्यापि संशयत्वं स्यात्। उभयनिषेधे तु न स्थाणुर्न पुरुष इति संशयाकारः स्यात् योऽनिष्टः। अन्यतरनिषेधो विशेष इति चेत्तत्रापि तदितरस्यावधारणे सति निश्चयत्वापत्तिः। तस्मात् न विषयविशेषेण संशयस्य भेदः विपर्ययात्। नापि कारणविशेषेण तथा सति स च कारणविशेषः सामग्री वा सामग्र्यैकदेशो वा विवक्षितः स्यात्। उभयमप्यतीन्द्रियत्वान्न प्रत्यक्षगम्यं, न वा तत्र किमपि प्रमाणान्तरमुपलभ्यते। नापि जातिविशेषेण विपर्ययाद्भेदः संशयस्य। जातिसङ्करापत्तेः। अयं स्थाणुः पुरुषो वेत्यत्र धर्म्यंशे ज्ञानस्य निश्चितत्त्वं, तस्यैव ज्ञानस्य विशेषांशे च संशयत्वमिति विरुद्धजातिद्वयवत्त्वात्। एतेन संशयत्वजातियोगिसंशय इति षष्ठोऽपि विकल्पः निरस्तः। तस्मात् संशयलक्षणं न सभवतीति चित्सुखाचार्याणामाशयः।

खण्डनखण्डखाद्येऽपि संशयलक्षणानि पूर्वोक्तवदेव विकल्प्य खण्डितानि। आनन्दज्ञानविरचिते तर्कसंग्रहेऽपि संशयलक्षणं खण्डितम्। प्रायशः तत्राप्येत एव पूर्वोक्ताः विकल्पाः विमृष्टाः।[1] अत्र ग्रन्थे जैनदर्शनोक्तसंशयलक्षणमन्यथा विमृष्टं विद्यते। तथा हि -

जैनमते विरुद्धकोटिसंस्पर्शिज्ञानं संशय इति स्वीक्रियते। किन्तु, एतावता स्याद्वादाभ्युपगमाद्विरुद्धकोटिसंस्पर्शितज्ज्ञानं तन्मते निश्चयात्मकमेव स्वीक्रियत इति तस्य संशयत्वमेव न स्यात्। अतोऽनिश्चितत्त्वमनिर्धारितत्त्वं वा तत्र लक्षणे योजयितव्यम्। तत्रानिश्चयस्य निश्चयात्यन्ताभावरूपत्वे सति संशयेन भावरूपेण सह सामानाधिकरण्यं न स्यात्। निश्चयभेदस्वीकारे तस्य भावत्वाभ्युगमे वा तावतैव चरितार्थत्वात् लक्षण इतरानर्थक्यमेव। अपि च निश्चयस्य सम्यग्ज्ञानत्वे संशयविपर्ययाभ्यामर्थान्तरस्य तथात्वादितरेतराश्रयः। संशयेतरज्ञानत्वेऽपि तस्य तादवस्थ्यात्।

---

१. तर्कसंग्रहः - आनन्दज्ञानः, गायकवाड ओरियण्टल् सीरीज, बडौदा, 1917 पृष्ठसंख्या 79-80

अत्र तर्कसङ्ग्रहे पञ्चविधत्वं त्रिविधत्वं वा न्यायदर्शने यत् स्वीकृतं तस्यापि निराकरणं कृतमस्ति। यथा न हि संशयस्य समानधर्मानेक-धर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारणभेदात्पञ्चधात्वं वक्तुं युक्तम्। सामग्री-भेदस्यासिद्धत्वात्। समानधर्मस्यैव सर्वत्र मनःसंयोगसध्रीचीनस्य संशयप्रभेदे सामग्रीत्वसम्भवात्। एकप्रकारत्वेऽपि तद्व्यक्तिभेदादेव भेदसम्भवात्-इत्यादिना।

यद्यपि न्यायसरणिमाश्रित्य संशयलक्षणानि खण्डितानि तथाप्यद्वैत-वेदान्ते संशयस्य महत्त्वपूर्णं स्थानं दरीदृश्यते। तस्य संशयस्यैतच्छास्त्रे जिज्ञासाङ्गत्वेन विचाराङ्गत्वेन स्वीकृतत्वात्। ब्रह्मसूत्रे 191 अधिकरणेषु संशयनिराकरणायैव न्यायानां प्रदर्शितत्वात्, संशयस्याधिरणाङ्गत्वाच्च।

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**सङ्गतिश्चेति पञ्चाङ्गं प्राञ्चोऽधिकरणं विदुः॥**

इत्यत्र विशय इत्यनेन संशय एवाधिकरणाङ्गत्वेन प्रोक्तः।

अपि च जिज्ञासाधिकरणे भाष्ये **तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धं न जिज्ञासितव्यम्। अथाप्रसिद्धं नैव शक्यं जिज्ञासितु**मिति शङ्कामुद्भाव्य आत्मविषये सामान्यतो ज्ञानं विशेषतो विप्रतिपत्तिरस्तीति तत्र संशयमुद्भाव्य जिज्ञासायाः आवश्यकता सम्यक् निरूपिता।[1]

भगवद्गीतायामपि प्रथमाध्यायेऽर्जुनस्य यावता –

**न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।**[2] इति निश्चयः भगवता श्रीकृष्णेन तत्त्वज्ञानोपदेशो न कृतः। किन्तु –

**कार्पण्यदोषोऽपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥**[3]

इति यदा संशयपुरस्सरं जिज्ञासा प्रदर्शिता, तत्पश्चात्तत्त्वोपदेशो गीताचार्येण समारब्धः। अतोऽद्वैतवेदान्ते संशयस्य प्रमुखं स्थानं विद्यत एव।

१. ब्रह्मसूत्रभाष्यम् – श्रीशङ्करभगवत्पादाचार्याः, कामकोटिकोशःस्थानम्, चेन्नै 2008 – पृष्ठसंख्या 6, 7
२. श्रीमद्भगवद्गीता, वेदव्यासः, गीताप्रेस गोरखपुर, 1/46
३. तत्रैव 2/7

अद्वैतसिद्धावपि संशयस्य विचाराङ्गत्वं स्वीकृत्यैव तज्जनकतया विप्रतिपत्तिवाक्यस्य विचारादौ महत्त्वं व्यवस्थापितम्।[1] विरुद्धकोटिद्वयोपस्थापकं वाक्यद्वयं विप्रतिपत्तिवाक्यमित्युच्यते। तज्जन्यसंशयस्य विचाराङ्गत्वान्मध्यस्थेन कथादौ विप्रतिपत्तिवाक्यमुपस्थापनीयमिति तत्र प्रतिपादितम्। **साध्यसंशयः पक्षते**ति मते संशयस्य पक्षतासंपादकतया विचाराङ्गत्वमस्ति। किन्तु, इदं पक्षतालक्षणमद्वैतिभिः स्वीकर्तुं न शक्यते। तथा सति **श्रोतव्यो मन्तव्य**[2] इति श्रुतिसिद्धं मननं न सिद्ध्येत्। तत्र हि मुमुक्षोरात्मश्रवणानन्तरं संशयाभावादात्मविषयकमनुमानादिरूपं मननं न स्यात्। अतो वेदान्तिभिरपि चिन्तामणिकाराणां **सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः**[3] इति मतमेवादर्तव्यं भवति। तथा सति संशयस्य तदा पक्षता-संपादकतया विचाराङ्गत्वं न स्यात्। अतो नात्र विप्रतिपत्तिजन्यसंशयस्य पक्षतासंपादकतया विचाराङ्गत्वमपि तु व्युदसनीयतया तस्य विचाराङ्गत्वम्। तथा हि – विप्रतिपत्तिवाक्यं श्रुत्वा श्रोतॄणां यः संशय उत्पद्यते, तस्य वादिभिर्निरासः कर्तव्यो भवति। अत एव संशयनिवृत्तिरपि कथायाः एकं प्रयोजनमिति श्रीवाचस्पतिमिश्रैः स्वीकृतमस्ति। तात्पर्यटीकायां हि तैः **अनधिगततत्त्वबोधः संशयनिवृत्तिरध्यसिताभ्यनुज्ञानमिति फलानि त्रीणि**[4] इति प्रत्यपादि। एवञ्च संशयस्य विचारसाध्याभावप्रतियोगित्वात् तज्जनकं विप्रतिपत्तिवाक्यं मध्यस्थेन कथादौ वक्तव्यमेवेत्यद्वैतसिद्धिकाराणामाशयः।

अतोऽद्वैतवेदान्ते संशयस्य महत्त्वपूर्णं स्थानमस्तीत्येव वक्तव्यम्। भामत्यामपि **यदसन्दिग्धप्रयोजनं न तत् प्रेक्षावत् प्रतिपित्सागोचरः**[5] इति जिज्ञासां प्रति संशयस्य कारणत्वं व्यवस्थापितम्। अतस्तत्त्व–

---

1. अद्वैतसिद्धिः, मधुसूदनसरस्वतिः, परिमल पब्लिकेशन्स, दिल्ली – 1997 – पृष्ठसंख्या 14
2. बृहदारण्यकोपनिषत् 2/4/6
3. चिन्तामणिः, श्रीगङ्गेशोपाध्यायः, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, 1990 – पृष्ठसंख्या 421
4. न्यायवार्तिकतात्पर्यटीका, श्रीवाचस्पतिमिश्रः, भारतीयदार्शनिकानुसन्धानपरिषत्, नवदेहली 1996, पृष्ठसंख्या 283
5. ब्रह्मसूत्रशाङ्करभाष्यभामती, श्रीवाचस्पतिमिश्रः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2002, पृष्ठसंख्या – 5

प्रदीपिकादिग्रन्थेषु संशयखण्डनं **सर्वमिदं जगदनिर्वाच्यमि**ति प्रतिपादनक्रमे कृतमिति न दोषाय।

यद्यद्वैतवेदान्ते संशयस्य प्रमुखं स्थानमस्ति तर्हि तस्य किं स्वरूपमिति जिज्ञासायां व्यवहारे भट्टनय इति रीत्या भाट्टमीमांसकैर्यत्संशयस्वरूपं स्वीक्रियते तदेवात्रापि स्वीकर्तुं युज्यते। प्रायः एकधर्मिकविरुद्धनानाधर्म-प्रकारकज्ञानं संशय इति लक्षणं स्वीक्रियते।

# संशयपरीक्षायां वाचस्पतिमिश्रस्य दृष्टिः

डॉ. प्रभाकरप्रसादः

**नमः प्रमाणमूलाय कवये शास्त्रयोनये।**
**प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥**

श्रीवाचस्पतिमिश्रमहाभागाः पदवाक्यप्रमाणपारावारीणा इति विदितमेव समेषां विदुषाम्। सर्वेषां वैदिकदर्शनानां तेषां टीकाग्रन्थाः समुपलभ्यन्ते। श्रीशङ्करभगवत्पादानां शारीरकमीमांसाभाष्यस्योपरि भामतीव्याख्यानं मिश्राणां कृतिषु कृतितल्लजरूपेण विराजत इत्युच्यते चेन्नात्रातिशयोक्तिलेशोऽपि भवतीति मन्ये। अत्र संशयपरीक्षायां मिश्रपादैः भामत्यां यन्निरूपितन्तद्विषये तट्टीकोपटीकाविमर्शमुखेन तेषां कीदृशी दृष्टिरिति लेखेनेह प्रतिपादयितुं किञ्चिदिष्यते।

**अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो**
**विवर्ता यस्यैते वियदनिलतेजोऽबवनयः।**
**यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं**
**नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम्॥**

इति मङ्गलाचरणश्लोकेन शास्त्रीयविषयप्रयोजनप्रदर्शनमुखेन इत्थम्भूते ब्रह्मणि तात्पर्यं भाष्यस्येति मिश्रपादैः कृत्स्नं भाष्यं प्रथमं सामान्यतो व्याख्यातम्। तदनु "अथ यदसन्दिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः, यथा समनस्केन्द्रियसन्निकृष्टः स्फीतालोकमध्यवर्ती घटः करटदन्ता वा, तथाचेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिरित्यादिना" प्रतिग्रन्थं व्याख्यानं कृतमिति ज्ञायते। अत्र हि संशयस्य जिज्ञासाया हेतुत्वेन स्वीकारादधिकरणशरीरे संशयस्यावयवत्वेन प्रवेशः मिश्राणामभिमत इति स्पष्टं प्रतीयते। अतः

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम्॥ इति।**

पञ्चाङ्गात्मके षडङ्गात्मके वाधिकरणे सर्वथापि संशयस्यानिवार्यत्वं मीमांसकैः स्वीकृतम्। अत्र च ब्रह्म न विचार्यम् असन्दिग्धत्वात् स्फुटप्रकाशे स्थितघटवद्, अप्रयोजनत्वात् काकदन्तवदिति पूर्वपक्ष उपस्थाप्यत आचार्यैः। एवञ्च प्रयोजनभिन्नत्वे सति जिज्ञासात्वेन जिज्ञासाया असाधारणप्रयोजकः संशय इति कार्यमुखेन संशयस्य लक्षणं वक्तुं शक्यते। जिज्ञासा च ज्ञानेच्छा, सा च मीमांसायां प्रवर्त्तिका, मीमांसा च पूजितविचार इत्यन्यदेतत्। समन्वयाधिकरणे च देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति शङ्काया निराकरणार्थं श्रीभगवत्पादाचार्यैः गौणमिथ्यात्वयोर्विवेकः कथमिति प्रतिपादितम्। तत्र प्रसिद्धवस्तुभेदस्यान्यत्रान्यशब्दप्रत्ययौ गौणौ यथा सिंहगुणैः क्रौर्यशौर्यादिभिः सम्पन्ने पुरुषे सिंहशब्दप्रत्ययौ गौणौ, अप्रसिद्धवस्तुभेदस्यान्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव। भ्रान्तिश्चात्र समारोप उच्यते। समारोपश्च संशये विपर्यये च भवति, अतः भाष्ये क्रमशः उदाहरणद्वयं दर्शितम्–"यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायामकस्माद्रजतमिदमिति निश्चितौ शब्दप्रत्ययौ तद्वद्देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्यया-वात्मानात्मविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्" इति। अत्र प्रथममुदाहरणं संशयस्य, द्वितीयं विपर्ययस्य। एतद्वाख्याने मिश्रभागैरुक्तम्–यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरुषात् सांशयिकौ पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, तत्र हि पुरुषत्वमनियतमपि समारोपितमेव। समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति–यथा वा शुक्तिकायामिति। शुक्लभास्वरस्य द्रव्यस्य पुरःस्थितस्य सति शुक्तिकारजत-साधारण्ये यावदत्र रजतविनिश्चयो भवति तावत्कस्माच्छुक्तिविनिश्चय एव न भवति। संशयो वा द्वेधा युक्तः, समानधर्मधर्मिणोर्दर्शनाद् उपलब्ध्य-नुपलब्ध्यवस्थातो विशेषद्वयस्मृतेश्च। संस्कारोन्मेषहेतोः सादृश्यस्य द्विष्ठत्वेनोभयत्र तुल्यमेतदित्यत उक्तम्-अकस्मादिति। अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तः। तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः।। अत्र उपलब्धिः साधकं प्रमाणम्, अनुपलब्धिर्बाधकम् तयोरभावोऽत्राव्यवस्था ततः संशयो युक्त इत्याशयः। एवञ्च विशेषद्वयस्मृतेः अनवधारणात्मकः संशयो भवतीत्युक्त्यार्थतः "अनवधारणज्ञानं ज्ञानं संशय" इति तल्लक्षणं दर्शितं भवति।[9] आचार्याक्षपादसूत्रमपि "समानानेकधर्मोपपत्तेः विप्रतिपत्तेरुप-

लब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" इदमेव लक्षणं समर्थयति। अत्र सूत्रे अव्यवस्थात इत्येतदन्तेन सूत्रांशेन त्रिविधा संशयसामग्री वर्णिता, विशेषापेक्षो विमर्शः इति सूत्रांशेनानवधारणज्ञानं संशय इति तल्लक्षणमुच्यते। अत्रावधारणं नाम निश्चयः न तु ज्ञानमात्रमतः ज्ञानत्वानधिकरणं ज्ञानमनवधारणज्ञानं स्यादिति व्याहृतिः तत्त्वप्रदीपिकोक्ता न भवति। एकत्रानेकधर्मप्रकारकसंशयस्यानेकत्रैकधर्मप्रकारकसंशयस्य चास्मिन् लक्षणे सङ्ग्रहो भवति। अत एव नानाधर्मिषु ब्रह्मत्वरूपैकधर्मप्रकारकसंशयः सम्भवतीति जगत्कारणं ब्रह्मैवेति द्वितीयेऽधिकरणे निर्णीते तत् प्रधानं परमाणुरूपं वेत्यादि संशयनिवारणपूर्वकं सच्चिदानन्दरूपं ब्रह्मैव जगत्कारणीभूतं ब्रह्मेति तदेकान्त्यव्यवस्थापनं सङ्गच्छते। अनेनैकस्मिन्धर्मिणि विरुद्ध-नानाप्रकारकं ज्ञानं संशय इति केषाञ्चन नैयायिकानां सिद्धान्तोऽपि निवारितो भवति।

अतएव लोके अत्र सदसि देवदत्त इति कश्चन प्रसिद्धः पुरुष इत्यवगतवतः सदसि उपस्थितेषु बहुषु अपरिचितेषु पुरुषेषु विश्रुतो देवदत्तोऽयमयं वेति संशयो दृश्यते। न च "एकस्मिन् धर्मिणि विरुद्धनानाप्रकारकं ज्ञानं संशयः, अर्थादेकधर्मिविशेष्यकविरुद्धनानाधर्मप्रकारकज्ञानं संशय इति लक्षणानुरोधेन एतादृशसंशय एव नोदेतीति वक्तुं शक्यते। "सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्" लोकसिद्धलक्ष्यानुसारेणैव लक्षणस्य वक्तव्यत्वादुभयविधसंशयस्य सङ्ग्रहस्य

1. इदञ्च संशयलक्षणं भामतीव्याख्यानव्याख्याने श्रीपरिमलकारैः परिमले सङ्क्षेपेण निरूपितम्। तैरेव शिवार्कमणिदीपिकायां महता प्रबन्धेन प्राचीननैयायिकोक्तं संशयस्येदमेव लक्षणं समीचीनमिति प्रसाधितम्। न चैतल्लक्षणं निर्विकल्पकज्ञानेऽतिव्याप्तमिति वाच्यम् विशिष्टज्ञानत्वेन विशेषणज्ञानत्वेन च कार्यकारणभावस्यानभ्युपगमात् निर्विकल्पके मानाभावान्निर्विकल्पकं वेदान्तिभिर्नाङ्गीक्रियते, अतो न दोषः। विशेष्ये विशेषणं तत्र च विशेषान्तरमिति न्यायेन विशिष्टवैशिष्ट्यग्रहसम्भवात् विशिष्टवैशिष्ट्यबुद्धित्वेन विशेषणतावच्छेदकप्रकारकज्ञानत्वेन च कार्यकारणभावो नापेक्षते, अन्यथा अयं भ्रान्त इति, अयं भ्रम इति वा भ्रान्तिज्ञत्वं नैयायिकानां मतेऽपीश्वरस्य न स्यात्। भ्रमविषयस्य स्वातन्त्र्येण ग्रहे भ्रान्तत्वापत्त्या भ्रमावच्छेदकतयैव तद्ग्रहणं वाच्यमतः समानन्यायेन विशिष्टबोधे विशेषणज्ञानत्वेन कारणताग्रहस्यानपेक्षितत्वान्निर्विकल्पकं न सिद्ध्यति। अद्वैतसिद्ध्यादौ विषयोऽयं वर्णितः। (अद्वैतसिद्धिः, पृ.सं. 551)

युक्तत्वात्। मिश्रभागैरप्यत्र" संशयो वा द्वेधा युक्त...."इत्यादिग्रन्थसन्दर्भेण संशये नानाकोटिकज्ञानमेव निमित्तमुक्तम् न तु एकस्मिन् धर्मिणि इति विशिष्योक्तम्। "नानाकोट्यवलम्ब्येकप्रत्यय: संशयो मत:। साधारणविशेषाभ्यां विवादेन च स त्रिधा" इति संशयलक्षणमुभयत्र सङ्गच्छते। अत्र प्रथमस्योदाहरणं स्थाणुर्वा पुरुषो वेति संशय:, द्वितीयस्य तु वायु: प्रत्यक्षो नास्ति रूपरहितत्वात् वायु: प्रत्यक्ष: स्पर्शवत्वादित्यत्र संशय:, शब्दो नित्य: शब्दोऽनित्य:, इति विवादजन्य: संशय: तृतीयस्य संशयस्योदाहरणम्। अत एव भट्टाचार्यैरपि "अनवधारणज्ञानं संशय" इति लक्षणं मनसि निधाय प्रमाणलक्षणे दृढमिति विशेषणमुपात्तम्–"तस्माद् दृढं यदुत्पन्नं न विसंवादमृच्छति। ज्ञानान्तरेण तज्ज्ञानं प्रमाणमिति मीयताम्"[1] इति। अर्थात् अनधिगताबाधिता-सन्दिग्धार्थविषयकं ज्ञानं प्रमेति प्रमालक्षणम्। एवञ्च विपर्ययस्थले बाधितत्वादप्रमात्वनिश्चय:, संशयस्थले अनवधारणत्वज्ञानेनाप्रमात्वनिश्चय:, अज्ञानस्थले अविदितत्वादेवाप्रमात्वनिश्चय इति "अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयै:"[2] इत्युक्तरीत्या प्रामाण्यस्य त्रैविध्यमपि सङ्गच्छते। तदेवं श्रीवाचस्पतिमिश्रकृद्भामतीग्रन्थोक्तदिशा संशय: लक्षणप्रमाणाभ्यां परीक्षित:।

**सिद्धान्तरीतिषु मया भ्रमदूषितेन**
**स्यादन्यथापि लिखितं यदि किञ्चिदत्र।**
**संशोधने सहृदया सदया भवन्तु**
**सच्छास्त्रतत्त्वपरिशीलननिर्विशङ्का:॥**

---

1. श्लोकवार्त्तिकम् 1.1.5
2. श्लोकवार्त्तिकम् 1.1.5

# जैनदर्शने संशयविमर्शः

प्रो. वीरसागरजैनः

संशयः दर्शनशास्त्रस्य एकः प्रमुखः विषयः वर्तते। सर्वेषु भारतीयदर्शनेषु संशयविषये सूक्ष्मचिन्तनं कृतम्। न केवलं भारतीय-दर्शनेषु अपितु पाश्चात्य-दर्शनेषु संशयविषये बहुचिन्तनं प्राप्यते। वैश्विकदर्शनेषु जैनदर्शनस्य विशिष्टं स्थानं विलसति। जैनदर्शनेऽपि संशयविषये महत्त्वपूर्णं चिन्तनमुपलभ्यते। अत्र संशयवादविषयके सम्मेलने विद्वांसः सर्वेषां दर्शनानां मतं प्रस्तुवन्ति। अहमपि जैनदर्शनस्य मतमुपस्थापयितुमिच्छामि।

जैनशास्त्रेषु संशयस्य व्याख्यानं प्राधान्येन न्यायविषयकग्रन्थेषु उपलभ्यते। यद्यपि विषयोऽयं अन्यत्रापि बहुशः चर्चितो विद्यते तथापि जैनन्याये तु मुख्यत्वेनैव चर्चितो भवति।

जैनन्यायशास्त्रे सम्यग्ज्ञानमेव प्रमाणत्वेन स्वीक्रियते।[1] तत्र ज्ञानेन सह 'सम्यक्' पदं कथं प्रयुक्तम् इति विचार्यमाणे आचार्याः कथयन्ति यत् संशय-विपर्यय-अनध्यवसायरूपाणां मिथ्याज्ञानानां निराकरणार्थमेव 'सम्यक्' पदं प्रयुक्तं वर्तते। तदेव कथयन्ति श्रीमदभिनवधर्मभूषणयतिवर्याः न्यायदीपिकायाम्—

"अत्र सम्यक्पदं संशयविपर्ययानध्यवसायनिरासाय क्रियते अप्रमाण-त्वादेतेषां ज्ञानानामिति।"[2]

प्रसङ्गेऽस्मिन् प्रश्न उदेति— कः संशयः, कः विपर्ययः, कश्चानध्यवसायः इति। तर्हि आचार्याः एतेषां संशयादीनां स्वरूपमुद्घाटयन्तः लिखन्ति—

"विरुद्धानेककोटिस्पर्शि ज्ञानं संशयः, यथा स्थाणुर्वा पुरुषो वेति। स्थाणुपुरुषसाधारणोर्ध्वतादिधर्मदर्शनात्तद्विशेषस्य वक्रकोटरशिरः पाण्यादेः

साधकप्रमाणाभावादनेककोट्यवलम्बित्वं ज्ञानस्य। विपरीतैककोटिनिश्चयो विपर्ययः, यथा शुक्तिकायामिदं रजतमिति ज्ञानम्। अत्रापि सादृश्यादिनिमित्त-वशाच्छुक्तिविपरीते रजते निश्चयः। किमित्यालोचनमात्रमनध्यवसायः, यथा पथि गच्छतस्तृणस्पर्शादिज्ञानम्। इदं हि नानाकोट्यवम्बनाभावान्न संशयः। विपरीतैककोटिनिश्चयाभावान्न विपर्यय इति पृथगेव। एतानि च स्वविषय-प्रमितिजनकत्वाभावादप्रमाणानि ज्ञानानि भवन्ति, सम्यग्ज्ञानानि तु न भवन्तीति सम्यक्पदेन व्युदस्यन्ते।"[3]

एवम्प्रकारेण स्पष्टं भवति यज्जैनदर्शनानुसारं संशयः ज्ञानस्य एकः दोषः वर्तते अथवा एवमपि वक्तुं शक्यते यदयं संशयः मिथ्याज्ञानरूपः भवति। जैनाचार्यैः मिथ्याज्ञानस्य त्रयः भेदाः निरूपिताः सन्ति। तद्यथा–

**मिथ्याज्ञानम्**

- संशयः (विरुद्धानेककोटिस्पर्शि ज्ञानं) यथा–शुक्तिकायामिदं रजतमिति
- विपर्ययः(विभ्रमः) (विपरीतैककोटिनिश्चयो) यथा–शुक्तिविपरीते रजते निश्चयः
- अनध्यवसायः(विमोहः) (किमित्यालोचनमात्रम्) यथा–गच्छतस्तृणस्पर्शादिज्ञानम्

जैनाचार्यैः यत्र–कुत्रापि संशयस्य वर्णनं कृतं तत्र–तत्र विपर्यय–अनध्यवसाययोरपि वर्णनं सहैव कृतं वर्तते। किन्त्वस्माकं प्रयोजनं तु 'संशयः' एव।

संशयस्य लक्षणं न्यायदीपिकाधिकेषु ग्रन्थान्तरेषु अपि प्रोक्तं वर्तते। यथा–

1. "अनेकार्थानिश्चितापर्युदासात्मकः संशयः।"[4]

2. "अनवस्थितकोटीनामेकत्र परिकल्पनाम्। शुक्तिं वा रजतं किं वेत्येवं संशीतिलक्षणम्।"[5]

3. "संशयो नामानवधारितार्थज्ञानम्।"[6]

4. "एकधर्मिकविरुद्धनानाधर्मप्रकारकं ज्ञानं हि संशयः।"[7]

उपर्युक्तैः विविधैः लक्षणैरपि स्पष्टं भवति यत् जैनदर्शनानुसारं संशयः मिथ्याज्ञानरूपः वर्तते, यः अनिश्चयात्मकः, अनिर्णयात्मकः,

अव्यवसायात्मकः वा भवति तथा तत्र विरुद्धानेककोटिनामवलम्बनमपि भवति। तत्र जिज्ञासारूपः प्रश्नोऽपि न भवति। सः तु पृथगेव भवति।

एवमेव केचन जनाः मतिज्ञानस्य भेदरूपम् अवग्रहज्ञानं संशयरूपेण जानन्ति, किन्तु नास्ति तदपि समीचीनम्, अवग्रहज्ञानं तु निर्णयात्मकं भवति, संशयश्च अनिर्णयात्मक एव। तदेवोक्तम्–

"तत्रेन्द्रियार्थसमवधानसमनन्तरसमुत्थसत्तालोचनान्तरभावी सत्ताऽवान्तरजातिविशिष्टवस्तुग्रही ज्ञानविशेषोऽवग्रहः–यथाऽयं पुरुष इति। नाऽयं संशयः, विषयान्तरव्युदासेन स्वविषयनिश्चायकत्वात्। तद्विपरीतलक्षणो हि संशयः।"[8]

अस्मिन् विषये श्रीमद्भट्टाकलंकदेवा अपि लिखन्ति–

1. "अनेकार्थानिश्चिताऽपर्युदासात्मकः संशयस्तद्विपरीतोऽवग्रहः।"[9]

2. "संशयो हि निर्णयविरोधी नत्ववग्रहः।"[10]

अथैकं विशिष्टमपि तत्त्वं संशयविषये जैनदर्शने प्रतिपादितमस्ति। जैनचार्याणां मतानुसारं संशयः मिथ्यादर्शनरूपोऽपि भवति। अर्थात् संशयः ज्ञानस्य एव दोषो नास्ति अपितु श्रद्धानस्यापि दोषो वर्तते। यदा ज्ञानस्य दोषो भवति तदा मिथ्याज्ञानं कथ्यते, यदा च श्रद्धानस्य दोषो भवति तदा मिथ्यादर्शनं प्रोच्यते। जैनाचार्याणां मते मिथ्यादर्शनं मिथ्याश्रद्धानं वा पञ्चविधं भवति–

1. एकान्तमिथ्यादर्शनम्।
2. विपरीतमिथ्यादर्शनम्।
3. संशयमिथ्यादर्शनम्।
4. वैनयिकमिथ्यादर्शनम्।
5. अज्ञानिकमिथ्यादर्शनम्।

एतेषां स्वरूपं संक्षेपेणैवम्प्रकारेण निगदितम्–

"तत्र इदमेव इत्थमेवेति धर्मिधर्मयोरभिनिवेश एकान्तः। पुरुष एवेदं सर्वम् इति वा नित्य एव वा अनित्य एवेति। सग्रन्थो निर्ग्रन्थः, केवली कवलाहारी, स्त्री सिध्यतीत्येवमादिः विपर्ययः। सम्यग्दर्शनज्ञानचरित्राणि किं मोक्षमार्गः स्याद्वा न वेत्यन्तरपक्षापरिग्रहः संशयः। सर्वदेवतानां सर्वसमयानां च समदर्शनं वैनयिकम्। हिताहितपरीक्षाविरहोऽज्ञानिकत्वम्।"[11]

एवम्प्रकारेणेदं सुस्पष्टं भवति यत् जैनदर्शने संशयः मिथ्याज्ञानरूप एव न भवति अपितु मिथ्यादर्शनरूपोऽपि भवति। मोक्षमार्गे प्रयोजनभूत-तत्त्वानां विषये यः संशयः विद्यते सः मिथ्यादर्शनरूपः संशयः विद्यते। सारांशरूपेणेदमपि वक्तुं शक्यते यत् जैनदर्शनानुसारं संशयः द्विविधः भवति–

1. मिथ्याज्ञानरूपः संशयः।
2. मिथ्यादर्शनरूपः संशयः।

केचन तत्त्वोपप्लववादिनः उच्छेदवादिनः वा कथयन्ति यत् संशयनामकं किमपि तत्त्वं विद्यते एव न, स्वरूपासिद्धेः। किन्तु तदप्य-संगतमेव। संशयः सर्वैरेव जीवैः स्पष्टरूपेण अनुभूयते। तथापि यदि तस्य सत्ता नाङ्गीक्रियते तर्हि सुखदुःखादीनामपि सत्ता न सिद्ध्यति। तदेवोक्तमाचार्य-प्रभाचन्द्रमहोदयैः प्रमेयकमलमार्तण्डे–

"संशयः सर्वप्राणिनां चलितप्रतिपत्त्यात्मकत्वेन स्वात्मसंवेद्यः। सः धर्मिविषयो वास्तु धर्मविषयो वा तात्त्विकातात्त्विकार्थविषयो वा किमेभिर्वि-कल्पैरस्य बालाग्रमपि खण्डयितुं शक्यते? प्रत्यक्षसिद्धस्याप्यर्थस्वरूपस्यापह्नवे सुखदुःखादेरप्यपह्नवः स्यात्।"[12]

प्रमेयकमलमार्तण्डे विषयोऽयं विस्तरेण निरूपितः। जिज्ञासुभिः तत्रैव पठनीयः। अत्र विस्तारभयात् नैव लिख्यते।

अधुना उपसंहाररूपेण वक्तुं शक्यते यत् जैनदर्शनानुसारं–

1. तत्त्वोपप्लववादिनामिव संशयस्य सत्ता सर्वथा निराकर्तुं न शक्यते। संशयस्य स्वरूपमसिद्धं नास्ति अपितु सर्वजनप्रसिद्धमस्ति।

2. संशयः द्विविधः भवति– मिथ्याज्ञानरूपोऽपि, मिथ्याश्रद्धानरूपोऽपि।

3. मिथ्याज्ञानरूपस्य संशयस्य लक्षणमस्ति– विरुद्धानेककोटिस्पर्शिज्ञानं संशयः।

4. मिथ्याश्रद्धानरूपस्य संशयस्य लक्षणमस्ति– सम्यग्दर्शनज्ञानचारित्राणि किं मोक्षमार्गः स्यात् वा न वेत्यन्तरपक्षापरिग्रहः संशयः।

5. मिथ्याज्ञानरूपस्य संशयस्य निवृत्तिः सम्यग्ज्ञानेन भवति।

6. मिथ्याश्रद्धानरूपस्य संशयस्य निवृत्तिः सम्यग्दर्शनेन भवति।

7. मिथ्याज्ञानरूपः संशयः प्रमाणभूतः नास्ति, अप्रमाणमेव विसंवादित्वात्। अविसंवादिज्ञानमेव प्रमाणं भवति।

8. मिथ्यादर्शनरूपः संशयः संसारपरिभ्रमणस्य कारणं भवति।

9. मिथ्याज्ञानरूपः संशयः प्रश्नरूपः जिज्ञासारूपः वा न भवति। प्रश्ने जिज्ञासायां संशये च भेदो वर्तते।

10. एवमेव अवग्रहज्ञानमपि संशयरूपं न भवति। संशये अवग्रहज्ञाने च महदन्तरम्।

**संदर्भः–**


1. न्यायदीपिका, 1/8 ('सम्यग्ज्ञानं प्रमाणम्')
2. न्यायदीपिका, 1/8
3. न्यायदीपिका, 1/9
4. तत्त्वार्थवार्तिकम्, 1/15
5. मोक्षपंजिका, 5
6. मलयगिरिवृत्तिः, 2
7. सप्तभंगीतरंगिणी, पृष्ठ 6
8. न्यायदीपिका, 2/11
9. तत्त्वार्थवार्तिकम्, 1/15/9
10. तत्त्वार्थवार्तिकम्, 1/15/10
11. सर्वार्थसिद्धिः 8/1
12. प्रमेयकमलमार्तण्डः, 1/1, पृष्ठ 141

# संशयस्वरूपविचारः

डॉ. संगीता खन्ना

सत्स्वरूपाणां प्रमााणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वज्ञानात्मोक्षप्राप्तिर्भवतीति गौतमी दृष्टिः शास्त्रस्य वैलक्षण्यं वितनोति। प्रमाणादयः षोडशसंख्याकासद्रूपा पदार्थाः, येषां यथार्थज्ञानार्थमिह सूत्रकारेणोपदेशः[1] कृतः। पदार्थमात्रस्य इति सत्यं सन्नपि न्यायविद्यायाः संशयादयः प्रतिपाद्याः पदार्थाः पृथक्प्रस्थानाः, वेदत्रयीवार्तादण्डनेतिविद्यात्रय-प्रतिपाद्यपदार्थावृन्दापेक्षया स्वरूपवैलक्ष्यण्यविशिष्टाः, पृथक्प्रतिपादानीयाः सन्ति, पृथगुपपादनयोन्यत्वात्। तेषां संशयादीनां प्रमाणप्रमेयाभ्यां पृथक्कथनमन्तरेण इयमाऽऽन्वीक्षिकी न्यायविद्या वेदान्तविद्यैव स्याद् यथोपनिषदः। मोक्षसाधनीभूततत्त्वज्ञानमात्रस्य वेदान्तेन प्रतिपादितत्वादेव, यदि न्यायविद्या संशयादीनां प्रतिपादनं परित्यज्य मोक्षसाधनीभूतं तत्त्वज्ञानमात्रं प्रतिपादयति तर्हि अस्या वेदान्तविद्यात्वमेव स्यान्नैरर्थक्यमप्यापद्येतेति। तस्मात् वेदान्तविद्यातः पृथक्क्रियते इयं चतुर्थी आन्वीक्षिकी न्यायविद्या संशयादिपदार्थनिरूपणेनेति वार्तिककारमतम्।[2] अपि च प्रमाणप्रमेयाभ्यां पृथक् संशयादिभिः पदार्थैः प्रस्थाप्यते न्यायविद्येति उद्योतकराणामाशयः।

प्रमेयापेक्षया संशयस्य पृथक्ववचनं सप्रयोजनमस्ति। यतः न्यायप्रवृत्तेः संशयाधीनत्वात् संशयस्य प्रधान्यं प्राप्तं तेन प्रमेयात् पृथगुच्यते संशयः। न्यायः विचार इति सर्वथाऽज्ञातेपि पदार्थे न प्रवर्तते, सर्वथाऽज्ञातविषयकविचारस्यासंभवात् नापि निर्णीते पदार्थे विचारः प्रवर्तते, विचारफलस्य निर्णयस्य पूर्वप्रज्ञात्वात्। स च विचारः संशयिते एव प्रवर्तते। सामान्यतो ज्ञाते विशेषतश्चाज्ञाते संशयो संशयो भवति। अत्र सूत्रप्रमाणमस्ति–"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः"[3] इति। तर्कविषये विसृश्यपक्षप्रतिपक्षाभ्यां यदर्थावधारणं स निर्णय इत्यन्वयः।

इदमेवं वा नैवं वेति संशयं कृत्वा संदिग्धविषयक खण्डनमण्डनाभ्यां य: सिद्धार्थविषयक: निश्चय:, स निर्णय इत्यर्थ:, तदनेन सूत्रेण निर्णयस्य संशयपूर्वकत्वमुक्तमिति संशयिते एव विचार: प्रवर्तते इति सिद्धम्। अथायं क्रमं–प्रथमं संशय: तदनन्तरं न्यायप्रवृत्तिस्तया निर्णय इति। स चायं संशय किमिदं स्थाणुर्वा पुरुषो वा इत्याकारकं वस्तुविमर्शमात्रं निश्चयरहितं ज्ञानमेव। स च यद्यपि प्रमेयत्वात् प्रमेयेऽन्तर्भूत एवेति न पदार्थान्तररूपेण वक्तव्यस्तथापि न्यायप्रवृत्तिस्तदधीनत्वात्तस्य पृथग्गणना पदार्थेषु कृताऽभिमता च।

"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्श: संशय:"[4] इत्यनेन सूत्रेण लक्षित: संशय:। समानधर्मोपपत्ते: अनेकधर्मोपपत्ते: विप्रतिपत्ते: उपलब्ध्यव्यवस्थात: अनुपलब्ध्यव्यवस्थातश्च विशेषधर्मनिर्णयापेक्षं किमिदमित्याकारकमनिश्चयात्मकं ज्ञानं संशय इति सूत्राशय:। संशयस्य पञ्च कारणानि[5] मतान्तरे च समानानेकधर्मोपपत्तिमेकीकृत्य चत्वारि कारणानि[6] एवञ्च वार्त्तिके तात्पर्यटीकायाञ्च[7] उपलब्ध्यनु-पलब्ध्यव्यवस्थेति हेतुद्वयमस्वीकृत्य त्रीणि कारणानि अभिलक्ष्य संशयभेदा: वर्णिता:।

तत्र प्रथमकोटिकस्संशयस्समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शरूपो वर्तते। यत्र सदृशधर्माणामुपलब्ध्या विशेषं बुभुत्समान: किंस्विदिति नावधारयति अन्यतरमिति तदनवधारणात्मकं ज्ञानं संशयो भवति।

**संदर्भ:**

1. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वा-भासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्नि:श्रेयसाधिगम:। न्यायसूत्रम् 1.1.1
2. न्यायवार्तिकम्, 1.1.1 ।
3. न्यायसूत्रम्, 1.1.41 ।
4. न्यायसूत्रम्, 1.1.23 ।
5. वात्स्यायनभाष्यम्, 1.1.23 ।
6. न्यायभाष्ये, प्रसन्नपदव्याख्या, 1.1.23 ।
6. (क) न्यायवार्तिकम्, 1.1.23
   (ख) तात्पर्यटीका, 1.1.23

# न्यायशास्त्रदृष्ट्या संशयस्वरूपनिर्वचनम्

डॉ. वेङ्कटेशशर्मा

**स संशयो मतिर्यास्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्[1]॥**

तथा च एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः। उभयसाधारणधर्मज्ञानम्, असाधारणधर्मज्ञानं, विप्रतिपत्तिवाक्यजन्यकोटिद्वयज्ञानं संशयस्य कारणं भवति। एकवृत्तिभावाभावविषयकज्ञानत्वस्य वृक्षे कपिसंयोगतदभावज्ञानेऽतिव्याप्तिस्तद्वारणाय एकधर्मिकविरुद्धेति पदम्। वृक्षे कपिसंयोगतदभावयोरविरुद्धत्वात् तद्वारणम्। भूतलं घटवद् पृथिवीघटाभाववतीत्यत्र ज्ञानेऽतिव्याप्तिवारणाय एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेति उक्तम्। भूतलं घट-तदभाववत् इति ज्ञानवारणाय विरुद्ध भावाभावेति पदम्। भूतलं भूतल-तदभावाभावमिति ज्ञान वारणाय प्रकारकमिति। इच्छादिवारणाय ज्ञानमिति पदम्।

ननु भूतलं संयोगेन घटवत् समवायेन घटाभाववच्च इतिज्ञानेऽतिव्याप्तिः इति चेन्न तत्सम्बन्धावच्छिन्न तन्निष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताकविशेष्यतानिरूपित तत्संबन्धावच्छिन्नप्रतियोगिताकतद्विरुद्धं तदभावनिष्ठप्रकारताकज्ञानत्वमिति विवक्षणात्। वस्तुतस्तु स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानत्वं संशयत्वम्।

अन्ये तु तद्विरोधविशिष्टदैशिकविशेषणतासंसर्गावच्छिन्नप्रकारतानिरूपकत्वं तत्संशयत्वम्। अपरे तु तन्निष्ठप्रकारतानिरूपिता या प्रतियोगितासम्बन्धावच्छिन्न तन्निष्ठप्रकारता निरूपिताऽभावत्वावच्छिन्नप्रकारतानिरूपिता च विशेष्यता तन्निरूपकत्वं तत्संशयत्वमिति वदन्ति।

कोटिद्वयसहचरितत्वेन गृह्यमाणो यो धर्मः ऊर्ध्वत्वादिस्तत्प्रकारक-निश्चयः संशयकारणम्। तेन घटत्वतदभावसहचरित पटत्ववानयमिति भ्रमात्-"अयं घटो न वा" इति संशयोत्पत्तिः। उच्चैस्तरत्वम्–स्थाण्वस्थाणुसाधारण धर्ममुच्चैस्तरत्वं संशयधर्मिणिज्ञात्वा " अयं स्थणुत्ववान् तदभाववान्वा" इति संदिग्धे स्थाण्वस्थाणु सहचरितत्वेन वर्तमानग्रहविषय-धर्मप्रकारकपुरोवर्तिविशेष्यकज्ञानात् पुरोवर्तिविशेष्यकस्थाणुत्वतदभावकोटिसंशयो भवति।

अत्र साधारणधर्मवद्धर्मिज्ञानजन्यकोटिद्वयस्मरणस्यैव संशयजनकत्वं धर्मिज्ञानं तु प्रयोजकत्वमात्रम् इति प्राचीनानामाशयः। नवीनास्तु–कोटिद्वयस्मरणक्षणे एव संशयोत्पत्तिसंभवात् क्षणविलम्बकल्पनायां मानाभावात् साधाारणधर्मवद्धर्मिज्ञानजन्य कोटिद्वयस्मरणत्वेन कारणत्वे गौरवात् तत्तद्व्यक्तित्वेन हेतुत्वे व्यभिचारात् साधारणधर्मवद्धर्मिज्ञानत्वेन हेतुत्वं युक्तमिति।

अत्र "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः[2]" इति गौतमसूत्रे "विरुद्धकोटिद्वय-वाक्यात्मकविप्रतिपत्तेः" शब्दो नित्यो न वा इत्याकारिकायाः अर्थद्वयस्मृतिद्वारा संशयजनकत्वमुक्तं तत्खण्डयति–"विप्रतिपत्तिस्तु शब्दो नित्यो न वा इत्यादि शब्दात्मिका न संशयकारणं भवति[3]" तथा च संशयात्मक शाब्दबोधोऽपि नाङ्गीकर्त्तव्यः। शब्दज्ञानस्य व्याप्तिज्ञानस्य अतिदेशवाक्यार्थज्ञानस्य च प्रत्यक्षान्यनिश्चयमात्रजनकत्वात्मक असाधारणधर्मवत्त्वात्। तथा च विप्रतिपत्यादि शब्दज्ञानं न संशयजनकं प्रत्यक्षान्यनिश्चयकारणत्वात् व्याप्तिज्ञानादिवत् इत्यनुमानेन विप्रतिपत्तेः संशयाजनकत्वसिद्धिः।

अनेन सूत्रेण संशयस्य विशेष–लक्षणत्रयं लभ्यते।

1. समानधर्मोपपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्
2. अनेकधर्मोपपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्
3. विप्रतिपत्तेः विशेषापेक्षत्वे सति विमर्शत्वं संशयस्य लक्षणम्

विषयस्वरूपानवधारणप्रत्ययत्वमपि संशयस्य सामान्यं लक्षणं भवति। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेत्यस्य अर्थः क्रियते न्यायतात्पर्यटीकाकारेण[4] साधकबाधकप्रमाणाभावाच्च। तथाच साधकबाधकप्रमाणाभावात् विशेषापेक्षायाः

गृह्यमाणविशेषस्मरणाच्च संशयो जायते। स्थाणुर्वा पुरुषो वा एवं सत्त्वे सति विभागजननात् किं द्रव्यं, गुणः कर्म वा शब्दः। उपलब्ध्यनुपलब्ध्यव्यवस्थानत्वे सति तद्गत विशेषानुस्मृतौ च सत्यां संशयो भवति इन्द्रियाणि भौतिकानि अभौतिकानि वा। समानविरुद्धकोटिद्वयसाधारणधर्मशब्दस्य तात्पर्य-मुक्तमुदयनाचार्येण उर्ध्वत्वं सदृशपरिमाणवत्त्वञ्चानयोः ज्ञानात् संशयो भवति। असाधारणानेकधर्मज्ञानात् संशयो भवति। विरुद्धकोटिद्वयोपस्थापकात् शब्दादपि संशयो जायते। उदयनाचार्यैः उक्तं लक्षणमालायाम्[5]–

यद्यपि शब्दस्य न संशायकत्वं तथापि शब्दात् कोटिद्वयोपस्थितौ मानसः संशयो भवति। रत्नकोशकारनये पक्षप्रतिपक्षपरामर्शसम्बलेनदशायां संशयकारानुमितिर्जायते। इति।

उदयनाचार्येण संशयस्य त्रीणि लक्षणानि निरूपितानि।

1. साधारणधर्मवद् धर्मिज्ञानजन्यत्वं संशयस्य लक्षणम्।
2. असाधारणधर्मवद् धर्मिज्ञानजन्यत्वं संशयस्य लक्षणम्।
3. विरुद्धकोटिद्वयोपस्थापकशब्दजन्यत्वं संशयस्य लक्षणम्।

द्वितीयवाचस्पतिमिश्रेणोक्तम्– यत् प्रमाणैरर्थपरीक्षणं न्यायः। तस्य पूर्वाङ्गत्वं संशयादिषु त्रिषु विद्यते। तेष्यन्यतमत्वात् संशयनिरूपणं भवति। यदा न्यायस्य निरूपणं भवति तस्याङ्गत्वात् पूर्वाङ्गत्वाद् वा संशयस्य निरूपणं क्रियते ग्रन्थकारेण यतोहि न्यायनिष्पादकप्रथमज्ञानगोचरत्वमेव पूर्वाङ्गत्वमिति। यद्यपि पूर्वाङ्गत्वं प्रयोजनस्य दृष्टान्तस्यापि च विद्यते तथापि सन्दिग्धे पदार्थे प्रयोजनस्य दृष्टान्तस्य च चिन्ता जायते न तु प्रयोजनमनुसन्धाय संशयो भवति। अत एव प्रयोजनादुत्कर्षत्वात् संशयनिरूपणं ग्रन्थकारेण कृतमिति द्वितीयवाचस्पतिमिश्रोऽपि प्रतिपादयति। अथवा प्रयोजनस्येच्छा निरूप्यत्वात् इच्छाविशेषस्य च संशयाधीनत्वात् संशयस्य प्रयोजनतः उत्कर्षात् संशयस्य निरूपणं भवति।

एकस्मिन् विषये विरोधिनानाप्रकारकं ज्ञानं संशयः इति। समानधर्मोपपत्तेः संशयो भवति अत्र द्वितीयवाचस्पतिमिश्रैः उक्तम् परस्परनिषेधवदुभयविधिप्राधान्यात्[6] साधारणस्य लक्ष्यतावच्छेदकमुर्ध्वत्वादयः धर्माः भवन्ति इति ततः संशयो जायते इति। प्रमाणपरीक्षामुख्यत्वेऽपि

सर्वपरीक्षासंशयपूर्विका इति निरूपयितुं प्रावृतिकक्रमप्राप्तप्रवृत्तिबाधरूप: प्रावृत्तिकक्रमबाध:। स च शाब्द: आर्थ: पाठक:, प्रावृत्तिक, ऐच्छिक:, स्थानिक:, आङ्गिक:, प्राधानिकश्चेति अष्टधा भवति। तत्र शब्दप्रतिपाद्य: शाब्द: अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति। आर्थ: प्रयोजक: अग्निहोत्रं जुहुयात्, यवागुं पचति, अत्र पाठकक्रमेण यवागूपाकस्य चरमत्वेन यदि चरमानुष्ठेयतयैव स्यादिति। पाठपौर्वापर्योपस्थापितन्यायगम्य: क्रम: पाठकक्रम: यथा समिधो यजति। प्रथमप्रवृत्तिनियम्य: क्रम: प्रावृत्तिक: यथा पशूननक्ति, पशूनभ्युक्षति इत्यादय:, ऐच्छिको यथा पशूननक्ती इत्यत्र कुतश्चिदेव पशुतोऽञ्जनमिति। संशयस्य परीक्षायां पूर्वपक्षरूपेण पञ्च सूत्राणि सन्ति। समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद् वा न संशय: इति अर्थात् समानधर्ममात्रात्, अनेकधर्ममात्राद् स्वाध्यवसायरहितात् न संशयो भवति।

"विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च"[7] अर्थात् विप्रतिपत्तिमात्राद् अध्यवसायमात्राद् वा न संशयो भवति। यदि समानधर्मादिभ्य: स्वाध्यवसायरहितेभ्य: कारणेभ्य: संशय: स्यात् तदा तेषां कारणानां सततं विद्यमानत्वात् नित्यसंशय: स्यादिति। चेन्न। समानानेकधर्मोपपत्ते: विशेषापेक्षो संशय:। विप्रतिपत्ते: विशेषापेक्षो संशय:। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो संशय:। उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो संशयो भवति। वल्लभाचार्यैरुक्तम् परस्परविरुद्धार्थावमर्शत्वं संशयस्य लक्षणम्। वर्धमानोपाध्यायैरुक्तम्–

1. एकस्मिन् धर्मिणि विरोधि[8]नानाप्रकारवैशिष्ट्यं संशयविषय: इति।

2. अत्र केचन वदन्ति जिज्ञासा[9]जनकत्वे सति ज्ञानत्वं संशयस्य लक्षणम् अस्य लक्षणस्य अपेक्षणीयसंशयेऽव्याप्ति: यद्युच्यते संस्काराजनकत्वे सति ज्ञानत्वं संशयस्य लक्षणं तदा क्वचित् निश्चयेऽतिव्याप्तिरिति। यदि एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय: तदा वाक्यजज्ञाने-ऽतिव्याप्ति:। अत: विरोधिनानारूपावच्छिन्नविषयताप्रतियोगिज्ञानत्वं संशयस्य लक्षणम्। न्यायलीलावतीप्रकाशविवृत्तिकारोऽपि भणति–

एकस्मिन् धर्मिणि विरोधिनानावैशिष्ट्यविषयक[10] ज्ञानत्वं संशयस्य

स्वरूपमिति।

शङ्करमिश्रस्तु एकधर्मिकविरोधि[11]नानाप्रकारकज्ञानत्वं संशयस्य लक्षणमिति वदति। उदयनाचार्यैः उच्यते सम्भावना[12] हि सन्देहः इति। एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानत्वं[13] संशयस्य स्वरूपमिति अन्नंभट्टः, न्यायबोधिनीकारस्तु एकधर्मावच्छिन्नविशेष्यतानिरूपिताभावाऽप्रकारकज्ञानत्वं[14] तत्स्वरूपमिति निरूपयति। अन्नंभट्टस्य लक्षणे एकस्मिन् इति पदं न दीयते तदा "घटपटौ" इति ज्ञाने घटत्वपटत्वरूपविरुद्ध-नानाधर्मवैशिष्ट्यावगाहित्वात् अतिव्याप्तिः। विरुद्धपदं न दीयते तदा घटः पृथिवी इत्यत्र एकस्मिन् धर्मिणि घटे घटत्वपृथिवीत्वरूपनाना धर्मवैशिष्ट्यावगाहित्वादतिव्याप्तिः। नानापदानुपादाने "पटत्वविरुद्ध घटत्ववान् घटः इत्यत्र अतिव्याप्तिर्दुर्वारैव। एकस्मिन्[15] पुरोवर्तिनि पदार्थे विरुद्धत्वेन व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां सम्बन्धः तदवगाहिज्ञानत्वं संशयपदार्थः। एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारता-शालिज्ञानत्वं संशयस्य[16] लक्षणम्। अथवा स्वावच्छिन्न प्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन विषयिताविशिष्ट-विषयिताशालिज्ञानत्वं[17] संशयस्य लक्षणमिति कृष्णवल्लभाचार्योऽपि वदति। संशयं प्रति कारणानि तु अधोलिखितानि भवन्ति।

एकविंशतिदुःखध्वंसात्मक मोक्षलाभाय यथा प्रमाणस्य प्रमेयस्य च ज्ञानमेक्षितं भवति तद्वदेव संशयनिराकरणपूर्वकनिश्चय प्रतिपादन द्वारा संशयज्ञानस्यापि मोक्षहेतुता सिद्ध्यति। यतः यावत् संशयस्य निराकरणं न संभवति तावन्निश्चयज्ञानमपि न कथमपि उपलभ्यते, अथ च असति संशयस्य निराकरणे कुत्रापि यज्ञधर्मानुष्ठानादिषु पुरुषस्य प्रवृत्तिः न कथमपि सम्भवति, अतः संशयस्यावश्यकता न हि संशयसंग्रहणाय सम्भवति अपितु संशयनिरासाय संशयस्यापेक्षा। यथा लोकजीवने अस्माभिः स्वमित्रस्य स्वशत्रोश्च ज्ञानमवश्यं करणीयं भवति, अर्थात् कः अस्माकं शत्रुः कश्च मित्रमिति ज्ञानमत्यन्तमपेक्षितं भवति स्वजीवन संरक्षणाय। शत्रोर्ज्ञानं शत्रुनिवारणार्थं शत्रुविनाशार्थं चापेक्षितं भवति मित्रस्य च ज्ञानं मित्रलाभार्थं प्रीतिसंवर्धनार्थं च सिद्ध्यति। एवमेव संशयस्यापि पदार्थत्वेनोपदेशः संशयः निराकरणपूर्वकतत्वज्ञानलाभाय कृतः न तु संशयसंग्रहणाय इति विचारः। वस्तुतः स्वरूपत्वेन संशयः बाधकः यथा

इदं कार्यमस्माकं कल्याणाय अस्ति न वा, धर्मेण ऊर्ध्वगमनं भवति न वा, यज्ञेनाभीष्टसिद्धिः सम्भवति न वा, मातृ–पितृ–गुरु–देवपूजनेन भद्रं भविष्यति न वा, यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिः योगसिद्धिः भविष्यति न वा यद्येवंविधः सर्वत्र संशयो विद्यते चेत् तर्हि धर्मे–यज्ञे–पूजनादौ च जनानां प्रवृत्तिः नहि कथमपि भविष्यति, अतः उक्तस्थलेषु संदेहस्य निराकरणं नितान्तमपेक्षितं अर्थात् संशयस्य तत्वज्ञानेन संशयनिवृत्तिद्वारा निश्चयज्ञानेन प्रवृत्तिः सम्भविष्यति। धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण, यज्ञेन नूनमभीष्टसिद्धिः, मातृ–पितृ–गुरु–देवपूजनेन सिद्ध्यन्ति मनोरथाः इत्यादि वचनेषु नितान्तं विश्वासो अपेक्षितः। एवं सति तदाचरणे जनाः प्रवृत्ताः भविष्यन्ति, एवमेव संशयज्ञानस्यापि मोक्षविषये सन्देहनिवारणद्वारा विश्वाससम्पादनद्वारा मोक्षजनकत्वमिति मम आशयः।

1. कारिकावली–का. सं. 130।
2. न्यायसूत्रम् 1/1/23।
3. किरणावली टीका–का. सं. 130।
4. न्यायतात्पर्यदीपिका पृ. 9
5. लक्षणमाला
6. न्यायतत्त्वालोकः द्वितीयवाचस्पतिविरचितः।
7. न्याय.सू. अ. 2 आ. 1 सू. 2
8. न्या. ली. पृ. 412
9. न्या. ली. पृ. 413
10. न्याय लीलावती पृ. 412
11. न्या. ली. टी. पृ. 412
12. न्या. कु. तृ. स्तबकः
13. तर्कसंग्रहः पृ. 157
14. तर्कसंग्रहः न्या. पृ. 157
15. पदकृत्यम् पृ. 157
16. किरणावली पृ. 158
17. किरणावली टीका पृ. 158

# सांख्य-योगयोः संशयवादः

**प्रो. महेशप्रसाद सिलोड़ी**

सांख्ययोगयोः संशयः (विपर्ययज्ञानं) बहुधा प्राप्यते, यद्यपि सांख्ये पुरुषः नित्यशुद्धबुद्धोऽस्ति, तथापि अज्ञानजन्यपारवश्यात् स पुरुषः आत्मानं कर्त्ता, धर्ता भोक्ता स्वीक्रियते, यदा "ज्ञ" ज्ञानवान् पुरुषः स्वात्मनि शुद्धबुद्धस्वरूपात्मको भवति तदा तस्य स्वरूपमीश्वरकृष्णस्य कारिकानुसारं इत्थं प्रतीयते। लिखितमस्ति–

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।।** सां.का–64

अर्थात् तत्त्वज्ञानेन संशयनाशो भवति, तत्त्वेन विषयेण विषयिज्ञान–मुपलक्ष्यति, उक्तप्रकारं तत्त्वविषयज्ञानाभ्यासाद् नैरन्तर्यदीर्घकालसेवितात् सत्त्वपुरुषान्यतासाक्षात्कारज्ञानमुत्पद्यते, तत्त्वविषयश्चाभ्यासेन तत्त्वसाक्षात्कारं जनयति, संशयविपर्ययो हि ज्ञानस्याविशुद्धी तद्रहितं विशुद्धं भवति। नियतमनियततया गृह्णन् संशयोऽपि विपर्यय इति स्वीक्रियते। तेन अविपर्ययाद् इति संशय-विपर्ययभावो दर्शितः।

अत्र संशयः उपस्थाप्यते– स्यादेतत् उत्पद्यतामीदृशाभ्यासात् तत्त्वज्ञानम् तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्यम्। तन्निबन्धनस्य संसारस्यानुच्छेदप्रसंगः जायते। "कैवलम्" विपर्ययेणासम्भिन्नम्। यद्यप्यनादिविपर्ययवासना तथापि तत्त्वज्ञानवासनया तत्त्वविषयसाक्षात्कारमा–दधत्याऽऽदिमत्यापि शक्या समुच्छेतम् ग्रन्थकारैः स्वीकृतम्।

यदा पुरुषः ज्ञानवान् भवति तदा स आत्मानं प्रकृतेर्भिन्नः स्वीकुरुते तस्य विपर्ययसंशयात्मकं निरस्यति। "नास्मि न मे नाहम्" इत्यात्मनि क्रियामात्रं निषेधयति।

पूर्वपक्षरुपेण शास्त्रे अग्रेऽपि संशय उदेति– पुरुषस्य साक्षात्कारान्मुक्तश्चेत्तदन्तरमेव मुक्तस्य तस्य देहपातः स्यादिति कथमदेहः प्रकृतिं पश्येत्। अथ तत्त्वज्ञानेऽपि न मुच्यते कर्मणामप्रक्षीणत्वात्, तेषां कुतः प्रक्षयः, भोगादिति चेत् तत्त्वज्ञानं न मोक्ष साधनम् इति व्यक्ताव्यक्तज्ञानजन्मना। तत्त्वज्ञानेनापवर्ग इति। भोगेन चापरिसंख्येयः कर्माशय-प्रचयोऽनियत विपाककालः क्षेत्तव्यः ततश्चापवर्गः प्राप्तिरित्यपि मनोरथमात्रम्भवतीति।

**शंकां समाधीयते–**

**सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।**
**तिष्ठति संस्कारवशाच्चक्रभ्रमविद्धतशरीरः।**

तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्माशयप्रचयो दग्धबीजभावतया न जात्यायुर्भोगलक्षणाय फलाय कल्पते। उत्पन्नतत्त्वज्ञानमपि च संस्कारवशात् तिष्ठति, यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशात् भ्रमस्तिठति। कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। प्रक्षीयमाणाविद्या विशेषश्च संस्कारस्तद्वशात् तत्सामर्थ्याद् धृतशरीरस्तिष्ठति। योगदर्शनेऽपि संशयात्मकज्ञानस्य उल्लेखः प्राप्यते, योगदर्शने याः वृत्तयः सन्ति तासु पञ्चवृत्तिषु "विपर्ययः" इति प्राप्यते, महर्षिणा पतञ्जलिना प्रोक्तम्–**"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्"** मिथ्याज्ञानं संशयात्मकं ज्ञानं वर्त्तते। विपर्ययभ्रमसंशयानां ग्रहणं भवति। यत्र द्विचन्द्रदर्शनं जायते तत्र विपर्ययो-मिथ्याज्ञानं बोद्धव्यम्। यत्र रज्वां सर्पज्ञानं तत्रापि भ्रमे ज्ञानाऽऽरूढाऽप्रतिष्ठिता, तस्मादप्रतिष्ठितं ज्ञानं बाध्यं यथार्थरज्जुत्वप्रकारक-रज्जुविशेष्यकज्ञानेनेति भ्रमो न प्रमा न वा प्रमाणमिति। यत्र च वृक्षस्तरवे इरतः स्थाणुर्वा पुरुषो वेति ज्ञानम्–स संशयः तत्र विषयगताऽप्रतिष्ठिता। मिथ्याज्ञानं-भ्रमः संशयभेदादिति व्याख्यानं युक्ततरं भाति। अत्र संशये–पञ्चपर्वा–अविद्याऽस्मिता–राग–द्वेषाऽभिनिवेशात्मिका क्रमशस्तमो–मोह–महामोह–तामिस्राऽन्धतामिश्र–संज्ञिका इति। अनात्मस्वात्मबुद्धेरेवाऽविद्या-त्वेनैतादृशस्याऽविद्यास्तु अस्याऽस्मितादावभावात् तथापि तेषां विपर्ययजन्यत्वेन कार्यकारणयोरभेदाद्विपर्ययव्यवहार इति बोध्यम्। प्रकृतिमहदहंकार-पञ्चतन्मात्रेषु अनात्मभूतेष्वात्मबुद्धिरविद्या, इत्थं यानि तत्त्वानि अनित्यानि सन्ति तानि

नित्यस्वीकरणे एव अविद्या, अविद्या संशयवादः नाम विपर्ययज्ञानं विपर्ययज्ञामेव संशयः।

पातञ्जलयोगसूत्रे सम्प्रज्ञातस्वरूपं सूत्ररूपेण लिखितमति–

**वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः। 1-17**

तत्र विशेषेण तर्कणम्– अवधारणं स्थूलस्येति वितर्कः, तेन सहकृतो निरोधः सवितर्कः। अर्थात् यत्र संशयज्ञानम्भवति तत्रैव तर्कः समुदेति तत्र स्थूलं विहाय सूक्ष्माऽऽलम्बने चित्तस्यैकाग्रता सम्पादिका। पूर्वं कुत्रचिदपि संशयो भवति, सूक्ष्मावलम्बनो विचारः प्रकटितः। पूर्वसंशयः नश्यति। सवितर्कः, सविचारः, सबीजः एतत् सर्वं पूर्वसंशयात्मकं ज्ञानं वर्त्तते।

अग्रेऽपि योगर्शने समाधिपादे संशयं अवतारयन्ति–

**व्याधिस्त्यानसंशयप्रमादाऽऽलस्याऽविरतिभ्रान्तिदर्शनाऽलब्ध-भूमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। 1-30**

योगक्रमे नवविधाः अन्तरायाः बाधकाः भवन्ति तासु संशयोऽपि बाधकतमः। योगस्य मुक्तिफलजनकत्व-तदजनकत्वोभयप्रकारकज्ञानम् तासु मध्ये कृतेऽपि प्रयत्ने कस्या अपि लाभाभावः। तत्र मनसः स्थितिः संकल्पविकल्पात्मिका भवति। इत्थं शास्त्रसम्मतं संक्षेपेण संशयप्रकरणं उपस्थापितम्।

# सांख्ययोगशास्त्रे सन्देहवादः

डा. रविशङ्करशुक्लः

सर्वे विदन्ति, भारतीयषडास्तिकदर्शनानि प्रमेयभूतान् पदार्थान् निरूपयन्ति। एवङ्क्रमे काचिद् पदविद्या, वाक्यविद्या, प्रमाणविद्येति नाम्ना विश्रुता। प्रमाणं विना कस्यचिद् शास्त्रस्य प्रतिष्ठा नैव भवति। अतोऽत्र प्रमाणशास्त्रे प्रमाणविचारैस्सह पदार्थानपि विचारयन्ति। पदार्थचिन्तनमध्ये पदार्थानामपि संख्या षोडष्वेव परिकल्पितः। एष्वेव पदार्थेषु संशयो नामकं पदार्थमङ्गीकरोति न्यायशास्त्रम्।

अयं संशयः कः? तल्लक्षणं किमुच्यते–

**“एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः” इति।**

सोऽयं संशयः आगमशास्त्रे संवादरूपत्वेन वर्णितः। कस्याऽपि शास्त्रस्य विषय-प्रतिपादने ज्ञाने वा एकः प्राश्निकः अपरश्च समाधाता, “संशयेन विजानाति संशयात्मा विनश्यति' श्रुत्युक्तन्यायेनायं संशयः तत्त्वज्ञानं प्रति कारणं भवति, विनाशकारणमपि, पुरा संशयेनैव प्रश्नोत्तरपूर्वकं ज्ञानमधिगच्छन्ति स्म। वह्विषु श्रुतीष्वपि अनयैवरीत्या जनाः तत्त्वज्ञानमधिगच्छन्ति स्म। ऋग्वेदेऽपि बहुस्थले संवादरूपेण संशयः दृश्यते, पदे-पदे मनसि वा समुदिते संशये राजानो वा ब्राह्मणो वा स्वसंशयछेत्तुं तत्त्वज्ञानिनां ब्रह्मचिन्तनपरायणानां वा समीपं गच्छन्ति स्म। तत्र गत्वा संशयं नश्यन्ति च। एषैव सरणिः संवादनाम्ना प्रसिद्धः आसीत्। ऋग्वेदे बहवः संवादाः प्राप्यन्ते–याज्ञवल्क्यमैत्रायणिसंवादः, यमनचिकेतासंवादः, उद्दालकश्वेतकेतुसंवादः प्राप्यते, सैव सरणिः आगम-शास्त्रेऽपि दृश्यते। गुरुशिष्य-संवादरूपा सा।[1] यदा कदाऽपि कस्मिंश्चिद्विषये संशयमुद्भवन्ति स्म अनयैव विधिना संशयमपाकुर्वन्ति स्म। एषैव विषयः, चिन्तनपरम्परा

आसीत्, पूर्वेषां मनीषिणां विचारशीलानाञ्च, अधुनाऽयं संशयविषयः यो हि नैयायिकानां मते–

पदार्थत्वेनाङ्गी क्रियते, स च संशयो[2] न त्रिविधः न वा पञ्चविधः किन्त्वेक विध एव प्रकारान्तरेण तु द्वैविध्यं सूत्रकृदेव स्पष्टयति। तद् द्विविधः संशयो बहिर्विषयकोऽन्तरविषयकश्च, बहिर्विषयकोऽपि दृश्यमान-धार्मिकोऽदृश्यमानधार्मिकश्च। वैशेषिकसूत्रोपस्कारे एवं विधं यल्लक्षणं प्रतिपादितं तल्लक्षणं सांख्ययोगनये कथं विषयत्वेन विचार्यते? सांख्ययोगनये अयं संशयः न त्रिविधः पञ्चविधः एकविधो वा तेन विधिना न निरूपितो वर्तते, अपित्वयं संशयः कुत्र-कुत्र स्थले कैस्कैः रूपैः सांख्ययोगशास्त्रीय-ग्रन्थेषु निरूपितमाचार्यैः। तदेव शोधनिबन्धेऽस्मिन् उपस्थाप्यते, "स च संशयः सांख्ययोगशास्त्रे बन्धत्वेनोक्तः कुत्रचिद् व्याधित्वेन उक्तः आचार्यैः–केनचिद् उच्यते एकपदार्थज्ञानमपरपदार्थज्ञानं स्मारयति इतिधिया विचार्यते। गीता योगशास्त्रस्य शिरोमणिरूपा यथाशिरसि मणिः प्रकाशयति। तद्वदेव गीता समग्रस्य शास्त्रस्य मणिरिव वर्तते संशयविषये गीता वदति–

कच्चिदेतत्.... .... .... .... ।

कच्चित्किमेतन्मयोक्तं श्रुतं श्रवणेनावधारितं पार्थ, त्वयैकाग्रेण चेतसा चित्तेन, किं वा अप्रमादतः। कच्चिदज्ञानसंमोहोऽज्ञाननिमित्तः संमोहो विचित्तभावः किं प्रनष्टः? यदर्थोऽयं शास्त्रश्रवणायासस्तव, मम चोपदेष्टु-त्वायासः प्रवृतस्ते तव धनञ्जय

अर्जुनो वदति–

नष्टो मोहः .... .... .... .... ।

नष्टो मोहोऽज्ञानजः समस्तसंसारानर्थहेतुः सागर इव दुस्तरः। स्मृतिश्चात्मतत्त्वविषया लब्धा, यस्या लाभात्सर्वग्रंथीनां विप्रमोक्षः त्वत्प्रसादात्तव प्रसादान्मया त्वत्प्रसादामाश्रितेनाच्युत। अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति। यतः ज्ञानात् मोहनाश आत्मस्मृतिलाभश्चेति।

तथाच श्रुतौ अनात्मविच्छोचामीत्युपन्यस्य आत्मज्ञानेन सर्वग्रन्थीनां विप्रमोक्ष उक्तः। "भिद्यते हृदयग्रंथिः" [मु. 2.2.8] "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" [ईश.7] इति। एवमेव गीतायां संशयस्य विषये उक्तञ्चः–

"संशयो न कर्तव्यः" यथा– अज्ञश्चाश्रद्धधानश्च .... ..... अज्ञश्चेति। अश्रद्धानश्च अज्ञश्चानात्मज्ञश्च गुरुवाक्यशास्त्रेषु अविश्वासवांश्च संशयात्मा च संशयचित्तश्च विनश्यति। अज्ञश्चाश्रद्धधानौ यद्यपि विनश्यतस्तथापि न तथा यथा संशयात्मा। संशयात्मा तु पापिष्ठः सर्वेषाम्। कथं नायं साधारणोऽपि लोकोऽस्ति, तथा न परो लोको, न सुखं तत्रापि संशयोत्पत्तेः संशयात्मनः संशयचित्तस्य। तस्मात्संशयो न कर्तव्यः।

यस्मात्कर्मयोगानुष्ठानादशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते गीता....6। कर्मभिर्ज्ञानाग्निदग्धकर्मात्वादेव, यस्मात् च ज्ञानकर्मानुष्ठानविषये संशयवान्विनश्यति–

**"तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः।**
**छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥"**

तस्मात्पापिष्ठमज्ञानसंभूतज्ञानादविवेकाज्जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना शोकमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः। खड्गस्तेन ज्ञानासिना आत्मनः स्वस्य आत्मविषयत्वात्संशयस्य। न हि परस्य संशयः परेणच्छेत्तव्यतां प्राप्तो येन स्वस्येति विशिष्येत। अत आत्मविषयोऽपि स्वस्यैव भवति। छित्त्वैनं संशयम्। **स्वविनाश**हेतुभूतं **योगं सम्यग्दर्शनोपायं** कर्मानुष्ठानमातिष्ठ कुर्वित्यर्थः। उत्तिष्ठ च इदानीं युद्धाय भारतेति।

सांख्यतत्त्वकौमुद्यां विपर्ययशब्दस्य बहुधा विचारं करोति, सांख्ययोगपक्षतः, सन्देहवादस्य चर्चा मयाऽत्र निबन्धेऽस्मिन् क्रियते।

सन्देहो नाम मिथ्याज्ञानं। इदं मिथ्याज्ञानं विपर्ययशब्देनाऽपि कथ्यते। सांख्यकारिकायाः चतुश्चत्वारिंशत्कारिकादारभ्य सप्तचत्वारिंशत्कारिका-पर्यन्तमाख्यातं विपर्ययशब्देन। संशयवादः तच्च विपर्ययशब्दः गुणवैषम्यभेदतः, प्रसंगभेदतश्च अनेकैर्नामभिर्व्यवह्रियते। एष प्रत्ययसर्गः, विपर्ययाशक्तिः तुष्टिसिद्धयः।

गुणवैषम्य विमर्दात्[3], तस्य च भेदास्तु पञ्चाशत् "एष" इति प्रतीयतेऽनेनेति प्रत्ययो बुद्धिः, तस्य च सर्गः। तत्र विपर्ययः-अज्ञानमविद्या, साऽपि बुद्धिधर्मः। अशक्तिरपि करणवैकल्यहेतुकाबुद्धिधर्म एव। "तुष्टिः सिद्धि" अपि वक्ष्यमाणलक्षणे बुद्धिधर्माविव। तत्र विपर्ययाशक्तितुष्टिषु यथायोग्यं सप्तानाञ्च धर्मादीनां ज्ञानवर्जान्तर्भावः सिद्धौ च ज्ञानस्येति।

**"पञ्चविपर्ययभेदा भवन्त्याशक्तिश्च करणवैकल्यात्।**
**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः॥**[4] का. 47

पञ्च इति अविद्याऽस्मितारागद्वेषाभिनिवेशा यथा-सांख्यं तमोमोहमहामोहतामिस्रसंज्ञकाः पञ्च विपर्ययविशेषाः विपर्यय-प्रभवानामप्यस्मितादीनां विपर्ययस्वभावत्वात् यद् वा यद्विद्यया विपर्ययेणावधार्यते वस्तु, अस्मितादयस्तत्स्वभावाः सन्तस्तदभिनिविशन्ते, अत एव पञ्च पर्वा अविद्येत्याह-भगवान् वार्षगण्यः। तदेव विपर्ययज्ञानं योगदृष्ट्या विचार्यते-योगसूत्रं-"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्"[5]

अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः-शुक्तिकायां रजतज्ञानं तिष्ठति। तस्यार्थस्य यत्पारमार्थिकं रूपं न तत् प्रतिभासयति इति यावत्। संशयोऽप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानं यथा स्थाणुर्वा पुरुषो वा? यथा रज्जौ सर्पभ्रान्तिः, मृगस्य मरीचिकायां भ्रमः, शुक्तौ च रजतः भ्रमोत्पत्तिस्थैव भ्रमपूर्णज्ञानं विपर्ययशब्देन निगद्यते, सन्देहपरिपूर्णज्ञानं विपर्ययनाम्ना समाम्नातम्। यस्य वस्तुनो यदि वास्तविकं स्वरूपं तद् विरुद्धसन्देहाभावे, तदनुभव एव अतद्रूपप्रतिष्ठितशब्दार्थः। यथैकस्मिन् चन्द्रमसि द्विचन्द्रदर्शनम्, आत्मनि अनात्मनि वा सुखे दुःखे च संशयः, श्रीमता भगवता व्यासेनेदं मिथ्याज्ञानं पञ्चावयवैर्विभक्तम् तथाहि-"तमो-मोहो-महामोहस्तामिस्रोह्यन्धसंज्ञितः, अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः।"

समस्तक्लेशमूलस्वरूपेषु अनित्याशुचिदुःखादिषु विपरीत ज्ञानमूलिका अविद्यैव तम उच्यते।[6] बुद्धिप्रतिबिम्बितस्य चैतन्यस्य प्रकृतिसङ्गवसात् स्वस्य प्रकृत्यभिन्ना स्वीकृतरूपा अस्मितैव मोहः। संयमादिशून्यपुरुषस्य "सर्वं मम सुखकरं स्यात्" इति राग एव महामोहः। दुःखानेककारण-विद्यमानतायामपि "मम दुःखं न स्यात्", इति द्वेषमूलको विपर्ययभाव एव

तामिस्रशब्दवाच्य:। "जीवशरीरस्याऽनित्यत्वेऽपि मम मृत्युर्न भवेत्" इति मरणत्रासरूपोऽभिनिवेश[7] एव अन्धतामिस्रनाम्ना प्रोक्त:, एवं किल पञ्चपर्वविभक्तविपर्ययज्ञानेन, अनेकानि मिथ्याज्ञानमुत्पाद्य जीवसंसारचक्रे भ्रमयन्ति, अतो हि पुरुषस्य स्वरूपप्रतिष्ठाधिगमाय विपर्ययज्ञान-निरोधोऽत्यावश्यक:।

सांख्यदर्शनदृष्ट्या संशयवाद: बहुचर्चित: इति–

**संदर्भ:–**

1. गुरुशिष्यपदे स्थित्वा स्वयं देव: सदाशिव:। प्रश्नोत्तरपदैर्वाक्यैस्तन्त्रं समवतारय स्वच्छन्दतन्त्रम्।
2. वैशेषिकसूत्रोपरस्कारे द्रष्टव्य:
3. सांख्यकारिका, कारिका 46
4. सांख्यकारिका, कारिका सं.–47 सांख्यतत्वकौमुदी द्रष्टव्या
5. पातञ्जलयोगदर्शनम्, सूत्र सं.–8
6. पातञ्जलयोगदर्शनम्, साधनपाद: सूत्र सं.–5
7. पातञ्जलयोगदर्शनम्, साधनपाद: सूत्र सं.–9

# सांख्ययोगदृष्ट्या संशयसमालोचना

**डॉ. मारकण्डेयनाथ तिवारी**

एकस्मिन् धर्मिणि विरुद्धभावाभावप्रकारकं ज्ञानं संशय[1] इति नैयायिकाभिमतं संशयलक्षणम्। अयं हि संशयः अप्रमाज्ञानस्य भेदविशेषः।[2] अप्रमाज्ञानं तावत् त्रिविधम्-संशयः विपर्ययः तर्कश्च।

सांख्ययोगशास्त्रे संशयस्य निरूपणं नैव विद्यते किन्तु विपर्ययस्वरूप एव संशयः, तत्रैव संशयस्यान्तर्भावः। योगसूत्रकारः महर्षिपतञ्जलिः वदति–**"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितम्"**[3] इति। अत्र विपर्ययः लक्ष्यनिर्देशः, लक्षणञ्च मिथ्याज्ञानमिति। नैयायिकाः मिथ्याज्ञानत्वं विपर्ययस्यैव लक्षणं मन्वते।[4] तत्र संशयविपर्ययोर्मध्ये भेदः। संशयस्तावत् द्विकोटिकः चतुष्कोटिको वा भवति। यथा–अयं स्थाणुर्न वा अयं पुरुषो न वा, अयं स्थाणुर्वा पुरुषो वेति क्रमशः उदाहरणम्।[5] तद्विपरीतं विपर्ययः–यथा–रज्जो सर्पज्ञानम्। तद्भाववति तत्प्रकारकं ज्ञानं तत्।

सांख्ययोगमते विपर्ययः न तद्रूपो न स्वसमानाकारो यो विषयः तत्प्रतिष्ठं तद्विशेष्यकमित्यर्थः। भ्रमस्थले ज्ञानाकारस्यैव विषये समारोपः संशयस्याप्यत्रैवान्तर्भावः। स च विपर्ययः प्रमाणबाध्यत्वात् न प्रमाणभूतः। अत्रेयं जिज्ञसा जायते यद् अविद्या, विपर्ययः, मोहः पर्यायभूतः शब्दः। एवञ्च सति मोहवृत्योरभेदात् कथं शांतघोरमूढ़त्वं वृत्तीनामिति सिद्धान्तो घटेतेति चेन्न धर्म, धर्मी अभेदेनैव अत्र वृत्तीनां विपर्ययादिरूपविभागः। मिथ्याज्ञानरूपः विपर्ययः अविद्यास्वरूपः।

सेयमविद्या पञ्चविधा। यथोक्तम्-सेयं पञ्चपर्वाभवत्यविद्या। अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति। पञ्चपर्वा या अविद्या सा संसारानर्थबीजम्। इयमेव मिथ्याज्ञानरूपा वृत्तिरेव। अत्र विष्णुपुराणवचनमपि प्रमाणभूतम्। यथोक्तम्–

**तमो मोहो महामोहस्तमिस्त्रो ह्यन्धसंज्ञकः।**
**अविद्या पाञ्चपर्वैषा प्रादुर्भूता महात्मनः।।**[6]

एतेषामेव च प्राधान्येनावान्तरविभागः सांख्यकारिकायामीवश्वरकृष्णेन प्रोक्तम्–

**भेदस्तमोऽष्टविधो मोहस्य च दशविधो महामोहः।**
**तामिस्त्रोऽष्टादशधा तथा भवत्यन्तधतामिस्त्रः।।**[7]

तथाविद्या अविद्या कीदृशीति जिज्ञासायामाह सूत्रकारः–

**"अनित्यायुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या"**[8] इति। तत्र प्रथमतया अविद्या का? इति प्रश्नोदेति–अविद्या इत्यत्र नञ् समासः,[9] पूर्वपदार्थप्रधानो वा स्यात् यथा-अमक्षिकम्। अराजपुरुषवदत्र उत्तरपदार्थप्रधानो वा, अमक्षिकोदेशेत्युदाहरणवत् अन्यपदार्थप्रधानो वा? तत्र पूर्वपदार्थप्रधानत्वे विद्यायाः प्रसज्य प्रतिषेधो गम्यते, न चास्याः क्लेशादिकारणत्वम्। उत्तरपदार्थप्रधानत्वे विद्यैव कस्यचिद्भावेन विशिष्टागम्येत, सा च क्लेशादिपरिपन्थिनी न तु तद्बीजम्, नहि प्रधानोपघाती प्रधानगुणोयुक्तः तदनुपघाताय गुणे त्वन्यायकल्पना, तस्माद् विद्यास्वरूपनुपद्याताय नमोऽन्यथाकरणमध्याहारो वा निषेध्यस्येति।

अन्यपदार्थप्रधाने त्वविद्यमानविद्याबुद्धिर्वक्तव्या, न चासौ विद्याया अभावमात्रेण क्लेशादिबीजम्, विवेकख्यातिपूर्वक निरोध सम्पन्नाया अपि तथात्वप्रसङ्गात्, तस्मात् सर्वथैवाविद्याया न क्लेशादिमूलकता अत आह–तस्याश्चामित्रागोष्पदवस्तुसत्त्वं विज्ञेयम् इति।

वस्तुनो भावो वस्तुसतत्वं वस्तुत्वमिति। तदनेन न प्रसज्य प्रतिषेधः नापि विद्यैवाविद्या, न तद्भावविशिष्टाबुद्धिः अपितु विद्याविरुद्धं विपर्यज्ञानमविद्या। संसारे सर्वानर्थबीजं तु अविद्या एव। अविद्या पुरुषं नश्यति। अतएवोक्तं अविद्या पापाज्जायते।

गरुड़पुराणे अविद्यायाः स्वरूपमित्थं विद्यते–

**अनात्मन्यात्मविज्ञानमसतः सत्स्वरूपता।**
**सुखाभावे तथा सौख्यं मायाऽविद्याविनाशिनी।।**[10]

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनापि–

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**[11]

इमामेव असति सद्बुद्धिरूपामविद्यामादाय **"प्रपञ्चः अविद्याकः"**[12] इति श्रुतिस्मृतिडिण्डिमः। अविद्याशब्दस्य ज्ञानविशेषे रूढत्वावधारणात् आधुनिकवेदन्तिनामन्यार्थत्वोपवर्णनं स्वातन्त्र्यमात्रमवधेयम्। त्रिगुणात्मकप्रकृतावविद्याशब्दो गौणः, अविद्ययाऽत्मन्यारोपितत्वात् जडत्वाच्च। विद्याऽविद्याशब्दयोर्ज्ञानाज्ञानवाचित्वेन आत्मानात्मवाचित्वात्। अस्मिन्श्च दर्शने सांख्यानामिवविवेको नाविद्याशब्दार्थः किन्तु नैयायिकादिवत् विशिष्टज्ञानमेव[13]।

**संदर्भ ग्रन्थः**

1. तर्कसंग्रहे
2. न्यायसिद्धान्तमुक्तावली
3. पतञ्जलयोगसूत्रम्- 1.8
4. मिथ्याज्ञानं विपर्ययः5 मुक्तावली टीका
6. तत्ववैशारदी
7. श्रीविष्णुमहापुराणम्8 सांख्यकारिका 48
9. पातञ्जलयोगसूत्रम्- 2.5
10. श्री गरुणपुराणम्11 श्रीमद्भगवद्गीता
12. केनोपनिषद्
13. तत्ववैशारदी–2.5

# किं संशयहेतुरनेकान्तवादः?

**डॉ. अनेकान्तकुमारो जैनः**

अमृतचन्द्राचार्यैः अनेकान्तस्य लक्षणं कृतम्—'एकस्मिन् वस्तुनि वस्तुतत्त्वनिष्पादकपरस्परविरुद्धशक्तिद्वयप्रकाशनमनेकान्तः।'[1] अकलंकदेवाचार्यैः सप्तमशताब्द्यां राजवार्तिके लक्षणं कृतं— 'उभयनयगुणप्रधानभावापादितार्पितानर्पितव्यवहारसिद्धिविशेषबललाभप्रापितयुक्तिपुष्कलार्थः अनेकान्तवादः।'[2]

धर्मो गुणश्च द्वावपि वस्तुनःनित्यावयवौ स्तः। परन्तु द्वयोरन्तरोऽपि विद्यते। धर्माः सदा सापेक्षाः भवन्ति। परस्परं विरुद्धप्रतीयमानाः युगलरूप एवोपलभ्यन्ते यथा नित्यता-अनित्यताएकानेकादिः। गुणाः निरपेक्षाः विशेषाभासरहिताः भवन्ति यथाऽत्मनः ज्ञानदर्शनसुखादयः। अनेकान्तप्रकरणे मुख्यरूपेण परस्परं विरुद्धप्रतीयमानानां धमर्माणामेव चर्चा विधीयते। वस्तुनि सम्भाव्यमानाः परस्परविरुद्धधर्मा एवोपलभ्यन्ते नत्वसम्भाव्याः। यथाऽत्मनि नित्यानित्यरूपसम्भाव्यमानाः विरुद्धधर्मास्तु विद्यमानाः सन्ति परन्तु चेतनाचेतनरूपविरुद्धधर्माणामसत्ता विद्यते। वस्तुतः चेतनाचेतनातापरस्परं विरुद्धधर्मौ स्तः परन्तु नित्यत्वमनित्यत्वञ्च परस्परं विरुद्धौ नापितु परस्परं विरोधिनौ प्रतीयेते। तेषां सत्ता एकस्मिन् द्रव्ये सदैव प्राप्यते।

शंकाकारेण शंकाक्रियते—'तदेवास्ति तदेव नास्ति तदेव नित्यं तदेवानित्यम्' इति चानेकान्तप्ररूपणं छलमात्रमिति'। समाधानं—'तन्न, कुतः? छललक्षणाभावात्। छलस्य हि लक्षणमुक्तम्—'वचनविघातोऽर्थविकल्पोपपत्त्या छलम्' इति। यथा 'नवकम्बलोऽयम्' इत्यविशेषानिहितेऽर्थे वस्तुरभिप्रायादर्थान्तरकल्पनम् 'नवास्य कम्बला न चत्वारः इति, नवो वास्य कम्बलो न पुरातनः' इति नवकम्बलः। न तथा अनेकान्तवादः। यत् 'उभयनयगुणप्रधानभावापादितार्पितानर्पितव्यवहारसिद्धिविशेषबललाभ-प्रापितयुक्तिपुष्कलार्थः अनेकान्तवादः।[3]

अत्र पुनः शंका भवति किं संशयहेतुरनेकान्तवादः? कथम्? एकत्राधारे विरोधिनोऽनेकस्यासंभवात्। आगमश्चैवं प्रवृत्तः—'एकं द्रव्यमनन्त

पर्यायम्' इति। किमागमप्रामाण्यादस्ति वा नास्ति वा नित्यं वा अनित्यं वेति? अकलंकदेवाचार्यैः समाधानं क्रियते– विशेषलक्षणोपलब्धेः। इह सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः। तद्यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशान्धकारकलुषायां वेलायामूर्ध्वत्वमात्रं सारूप्यं पश्यतो वक्रकोटरवयोनिलयनादीन् स्थाणुगतान् विशेषान् वस्त्रसंयमन-शिरःकण्डूयन-शिखा-बन्धनादीन् पुरुषगतांश्चाऽनुपलभमानस्य तेषां च स्मरतः संशय उत्पद्यते, न च तद्वदनेकान्तवादे विशेषानुपलब्धिः, यतः स्वरूपाद्यादेशवशीकृता विशेषा उक्ता व्यक्ताः प्रत्यक्षमुपलभ्यन्ते। ततो विशेषोपलब्धेर्न संशयहेतुः इति यदगदिष्म तत्सम्यग्निरजैष्म।

अत्र शंका क्रियते–एवमपि संशयः। कथम्? इदं तावदसै प्रष्टव्यः–एषामस्तित्वादीनां धर्माणां साधकाः प्रतिनियता हेतवः सन्ति वा, न वा? यदि न सन्ति; विप्रतिपन्नप्रतिपादनासंभवः। अथ सन्ति; एकत्र विरुद्धसाधनहेतुसन्निधाने सति भवितव्यं संशयेनेति? उच्यते–विरोधाभावात् संशयाभावः। यदि विरोधोऽभविष्यत् संशयोऽजनिष्यत्। न च विरोधो नयोपनीतानां धर्माणामस्ति। कुतः? अर्पणाभेदादविरोधः पितापुत्रादिसम्बन्धवत्। उक्तादर्पणाभेदाद् एकत्राऽविरोधेनावरोधो धर्माणां पितापुत्रादिसंबन्धवत्। तद्यथा– एकस्य देवदत्तस्य जातिकुलरूपसंज्ञाव्यदेशविशिष्टस्य 'पिता पुत्रो भ्राता भागिनेयः'–इत्येवं प्रकाराः संबन्धा जन्यजनकत्वादिशक्त्यर्पणाभेदान्न विरुध्यन्ते। न ह्येकापेक्षया पितेति शेषापेक्षयापि पिता भवति, शेषापेक्षया वा पुत्रादिव्यपदेशार्ह इति उक्तापेक्षयापि पुत्रादिव्यपदेशभाक्। न च पितापुत्रादिकृतं संबन्धबहुत्वं देवदत्तस्यैकत्वेन विरुध्यते। तद्वदस्तित्वादयोऽपि न यान्ति विरोधमेकत्र।[4] इत्थं प्रकारेण जैनाचार्यैः शंकासमाधानं कृतवन्तः।

**संदर्भः–**


1. आचार्यामृतम्चन्द्रः–समयसार–आत्मख्यातिः टीका, प्रकाशकः टोडरमलस्मारकभवनम्, जयपुरम्
2. राजवार्तिकम् 1/6/8, पृ. 36, भारतीय ज्ञानपीठ, दिल्ली
3. वही, 1/6/9-11, पृ. 36
4. वही

# तर्कभाषादिशा संशयस्वरूपम्

**डॉ. कुलदीपकुमारः**

अस्माकं भारतीयदर्शनपरम्परायां तर्कविद्यायाः महत्त्वपूर्णं स्थानमस्ति। यतोऽहि जीवस्य दुःखानां मूलकारणम् एकमेव वर्तते-अज्ञानं, मिथ्याज्ञानम्, अतः दुःखनिवृत्तेः मूलकारणमपि एकमेव-**ज्ञानं, सम्यग्ज्ञानम्।** तथा इदं सम्यग्ज्ञानम् अथवा तत्त्वस्य समीचीनं ज्ञानं न्यायेन अथवा तर्केण एव सम्भवति। अन्यत् किमपि साधनं नास्ति येन तत्त्वस्य समीचीनं ज्ञानं सम्भवेत्।

**तर्कभाषाशब्दस्य व्युत्पत्तिः**

महर्षिणा गौतमेन स्वकीये ग्रन्थे षोडशपदार्थेषु 'तर्क' नामाख्योप्येकः पदार्थः स्वीकृतस्तस्य लक्षणञ्च कृतं 'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्व-ज्ञानार्थमूहस्तर्कः'। भावोऽयं यत् कारणानां युक्तीनाञ्च ऊहोऽर्थादनुसन्धान-नामकस्तर्कः। परन्तु न्यायतर्कभाषायाः टीकाकृद्भिः विद्वद्भिः 'तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः प्रमाणादयष्षोडशपदार्थास्ते भाष्यन्तेऽनया इति तर्कभाषा"[1] इति तर्कभाषशब्दस्य व्युत्पत्तिर्निर्धारिता।

**संशयशब्दस्य अर्थः**

संशयः 'सम् + शी + अच्' प्रत्ययेन निष्पन्नमस्ति। यस्य अनेके अर्थाः सन्ति। यथा-सन्देहः, अनिश्चितः, चपलता, सङ्कोचः, शङ्का, अनिर्णयः, भयः, सम्भावना, अस्थिरः इत्यादयः।

**तर्कविद्यायाः पर्यायवाचिनः**- विभिन्नेषु शास्त्रेषु तर्कविद्यायाः कृते अनेके पर्यायवाचिनः शब्दाः प्रचलन्ति। यथा-आन्वीक्षिकी[2], युक्ति[3], समीक्षा[4], वादविद्या, हेतुवादः, हेतुमार्गः, न्यायः, नीतिः, औचित्यं, विवेकः, विचारः, चिन्तनमित्यादयः।

तर्कविद्या उत वा तर्कशास्त्रं नाम सत्यतर्कान् असत्तर्केभ्यः पृथक्कुरुते। तत् सिद्धान्तानां, विधीनां च अध्ययनमस्ति तर्कशास्त्रस्य अध्ययनम्। अत्र एतस्य इदं तात्पर्यं नास्ति यत् येन तर्कशास्त्रं नाधीतं तेन सत्यतर्काः नोपस्थाप्यन्ते। परन्तु निश्चितमेतत् यत् येन तर्कशास्त्रमधीतं सः तर्कयुतानां सामन्यसिद्धान्तानां विषये ज्ञानवान् सन् तस्य जनस्य अपेक्षया अधिकः समर्थः भवति, येन तर्कशास्त्रं किञ्चिदपि नाधीतम्।

वैदिकदर्शनपरम्परायां सर्वप्रथमम् ऋषिमहर्षिभिः यद् अन्विष्टं येन च ईश्वरसाक्षात्कारः कृतः तद् ज्ञानमेव वेद इति प्रचक्षते। वैदिकदर्शनेषु एकदर्शनमस्ति यस्य अभिधानं वर्तते न्यायदर्शनम्। अस्य दर्शनस्य एकं अपरनाम अपि वर्तते–तर्कशास्त्रमिति। यत्र प्रमाणविश्लेषणं पदार्थविवेचनं च अत्यन्तं वैज्ञानिकरीत्या विहितमस्ति।

वस्तुतः न्यायदर्शनस्य परम्परा अत्यन्तप्राचीना इयमेव च तर्कवादिदर्शननाम्ना अपि निगद्यते। उपनिषद[5]–रामायण[6]–महाभारत[7]–मनु–स्मृति[8]–गौतमधर्मसूत्र[9]–अर्थशास्त्र[10]प्रभृतिग्रन्थेषु तर्कशास्त्रं हेतुविद्या–वादविद्या–न्यायविद्या–न्यायशास्त्र–प्रमाणविद्याऽनेकैर्नामभिः अभिधीयते।

न्यायतर्कभाषायां प्रमाया अर्थात् यथार्थज्ञानस्य साधनमेव प्रमाणमिति स्वीकृतमस्ति। 'प्रमायाः करणं प्रमाणम्' अर्थात् प्रमायाः करणमेव साधनमेव प्रमाणमिति। प्रमा नाम यथार्थानुभवः। इत्थं स्पष्टं प्रतीयते यत् प्रमालक्षणांशे यथार्थानुभवेति द्वयोः पदयोः समावेशः कृतो वर्तते। यदीत्थं पदयोः प्रयोगो न क्रियते चेत् 'यथार्थानुभवः प्रमा' स्थाने 'अनुभवः प्रमा' कथनेन संशयविपर्ययतर्केष्वर्थादयथार्थानुभवेऽपि लक्षणस्य अतिव्याप्तिः, एतेऽपि प्रमात्वेन ज्ञास्यन्ते। अलक्ष्यवृत्तित्वमतिव्याप्तिः। इति तल्लक्षणं, यथा शृङ्गित्वं गोर्लक्षणम् इति अस्य लक्षणस्य महिषादिपशुषु अतिव्यप्तिः। ननु संशय–विपर्यय–तर्कादीनां लक्षणं किमिति चेत् –

कस्यचित् पदार्थस्य यथावत् यथास्वरूपेण ग्रहणमेव यथार्थानुभवोऽर्थात् वस्तुनः यथार्थप्रतीतिर्यथार्थानुभवः। एतद्विपरीतमयथार्थानुभवः। अयथार्थानुभव एव अप्रमा।

अस्माकं भारतीयसंस्कृतौ एका प्रमुखा उक्तिरस्ति–**'ऋतेज्ञानान्न–मुक्तिः'** अर्थात् ज्ञानमन्तरा धर्मार्थकाममोक्षाख्य पुरुषार्थचतुष्टये मोक्षस्य

प्राप्त्यर्थं ज्ञानस्योपयोगित्वं विद्यते इति सर्वेषु दर्शनेषु तस्य ज्ञानस्य चिन्तनं सततं दृश्यते। परन्तु तत्र कस्य ज्ञानस्य मोक्षोपयोगित्वमिति जिज्ञासायां प्रायः सर्वैः दार्शनिकैः तत्त्वज्ञानस्य यथार्थज्ञानस्य कारणत्वं स्वीक्रियते। न्यायदर्शने ज्ञानं बुद्धिपर्यायः। सा च बुद्धिः स्मृत्यनुभवभेदात् द्विविधा। अत एव तर्कभाषाकारेण श्रीमताकेशवमिश्रेण 'यथार्थानुभवः प्रमा'[11]। इति प्रमाणलक्षणे स्मृतौ प्रमालक्षणस्यातिव्याप्तिवारणाय अनुभवपदं प्रयुक्तम्। एवञ्च संशयादौ अयथार्थज्ञानेऽतिव्याप्तिवारणाय यथार्थपदं स्वीकृतम्। उक्तञ्च 'यथार्थ इत्ययथार्थानां संशयविपर्ययतर्कज्ञानानां निरासः। अनुभव इति स्मृतेर्निरासः'[12] इति। एतेन ज्ञायते यत् तर्कभाषाकारेण ज्ञानस्य द्वैविध्यं स्वीकृतम्। तच्च ज्ञानं 'सर्वव्यवहारहेतुः गुणः' इति तर्कसंग्रहकारेण लक्षणं प्रतिपादितम्। अनुभवस्तु यथार्थायथार्थभेदेन द्विविधो भवति। यथार्थानुभवस्तु प्रत्यक्षानुमित्युपमितिशाब्दभेदेन चतुर्विधः भवतीति नैयायिकाः वदन्ति। जैनदार्शनिकमते तु परोक्षापरोक्षभेदेन द्विविधं भवति। अयथार्थानुभवस्तु संशयविपर्ययतर्कभेदेन त्रिविधः। उक्तं तर्कसंग्रहकारेण 'अयथार्थज्ञानं त्रिविधं संशयविपर्ययतर्कभेदात्[13]। एवञ्च ज्ञानेच्छादीनां सविषयत्वात् ज्ञानविषयस्य प्रमेयस्य सिद्ध्यर्थं न्यायसूत्रकारैः 'प्रमाणप्रमेयसंशयप्रयोजनमित्यादिसूत्रे षोडशपदार्थानां निर्देशः कृतः। तेषु षोडशपदार्थेषु तृतीयः पदार्थः संशयः। तस्य संशयस्य किं स्वरूपमिति जिज्ञासायां न्यायसूत्रकारैः इत्थं भाषितं यत् 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यऽव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[14] इति। अस्य सूत्रार्थस्य चिन्तने इदं ज्ञायते यत् विशेषापेक्षो विमर्शः संशय इति संशयस्य लक्षणं फलितं भवति। अर्थात् बुद्धिनिशेषो यत्र स विशेषापेक्ष एतादृशो किमिदमित्याकारकमनिश्चयात्मकं ज्ञानं संशय इति। समानधर्मेत्यादिकं तु संशयस्य कारणं भवति। तत्रेदं चिन्त्यते न्यायसूत्रकारैः यथा संशयस्य लक्षणं भाषितं तथैव जैनाचार्यैरपि संशयविषये तथैव सामान्यधर्मस्य प्रत्यक्षत्वेऽपि यत्र विशेषधर्मस्य प्रत्यक्षं नास्ति एवञ्च उभयोर्विशेषयोः यदि स्मरणं तर्हि संशयस्योत्पत्तिरिति। 'किं शुक्लमुत-कृष्णमित्यादि विशेष प्रतिपत्तेः संशयः'[16] इति अकलंकेनाप्युक्तम्। एवञ्च न्यायदर्शने यथा एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानस्य संशयत्वं स्वीकृतं विद्यते तथैव अभिनवधर्मभूषणयतिनापि जैनदर्शने संशयलक्षणमित्थं प्रतिपादितं - **'विरुद्धानेककोटिस्पर्शिज्ञानं संशयः।** यथा स्थाणु वा

पुरुषो वा इति'[17] सप्तभंगितरङ्गिण्यामपि विमलादासमहोदयेन संशयस्य इत्थं लक्षणं भाषितं यत् – **'एकवस्तुविशेष्यकविरुद्धनानाधर्मप्रकारकज्ञानं हि संशयः'**[18] इति। प्रमाणमीमांसायां च 'अनुभयत्रोभयकोटिस्पर्शी प्रत्ययः संशयः'[19]। सर्वार्थसिद्धौ च **'सम्यग्दर्शनज्ञानचारित्राणि किं मोक्षमार्गः स्याद्वा न वेत्यन्तरपक्षापरिग्रहः संशयः'**[20] इति। एतेन ज्ञायते यत् जैनदार्शनिकानां नये एकस्मिन् धर्मिणि विरुद्धनानाधर्मावगाहिज्ञानं संशय इति संशयलक्षणं फलितं भवति। तुलना क्रियते चेत् तर्हि इदमेव प्राप्यते शब्दे एव न्यायजैनयोः भेदः न तु अर्थे। यद्वा भवतु तर्कभाषाकारेण संशयस्य लक्षणं इत्थं प्रतिपादितं **'एकस्मिन् धर्मिणि विरुद्धनानाधर्मावमर्शः संशयः'**[21] इति। अभिप्रायस्तु एकस्मिन् धर्मिणि विरुद्धभावाभावावगाहिज्ञानं संशयः भवति। एकस्मिन् धर्मिणि यदि विरुद्धनानार्थावगाहिज्ञानं संशयः समूहालम्बनयोः विषयतायां भेदः दृश्यते। यतः संशये ययोः धर्मयोः ज्ञानं भवति तयोः परस्परविरुद्धज्ञानं संशयात् प्राग् भवति। समुच्चये च तथा नास्ति। एवञ्च संशये द्वयोः यत् विरुद्धज्ञानं भवति तत्र कोटिता नाम्नि पृथक् विषयता भवति, तादृश विषयतायाः आश्रयः धर्मो भवति, अतः तादृशधर्मौ कोटिपदवाच्यौ भवतः। परन्तु समुच्चये तादृशविषयतायाः अभावात् संशयसमुच्चयतोः भेदः। एवञ्च संशये प्रकारताद्वयनिरूपिता एकविषेष्यता भवति, समुच्चये तावत् प्रकारतायाः भेदात् विशेष्यतायां भेदः अतः अनयोः तत्त्वभेदात् समुच्चयः न संशयपदार्थः। स च संशयः कथं संभवति इति जिज्ञासायां तर्कभाषाकारेण संशयभेदं प्रदर्श्य तत् कारणं प्रदर्शितं तथाहि– 'स च त्रिविधः विशेषादर्शने सति समानधर्मदर्शनजः विप्रतिपत्तिः असाधारणधर्मजश्चेति'[22] इति। तत्र प्रथमस्तावत् उभयोः धर्मयोः समानत्वेऽपि यदि कस्यचित् विशेषस्य दर्शनं न जायते एवञ्च उभयोः एकत्र भासमात्वं विद्यते तत्र यो हि संशयः स समानधर्मदर्शनजः। उक्तञ्च मिश्रेण 'तत्रैको विशेषादर्शने सति समानधर्मदर्शनजः यथा स्थाणुर्वा पुरुषोवेति'[23] अर्थात् एकस्मिन्नेव धर्मिणि पुरोवर्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरं पुरुषत्वनिश्चायकं च करचरणादिकं विशेषमपश्यन् स्थाणुपुरुषयोः समानधर्म-मूर्ध्वत्वादिकं पश्यतः पुरुषस्य भवति किमयं स्थाणुर्वा पुरुषो वा इति। द्वितीयस्तावत् विशेषादर्शने सति विप्रतिपत्तिजः अर्थात् विप्रतिपत्तिवाक्यात् संशयो जायते। उक्तञ्च तर्कभाषाकारेण 'द्वितीयस्तु संशयो विशेषादर्शने

सति विप्रतिपत्तिजः, स यथा शब्दो नित्य उत् अनित्य इति'[24]।

अभिप्रायस्तु कश्चन् वदति शब्दो नित्य इति, अपरश्च वदति शब्दोऽनित्य इति एतादृशविप्रतिपत्त्या मध्यस्थस्य पुंसो विशेषमपश्यतो जायते संशयः किमयं शब्दो नित्यः अनित्यो वा इति। तृतीयस्तावत् असाधारणधर्मदर्शनजन्यो भवति। यथा नित्यादनित्याच्च व्यावृत्तेन भूमात्रा-साधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यत्वानित्यत्वसंशयः इति। अनेन प्रकारेण तर्कभाषाकारेण संशयलक्षणं प्रदर्श्य तद्भेदाः सोदाहरणमुप-स्थापिता।

संशये पदार्थानां निश्चयात्मकं ज्ञानं न जायते। अनिश्चयात्म-कत्वेनेदमपि अयथार्थमेव। तथैव तर्कोऽपि यतोहि अनेनापि न किमपि निश्चयात्मकं ज्ञानमतः तर्कोऽपि अनिष्टप्रसङ्गत्वादयथार्थज्ञानमेव। **'अविज्ञात-तत्त्वाऽर्थे कारणोपपत्तिस्तत्त्वज्ञानार्थमूहस्तर्क'** इति लक्षणम्। यद्यपि उभयविधमपि ज्ञानम् अवधारणात्मकं परन्तु अनुमानप्रवर्तकत्वात् संशयः परम्परया उपयोगी, तथाहि तर्कः तत्त्वज्ञाने साक्षादुपयोगी वर्तते।

**संदर्भग्रन्थाः**


1. न्यायसूत्रम् 1/1/40
2. कौटिल्यार्थशास्त्रम्, विद्योद्देशप्रकरणम्
3. नयचक्रम्, माइलधवलः, 261
4. धवला 1/1/1/10
5. बृहदारण्यकोपनिषद् 4/5, छान्दोग्योपनिषद् 7/1/2
6. वाल्मीकिरामायणम्, अयोध्याकाण्डम् 100/39
7. महाभारतम्, शान्तिपर्वः 180/47
8. मनुस्मृतिः 7/43
9. गौतमधर्मसूत्रम्, 11/3
10. अर्थशास्त्रम् 1/2/7
11. तर्कभाषा पृ. 14
12. तर्कभाषा पृ. 14
13. तर्कसंग्रहः
14. न्यायसूत्रम् 1/1/23
15. राजवार्तिकः 1/6/9/36/11
16. राजवार्तिकः 1/15/13/61/27

17. न्यायदीपिका 1/9
18. सप्तभङ्गीतरङ्गिणी 80/4
19. प्रमाणमीमांसासूत्रम् 1/1/5
20. सर्वार्थसिद्धिः 8/1/365/7
21. तर्कभाषा पृ. 570
22. तर्कभाषा पृ. 570
23. तर्कभाषा पृ. 570
24. तर्कभाषा पृ. 570

# वेदान्तदेशिकाभिमतसंशयस्वरूपविचारः

डॉ. सुदर्शनन् एस्

वेदान्तशास्त्रस्य यथावस्थिततज्ज्ञानाय न्यायशास्त्रस्योपकारकत्वं सर्वविदितम्—**काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्युक्तेः**। अत्र कणाद इत्युक्तिः न्यायशास्त्रस्याप्युपलक्षणम्। महर्षिगौतमप्रणीतन्यायशास्त्रस्य महर्षिकणादप्रणीतवैशैषिकदर्शनस्य च वेदान्तोपकारकत्वं वेदान्तदेशिकैः स्वकीये न्यायपरिशुद्धिनामके ग्रन्थे प्रतिपादितम्। तत्र हि वेदान्तार्थात्यन्त-विरोधावगमात्कणाददर्शनस्य कृत्स्नबहिष्कारः, गौतमीयन्यायदर्शनस्य क्वचिदविरोधादांशिकस्वीकारः, क्वचिद्विरुद्धांशानां परिष्कारः, केषाञ्चनांशाना-मत्यन्तं बहिष्कार इतिरीत्या न्यायपरिशुद्धिः कृता।[1]

अयञ्च विषयः ब्रह्मसूत्रकाराणामपि सम्मत इति श्रीभाष्यकारा अपि शिष्टापरिग्रहाधिकरणे सिद्धान्तयन्ति। तथा हि—एतेन वेदापरिगृहीत-सांख्यपक्षक्षपणेन शिष्टाश्च ते वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिताः वेदितव्याः इति हि श्रीभाष्यपङ्क्तिः।[2]

विविधैर्विप्लावितस्य न्यायशास्त्रस्य विद्यास्थानगणयस्य वेदान्ताविरोधपरिशुद्धिरेव न्यायपरिशुद्धिः। तदुक्तं—

**विद्यास्थानेषु धर्म्येषु गण्यते न्यायविस्तरः।**
**स च विप्लावितस्तैस्तैस्ततोऽत्र परिशोध्यते।।**[3]

तत्रस्थसंशयस्वरूपविचारः यथामति लेखेऽत्र प्रस्तूयते।

**सामान्यधर्मस्फुरणे सत्यप्रतिपन्नतद्विरोधप्रतिपन्नमिथो विरोधानेकविशेषस्फुरणं संशयः** इति संशयलक्षणम्।[4] तत्र सदृष्टान्तं विवरणमपि प्रस्तुतं—**यथोर्ध्ववस्तुमात्रग्रहणे सति तद्विरोधितयाननुसन्धीय-**

**मानयोर्मिथः स्फुटविरोधयोः स्थाणुत्वपुरुषत्वयोः स्फुरणम्** इति।

एकस्मिन्धर्मिण्यनेकधर्मप्रतीतिरेव सामान्यतया संशयशब्देनोच्यते। तथा हि प्रतीतिकाले धर्माणां मिथो विरोधः न भवति, सामान्यरूपेण तेषां धर्माणां धर्मिणि विद्यमानत्वात्। लोके च तयोर्मिथो विरोधः निश्चित एव। लक्षणे धर्मिस्फुरणे इति दलाभावे गोत्वाश्वत्वयोः परस्परविरुद्धधर्मयोरेतल्लक्षणस्यातिव्याप्तिः स्यात्। एतत्पदसत्वे तु धर्मिणोऽपि स्फुरणमपेक्षितमिति कृत्वाश्वत्वगोत्वादिविरुद्धधर्मान्केवलानादाय नातिव्याप्तिः। एवमेव गवाश्वादीनां परस्परभेदस्य निश्चितत्वेऽपि यत्र धर्मिस्फुरणं तत्रातिव्याप्तिवारणाय सामान्येति विशेषणं धर्मिस्फुरणे देयम्। सामान्य इत्यनेन धर्म्यैक्यं विवक्षितम्। तथा च भिन्नधर्मिकज्ञानमादाय नातिव्याप्तिः। एवमेव गोत्वाश्वत्वधर्मौ परस्परविरुद्धौ नैकस्मिन्सामान्ये धर्मिणि तिष्ठतः, तथापि तयोस्तुल्यप्रमाणत्वनिश्चयेन तत्र लक्षणस्यातिव्याप्तिसम्भवः, तन्निवारणाय अप्रतिपन्नविरोधयोरिति दलं प्रयुक्तम्। भ्रमनिश्चयेऽतिव्याप्तिवाराणाय प्रतिपन्नमिथो विरुद्धयोरिति पदमुपात्तम्। बहुकोटिकसंशयस्यापि संग्रहणाय लक्षणे अनेकपदप्रयुक्तिः। लक्षणस्थं विशेषपदं कोटिपदपर्यायं भवति।

तथा चान्धकारावृत-दूरस्थ-क्षेत्रादिष्वूर्ध्ववस्तुदर्शनेन स्थाणुर्वायं पुरुषो वेति संशयो भवति। स्थाणुत्वपुरुषत्वरूपौ धर्मौ लोके नैकस्मिन्धर्मिणि दृष्टिगोचरौ। तयोर्विरोधस्तु लोकसिद्धः। तथापि संशयस्थले न तयोर्विरोधप्रतीतिर्भवति, यतः ऊर्ध्वताकारविशिष्टसामान्यधर्मिस्फुरणे स्थाणुत्वपुरुषत्वधर्मौ सुलभतया प्रतीतियोग्यावेव। अतस्तत्र न विरोधः। परस्परधर्मयोर्विरोधाग्रहणादेव स्थाणुपुरुषयोः विकल्पो न भवति।[5]

अत्र स्थाणुत्वपुरुषत्वयोः परस्परविरोधाग्रहणादेव तयोः स्फुरणक्रमः डोलावेगवज्जायत इति कश्चित्पक्षः।[6] डोलावेगवदेवेन्द्रियसंयोगः स्थाणुत्वपुरुषत्वप्रकारके ज्ञाने कारणं भवति। यतः संशयस्थले समानकाल इन्द्रियसंयोगः स्थाणुत्वपुरुषत्वरूपधर्माणां क्रमशः सद्भावासद्भावरूपज्ञानमुत्पादयति। किन्त्विदं द्विप्रकारकं ज्ञानं लोके मिथो विरुद्धमिति स्पष्टमेव। सिद्धित्रयग्रन्थप्रणेतृभिः भगवद्यामुनवर्यैः संशयस्थले चैतन्यस्य विषयेण दृढसंयोगो निश्चयः, तथा बहुभिर्युगपत्दृढसंयोगः संशय इति निश्चसंशययोर्भेदः व्यवस्थापितः। एतदस्वीकारे ज्ञानस्य विपर्ययेण सह दृढादृढसंयोगनिरूपणमेव

न प्रसज्येत। संशयस्थले ज्ञानस्य प्रतीयमानधर्मैः सह सम्बन्धः क्रमशः क्षिप्रो भवति। किन्तु शीघ्रतावशात् क्रमस्य प्रतीतिर्न भवति। अपि तु युगपदित्येव भाति। अतस्तत्र स्थले युगपदपि शैघ्र्यार्थकमेव स्यात्। यौगपद्यस्वीकारेऽप्यदृढत्वं परस्परप्रतिक्षेपप्रकारविशेषे एवं भवति, नो चेदयमूर्ध्वो वा स्थाणुर्वेत्यादिसंशयोऽपि प्रसज्येत। एकस्य ज्ञानस्य विषयेण सह संयोगदार्ढ्यं नाम ज्ञानस्य निश्चयात्मकत्वम्। तस्यैव कोट्यंशेऽदार्ढ्ये संशयत्वसिद्धिः परस्परविरुद्धकोटिप्रतीतिभावात्।

केषुचिदविरुद्धेष्वपि स्थलेष्वात्मा ज्ञानं वा ज्ञाता वेत्यादिष्वधर्मादिमूलक-विरोधग्रहणादपि कदाचिद् संशयो भवति। एवमेव ज्ञानं धर्मो धर्मी वेत्यादिष्वप्यभिमानजन्यपरस्परप्रतिक्षेपित्वसत्वात् समानधर्मविप्रतिपत्तिभ्याम-साधारणहेतुभ्यामेव संशस्योत्पत्तिर्भवति। तत्त्वरत्नाकरकारणामपि संशयोत्पत्तिः समानधर्मविप्रतिपत्तिरूपसाधारणकारणाभ्यामेव।[7] समानधर्मजनितसंशयश्च यथा–उर्ध्वताविशेषात् स्थाणुर्वा पुरुषो वेति। विप्रतिपत्तिश्चागृह्यमाणबलतारतम्य-विरुद्धानेकज्ञापकोपस्थापनं भवति। सा च सजातीयविजातीयाभास-रूपाद्यनेकज्ञापकभेदाद् बहुप्रकारयुता भवति। विप्रतिपतौ यावन्ति ज्ञापकानि भवन्ति तावत्यः संशयस्य कोट्यः भवन्ति। विप्रतिपत्तिः सजातीयत्वं द्विज्ञापकप्रत्यक्षस्थले द्विज्ञापकानुमानादिस्थलेषु च भवति। यत्र चैकं ज्ञापकं प्रत्यक्षरूपमन्यच्चानुमानादिरूपं तत्र विजातीया विप्रतिपत्तिः। ज्ञापकद्वये एकमवश्यमेवाभासरूपं भवति। तथा च संशयकोट्युपस्थापकसजातीय-सजातीयाभासविजातीयविजातीयाभासाद्यनेकप्रकाराः विप्रतिपत्तयः भवन्ति।

* सजातीयप्रत्यक्षतदाभासविप्रतिपत्तिजन्यसंशयो यथा–चक्षुषा, दर्पणं समुखं न वेति।

* सजातीयानुमानतदाभासविप्रतिपत्तिजन्यसंशयो यथा–पर्वतोऽग्निमान् उतानग्निमान् वेति। तत्र धूमवत्त्वात्पर्वतोऽग्निमानिति, निरालोकत्वात्पर्वतो-ऽनग्निमानिति चानुमाने कारणं भवतः।

* सजातीयश्रुतिविप्रतिपत्तिजन्यसंशयो यथा–जीवब्रह्मणोः श्रुतिषु भेदाभेद-व्यपदेशाभ्यां जीवः ब्रह्मणा भिन्नोऽभिन्नो वेति संशयो भवति।

* सजातीयवादिविप्रतिपत्तिजन्यसंशयो यथा–वैशेषिकोक्तेन्द्रिय-भौतिकत्वश्रवणादौपनिषदाहङ्कारित्वश्रवणाच्च मध्यस्थस्य जायमानो किमिन्द्रियाणि भौतिकान्याहङ्कारिकाणि वेत्याकारकः।

* प्रत्याक्षानुमानविप्रतिपत्तिजन्यसंशयो यथा–काचकामलादिदोषग्रस्तचक्षुषः पुरुषस्य पीत–शङ्खभ्रमे जाते जायमानो किमयं शङ्खः पीतः सितो वेत्याकारकः।

* प्रत्यक्षागमविप्रतिपत्तिजन्यसंशयश्च–किमहमर्थः स्थूलोऽणुर्वेति। अत्र हि प्रत्यक्षेणाहमर्थत्वेन शरीरस्य ग्रहणात् स्थूलत्वज्ञानमागमप्रमाणेनाहमर्थस्य सूक्ष्मत्वकथनादणुत्वज्ञानम्।

* अनुमानागमविप्रतिपत्तिजन्यसंशयो यथा–किमिदं जगत् परिमाणूपादानकमुत ब्रह्मोपादानकम्। वैशिषकाः नैयायिकाश्च ह्यनुमानबलेन परमाणुं जगदुपादानकमभिधत्ते, वेदान्तिनश्च ब्रह्मेति। एवं प्रकारेण नाना-विप्रतिपत्तिजसंशयाः तत्तत् स्थले स्वमेवाधोविलासेन कल्पयितु शक्याः।

* वेदान्तदेशिकाः स्वकीये तत्त्वमुक्ताकलापग्रन्थेऽपि पूर्वोक्तं सर्वं संशयस्वरूपं सङ्गृह्य प्रत्यपादयन्। यथा–

एकाधारे विरुद्धाकृतियुगयुगपत्ख्यातिरन्योन्यबाध्या

डोलाविक्षेपकल्पा तदनियतिरियं धीक्रमे साक्षणी नः।

तस्मात् तत्तद्विशेषस्मृतिसमसमयं छन्नतत्तद्विरोधः

ख्यातः साधारणोऽर्थः परमिह विषये, येन बुद्ध्यन्तरं वः।।[8]

**संदर्भग्रन्थः–**

1. (क) यद्यपि कथञ्चिदक्षपादं सत्पक्षे निक्षेप्तुं शक्यं न च कणभक्षपक्षनि-क्षेपवत्क्लेशः–न्यायपरिशुद्धिः, वेदान्तदेशिकः, चौखम्बा विद्याभवनम्, वाराणसी, 1962, पृष्ठसंख्या-2

(ख) अङ्गीकाराकाङ्क्षणामक्षपादीयमप्यस्मदुक्तैकान्ततया स्थास्यत इति तथैव स्थापयिस्यामः। अतो वयमपि महतामुक्तार्थतात्पर्यकल्पनेन नापराध्येम। न्यूनाधिकविरुद्धव्यपदेशादीनां लक्षणलक्षणोक्तीनां चाध्याहारान्यपर्याभ्यां तद्भक्तैरपि

निर्वाहात्। तथास्मिन्यत्र स्फुटश्रुतिस्मृतिशारीरकविरोधः स उद्देशतो निरुह्यते। –तत्रैव पृष्ठ संख्या-9

2. श्रीभाष्यम्, भगवद्रामानुजाचार्याः– 2/1/23
3. न्यायपरिशुद्धिः, पृष्ठ संख्या-1
4. तत्रैव, पृष्ठ संख्या-37
5. अयं स्थाणुर्वा पुरुषो वेति मिथो विरोधाग्रहणे तयोर्विकल्पो न स्यात्। तत्रैव
6. तत एव डोलावेगवदत्र स्फुरणक्रम इत्येके। तत्रैव
7. तदुक्तं तत्त्वरत्नाकरे–कश्चैष संशयः कतिविधश्च। एकस्मिन्धर्मिणि विरुद्धानेकविशेषावभासः। स द्विविध इत्यादिना। न्यायपरिशुद्धिः, पृष्ठसंख्या-27
8. तत्त्वमुक्ताकलापः, श्रीमन्निगमान्तमहादेशिकाः, आर्षग्रन्थप्रकाशनम्, मैसूर, 2004, पृष्ठ संख्या-536

# अधिकरणावयवस्संशयः

डा. ए.एस. आरावमुदन्

प्रमाणप्रमेयसंशयादयः षोडशपदार्थाः इति महर्षिगौतमः तत्र तृतीयपदार्थः अस्ति संशयः। अयं च संशयः परीक्षायाः मूलकारणं भवति। संशयकारणानि तावत् 'सामान्यप्रत्यक्षात्, विशेषाप्रत्याक्षात्, विशेषस्मृतेश्च संशयः' इति प्रतिपादितानि। यथा– सामान्यप्रत्यक्षात्=समानधर्मवतः धर्मिणः प्रत्यक्षात्, विशेष अप्रत्यक्षात्=विशेष धर्मस्य अज्ञानात्, विशेषस्मृतेः=कोटिद्वय। स्मरणाच्च संशयः इति। यथा स्थाणुपुरुषयोः समानधर्मम् ऊर्ध्वपरिणामादिकं धर्माणि दृष्ट्वा विशेषस्य शिरःपाण्यादेः अज्ञानात् कोटिद्वयस्मरणाच्च भवति संशयः स्थाणुर्वा कोटिद्वयस्मरणाच्च भवति संशयः स्थाणुर्वा पुरुषो वा इति।

एक धर्मिकः नानाधर्मिकश्च संशयो भवति। नानाधर्मिको यथा स्थाणुर्वा पुरुषो वा इति। एकधर्मिकश्च यथा प्राकृतशिरसि चैत्रे अयं केशवान् निष्केशो वा इति भवति संशयः। अयं तावत् बहिर्विषयः संशयो भवति। आन्तरसंशयः विद्याऽविद्यातो भवति। ज्ञानप्रमाऽप्रमा संशयः भवति। ततः विषयसंशयः भवति। एवं प्रकारेण शास्त्रेषु संशयस्य विचारधारा दृश्यते। सूत्रितमेतत् भगवता गौतमेन 'समानानेकधर्मोपपत्तेः, विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थाश्च विशेषापेक्षो विमर्शस्संशयः इति। एकस्मिन् धर्मिणि विरुद्धनानाधर्मविशिष्टावगाहि ज्ञानं संशयः इति संशयस्य स्वरूपं भवति। अथच संशयः मीमांसाशास्त्रे अधिकरणावयवत्वेन प्रतिपादितो दृश्यते। अधिकरणावयवास्तावत् पञ्च इति केचन षड् इत्यपरे। तथा चोक्तम्–

**' विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम्॥** (विदुः इत्यपि)
**विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरः।**
**प्रयोजनं संगतिश्च शास्त्रेऽधिकरणं स्मृतम्॥'**

मीमांसाशास्त्रं तावत् वेदवाक्यानां तात्पर्यार्थनिर्णयार्थं प्रवृत्तम्। सर्वाण्यपि वेदवाक्यानि धर्मप्रतिपादकानि सन्ति। उक्तञ्चैतत्–

**धर्मे प्रमीयमाणे हि वेदेन करणात्मना।**
**इति कर्तव्यताभागं मीमांसा पूरयिष्यति॥**

अनेन इदं ज्ञातव्यं यत् वेदवाक्यानां धर्माख्याअर्थप्रतिपादनमात्र–तात्पर्यमस्तीति कारणादेव धर्मज्ञानसम्पादनमेव मीमांसायाः प्रयोजनमिति सिद्धान्तितम्। अत एव भगवता जैमिनिना सूत्रकारेणापि 'अथातो धर्मजिज्ञासा' इति आदावेव सूत्रितम्। उक्तञ्च वार्तिके–

**अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम्।**
**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्॥** इति

पूर्वमीमांसायां प्रमाणादयः द्वादश अध्यायाः सन्ति। अधिकरणानि च उपनिबद्धानि सन्ति। प्रायशः सर्वेष्वप्यधिकरणेषु उपर्युक्ताधिकरणावयवाः भवन्त्येव। यथा प्रथमसूत्रे एव 'अथातो धर्मजिज्ञासा' इत्यत्र संशयः एवं भवति 'लोकेऽयमथशब्दो वृत्तादनन्तरस्य प्रक्रियार्थो दृष्टः, नचेह किञ्चिद् वृत्तमुपलभ्यते, भवितव्यं तु तेन यस्मिन् सत्यनन्तरमं धर्मजिज्ञासाऽवकल्पते तथापि प्रसिद्धपदार्थकः सः कल्पितो भवति तत्तु वेदाध्ययनम्। तस्मिन् हि सति सावकल्पते। नैतदेवम्। अन्यस्यापि कर्मणोऽनन्तरं धर्मजिज्ञासा युक्ता प्रागपि न वेदाध्ययनात्। उच्यते–

तादृशीं तु धर्मजिज्ञासाम् अधिकृत्य अथशब्दं प्रयुक्तवान् आचार्यः या वेदाध्ययनमन्तरेण न संभवति। कथम्? वेदवाक्यानाम् अनेकविधो विचारः इह वर्तिष्यते। अत्र अस्मिन् अधिकरणे अर्थात् जिज्ञासाधिकरणे स्वाध्यायोऽध्येतव्यः इति विधिवाक्यं विषयः। किमयं विधिः स्वर्गाद्यर्थं स्वाध्यायाध्ययनं विधत्ते अथवा अर्थज्ञानार्थम् इति संशयः। अत्र अधीत्य स्नायात् इति स्मृतिबलेन अध्ययनानन्तरं स्नातकं कर्म अनुष्ठेयमिति ज्ञातत्वात् यदि अर्थज्ञानार्थम् अयं विधिरिति स्वीकुर्मः तर्हि स्मृतिरियं बाधिता स्यात् इति कृत्वा स्वर्गाद्यर्थमध्ययनम् इति प्राप्ते अध्ययनानन्तरं स्नातकं कर्म कर्तव्यम् इति पौर्वापर्ये एव स्मृतेः तात्पर्यं न तु अविलम्बानुष्ठाने इत्यादिना सयुक्तिकं प्रतिपाद्य अर्थज्ञानार्थमेव अध्ययनमिति सिद्धान्तितम्। एवमेव

सर्वेष्वप्यधिकरणेषु विचारधारा संशयमूला भवतीत्यत्र न कापि संशीतिः। एवञ्च सर्वेषामप्यधिकरणानां किमपि वेदवाक्यं विषयः भवति। तादृशं वेदवाक्यं कीदृशस्य अर्थस्य बोधकं भवतीत्यत्र संशयः तत्र एकतरनिरस्यकोटिः सयुक्तिका पूर्वपक्षो भवति। पूर्वपक्षकोटिनिरासपूर्वकस्वीकरणीयकोटिनिर्देशः सिद्धान्तो भवति। अर्थात् सर्वत्र अधिकरणेषु संशयस्य स्थानं मुख्यं भवतीति अनुभवसिद्धम्। यथा वा प्रथमाध्याये तुरीयचरणे 'संदिग्धेषु वाक्यशेषात्' इत्यनेन सूत्रेण वाक्यशेषस्य संशयनिवारणनिर्वाहकत्वं सिद्धान्तितम्। तथाहि– 'अक्ताः शर्कराः उपदधाति' 'तजो वै घृतम्' इति च श्रूयते। अत्र शर्करापदस्य लोकखण्डक अर्थः, अक्ताः इत्यनेन तेषां लोकखण्डनाम् अञ्जनं कर्तव्यम् इति तात्पर्यं निहितम् अस्ति। अत्र अञ्जनं तावत् केवलं द्रवद्रव्येणैव भवति न तु घनीभूतद्रव्येण, अर्थात् वालुकादिभिरिति सर्वविदितमिदम्। द्रवद्रव्येण कृताञ्जनानाम् उपधानं कर्तव्यमिति च गम्यते। उपधानं नाम राशिरूपेण घटनाविशेषः अधुना अत्र संशयः एवं भवेत् केन द्रवद्रव्येण अञ्जनं कर्तव्यमिति यतो हि अनेकानि द्रवद्रव्याणि उपलभ्यन्ते तैलं जलं घृतादिकम्। यद्यपि अत्र विधिवाक्ये नियतरूपेण कस्यापि द्रवद्रव्यस्य अञ्जनकर्मणि विहितता न दृश्यते तथापि संदिग्धेषु वाक्यशेषात् इत्यनेन सूत्रेण विधिवाक्य-प्रतिपाद्येऽर्थे संशयनिवारकः वाक्यशेषो भवतीति सूचितमस्ति। अतः तेजो वै घृतमिति वाक्यशेषेण घृतस्य स्तुतिः श्रूयते, स्तुतिर्हि तस्यैव अपेक्षिता भवति यस्य अनुष्ठानार्थसापेक्षा। तथा च घृतस्य स्तुत्या एतदवगम्यते ऽस्माभिः यत् घृतेन किमपि कर्तव्यम् इति। पूर्वं तु अञ्जनं कर्तव्यमिति विधिना बोधितम्, केन इति साधनं किमपि द्रवद्रव्यमपेक्षते एवञ्च पङ्ग्वंधन्यायेन, नष्टाश्वदग्धरथन्यायेन वा उभयोरपि परस्परसम्बन्धात् घृतेनैव अञ्जनं कर्तव्यम्, न तैलादिभिरिति निर्णयः सिद्धो भवतीति निरूपितम्। एवमेव संशयेनैव विना शास्त्रेषु विचारधारा नैव प्रवहितुमर्हति इत्यस्मात् कारणादेव संशयस्य महत्वपूर्णं स्थानं शास्त्रेषु दरीदृश्यते। परन्तु शास्त्रकाराः महर्षयः विना संशयेन अर्थात् निश्चप्रचं स्वस्वशास्त्रप्रतिपाद्यान् सिद्धान्तभूतान् अर्थान् सुचारु उपदेशयामासुः इत्यत्र न कोऽपि संशयलेशः।

# संशय सर्प ग्रसन उरगादः

डॉ. देवेन्द्र प्रसाद मिश्र

एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः।[1] एकधर्मावच्छिन्नविशेष्यकभावाभावप्रकारकज्ञानं संशय इत्यर्थः। भावद्वयकोटिकसंशयाप्रसिद्धेः स्थाणुर्वेत्यादौ स्थाणुत्वस्थाणुत्वाभावपुरुषत्वपुरुषत्वाभावकोटिकसंशय एवार्थः। द्विविधः संशयो बहिर्विषयकोऽन्तर्विषयकश्च। बाह्य अर्थात् बाह्य विषयों में होने वाला संशय तथा अन्तर्विषयक मानस विषय में होने वाला संशय। इन दोनों में से दृश्यमान धर्म वाले संशय का उदाहरण यह है जैसे ऊर्ध्वताविशिष्ट (ऊँचे) धर्मी पदार्थ को देखकर यह स्थाणु (वृक्ष) है अथवा पुरुष? क्योंकि इसमें ऊँचा धर्मिरूप पदार्थ दिखाई देता है। दूसरे अदृश्यमान धर्मिक संशय का उदाहरण है जैसे जंगल में झाड़ी के आड़ में रहने वाले गौ अथवा गवय को न दिखाई देने पर भी केवल उसके सींग को देखकर यह गौ है अथवा गवय? ऐसा संशय। विद्वच्चूड़ामणि श्री शङ्कर मिश्र ने स्पष्ट कहा है कि जो साधारण धर्म संशय का कारण कहा है वह अनेक धर्मी में देखा हुआ अथवा एक धर्मी में देखा हुआ संशय का जनक होता है। देखे हुए स्थाणु तथा पुरुषों में समान रहने वाला देखा हुआ ऊर्ध्वतादिधर्म संशय का कारण होता है। इसी प्रकार एक धर्मिरूप विषय में देखे हुये सामान्य धर्म से उत्पन्न संशय का उदाहरण जैसे किसी मनुष्य को पूर्व काल में केशयुक्त देखा था, उसी को दूसरे समय केशरहित देखा था, पश्चात् दूसरे काल में वस्त्र से आवृत्त मस्तक वाले उसी मनुष्य को देखकर यह केशसहित अथवा केश रहित मस्तक है ऐसा जो संशय उपस्थित होता है वह एक ही मनुष्य रूपी धर्मी में होने से एक धर्मिविषयक संशय है।[2] विद्या और अविद्या भी दो प्रकार का ज्ञान होता है जाने जाने वाले पदार्थ में ज्ञायमानत्व हेतु से यह ज्ञान विषय सत् है

अथवा असत् ऐसा संशय होता है अतः उपलब्ध होना रूप समानधर्म संशय का कारण है। आन्तरिक संशय विद्या तथा अविद्या दोनों से होता है, जैसे ज्योतिषी का कहा हुआ चन्द्रग्रहण आदि अमुक समय में होगा। यह सत्य भी होता है तथा मिथ्या भी। उसमें ज्योतिषी को स्वयं अपने ज्ञान में तीसरी बार संशय होता है कि यह मेरा बतलाया हुआ ग्रहण का काल सत्य है अथवा मिथ्या। इस प्रकार का ज्ञान यथार्थ है या नहीं ऐसा संशय होता है। इस आशय से विद्वच्चूडामणि श्रीशङ्करमिश्र दूसरे प्रकार से सूत्र की व्याख्या करते हैं कि ज्ञान कहीं यथार्थ होता है कहीं अयथार्थ होता है,[3] अतः यह ज्ञान का विषय होने से सत् यथार्थ है या असत् ऐसा संशय होता है। महर्षि गौतम ने संशय के लक्षण में कहा है कि–"समानानेकधर्मोपपत्तेर्विप्रतिपत्तिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः" अर्थात् 'समान धर्मज्ञान, विशेष धर्मज्ञान, विरुद्ध कोटिज्ञान, उपलब्धि की अव्यवस्था तथा अनुपलब्धि की अव्यवस्था से विशेष की अपेक्षा रखने वाले ज्ञान को संशय कहते हैं। इस लक्षण में उपलब्ध्यव्यवस्था तथा अनुपलब्ध्यव्यवस्था पृथक् संशय के कारण हैं।

अन्तर्विषयक-मानस विषय में अनेक संशय उपस्थित होते हैं, जैसे–

**विश्वं किं कोऽस्य कर्त्ता क्वच**
**कृतवसतिः कीदृगाकारमूर्तिः।**
**किं भुङ्क्ते किं पिधत्ते कलयति**
**सकलं सोद्यमैः पाणिपादैः,**
**किं कार्यङ्के सहायाः सहकृतिनिरताः**
**केवलाध्यात्मशक्त्या**
**पश्यन् दिव्याम्बकाभ्यां क्षमत इह**
**बुधः कोऽपि वक्तुं प्रतीतः॥**

संसार क्या है? इसके रचयिता कौन हैं, वे कैसे हैं, कहाँ रहते हैं, क्या खाते हैं, कैसे वस्त्र पहनते हैं और क्या अपने ही हाथ-पाँव चलाकर पूरी रचना करते हैं? उनका कार्य क्या है और उनके सहयोगी मित्र कौन हैं– इन सारे संशय को कोई परमहंस विद्वान ही अध्यात्म

शक्ति द्वारा दिव्य नेत्रों से देखकर निश्चयपूर्वक कह सकता है।

रामायण एवं रामचरित मानस के अनेकानेक प्रसंगों में महर्षि वाल्मीकि तथा गोस्वामि तुलसीदास जी ने संशय उपस्थित कर संशय निवृत्ति बड़े ही हृदयस्पर्शी भावों से की है तथा सर्वत्र उद्घोष किया है कि करुणावरुणालय भगवान् **श्री राम संशय रूपी सर्प को ग्रसने के लिये गरूड़ हैं,** अत्यन्त कठोर तर्क से उत्पन्न होने वाले विषाद का नाश करने वाले हैं, आवागमन को मिटाने वाले और देवताओं के समूह को आनन्द देने वाले हैं–

**संशय सर्प ग्रसन उरगादः।**
**शमन सुकर्कश तर्क विषादः।।**
**भव भंजन रंजन सुर यूथः।**
**त्रातु सदानो कृपा वरूथः।।**[4]

**शिव-पार्वती विवाह के प्रसंग में** भगवान् शिव की बारात जब हिमाचल के द्वार पर उपस्थित होती है उस समय शिवजी के दल को देखकर घरातियों में भगदड़ मच जाती है, कुछ बड़ी उम्र के समझदार लोग धीरज धरकर वहाँ डटे रहे। लड़के तो सब अपने प्राण लेकर भागे। घर पहुँचने पर जब माता-पिता पूछते हैं, तब वे भय से काँपते हुए शरीर से संशयात्मक ऐसा वचन कहते हैं–

**कहिअ काह कहि जाइ न बाता।**
**जम कर धार कि धौं बरिआता।।**
**बरू बौराह बसहँ असवारा।**
**ब्याल कपाल बिभूषन छारा।।**[5]

क्या कहें, कोई बात कही नहीं जाती। संशय हो रहा है कि यह बारात है या यमराज की सेना? दूल्हा पागल है और बैल पर सवार है। साँप, कपाल और राख ही उसके गहने हैं।

**तन छार ब्याल कपाल भूषन नगन जटिल भयंकरा।**
**संग भूत प्रेत पिसाच जोगिनि बिकट मुख रजनीचरा।।**

**जो जिअत रहिहि बरात देखत पुन्य बड़ तेहि कर सही।**
**देखिहि सो उमा बिबाहु घर घर बात असि लरिकन्हकही।।**[6]

लड़कों के माता-पिता ने महेश्वर का समाज समझकर बहुत तरह से लड़कों का संशय दूर करने का प्रयास किया उन्हें समझाया, किन्तु दूसरी ओर जब पार्वती जी की माता मैना ने सोने की थाल हाथ में लेकर परछन करने चलीं और महादेव जी को भयानक वेष में देखा तो डर के मारे भागकर वे घर में घुस गईं और शिव जी भी जहाँ जनवासा था, वहाँ चले गये–

**बिकट बेष रुद्रहिं जब देखा।**
**अबलन्ह उर भय भयउ बिसेषा।।**
**भागि भवन पैंठी अति त्रासा।**
**गए महेस जहाँ जनवासा।।**

मैना ने पार्वती जी को अपने पास बुलाकर नेत्रों में आँसू भरकर कहा–जिस विधाता ने तुमको ऐसा सुन्दर रूप दिया, उस मूर्ख ने तुम्हारे दूल्हे को बावला कैसे बना दिया?–

**कस कीन्ह बरू बौराह बिधि जेहिं तुम्हहिं सुंदरता दई।**
**जो फलु चहिअ सुरतरूहिं सो बरबस बबूरहिं लागई।।**
**तुम्ह सहित गिरि तें गिरौं पावक जरौं जलनिधि महुँ परौं।**
**घर जाउ अपजसु होउ जग जीवत बिबाहु न हौं करौं।।**[7]

इस समाचार को सुनते ही हिमाचल उसी समय देवर्षि नारद और सप्तर्षियों को साथ लेकर अपने घर गये, तब देवर्षि नारद ने जन्म जन्मान्तर की कथा सुनाकर मैना तथा सभी डरे सहमे घरातियों के संशय को दूर किया–

**सिय बेषु सतीं जो कीन्ह तेहिं अपराध संकर परिहरीं।**
**हर बिरहँ जाइ बहोरि पितु कें जग्य जोगानल जरीं।।**
**अब जनमि तुम्हरे भवन निज पति लागि दारुन तप किया।**
**अस जानि संशय तजहु गिरिजा सर्वदा संकर प्रिया।।**[8]

श्रीमद्गोस्वामी तुलसीदास जी वर्णन करते हैं कि मुनियों की आज्ञा से शिव जी और पार्वती जी ने गणेश जी का पूजन किया– यहाँ पर पार्वती-शिव, पुत्र गणेश जी हैं फिर विवाह से पूर्व ही वे कहाँ से आ गये। इस प्रकार संशय उपस्थित होते ही उसी पंक्ति में संशय दूर भी कर देते हैं–

**मुनि अनुशासन गनपतिहिं पूजेउ संभु भवानि।**
**कोउ सुनि संशय करै जनि सुरअनादि जियँ जानि।।**[9]

सारे संशय का नाश करने वाले वही अनादि ब्रह्म अयोध्यानरेश श्रीरामचन्द्र जी हैं। यह जगत् प्रकाश्य है और श्रीरामचन्द्र जी इसके प्रकाशक हैं। वे माया के स्वामी और ज्ञान तथा गुणों के धाम हैं। जिनकी सत्ता से, मोह की सहायता पाकर जड़ माया भी सत्य-सी भासित होती है–

**जगत् प्रकास्य प्रकासक रामू। मायाधीस ग्यान गुन धामू।।**
**जासु सत्यता तें जड़ माया। भास सत्य इव मोह सहाया।।**[10]

जैसे सीप में चाँदी की और सूर्य की किरणों में पानी की (बिना हुए भी) प्रतीति होती है। यद्यपि यह प्रतीति तीनों कालों में झूठ है, तथापि इस भ्रम को कोई हटा नहीं सकता–

**रजत सीप महुँ भास जिमि जथा भानु कर बारि।**
**जदपि मृषा तिहुँ काल सोइ भ्रम न सकइ कोउ टारि।।**

इसी प्रकार यह संसार भगवान् के आश्रित रहता है। जिस प्रकार स्वप्न में कोई सिर काट ले तो बिना जागे वह दुःख दूर नहीं होता, यद्यपि यह असत्य है, तो भी दुःख तो देता ही है–

**जौं सपनें सिर काटै कोई।**
**बिनु जागें न दूरि दुःख होई।।**

भगवान् शंकर जी कहते हैं कि हे पार्वती! जिनकी कृपा से इस प्रकार का संशय मिट जाता है, जिनका आदि और अंत किसी ने नहीं

(जान) पाया। वेदों ने अपनी बुद्धि से अनुमान करके इस प्रकार गाया–

**बिनु पद चलइ सुनइ बिनु काना।**
**कर बिनु करम करइ बिधि नाना।।**
**आनन रहित सकल रस भोगी।**
**बिनु बानी बकता बड़ जोगी।।**
**तन बिनु परस नयन बिनु देखा।**
**ग्रहइ घ्रान बिनु बास असेषा।।**
**असि सब भाँति अलौकिक करनी।**
**महिमा जासु जाइ नहिं बरनी।।**
**कासीं मरत जंतु अवलोकी।**
**जासु नाम बल करउँ बिसोकी।।**
**सोइ प्रभु मोर चराचर स्वामी।**
**रघुवर सब उस अंतर जामी।।**
**जेहि इमि गावहिं वेद बुध जाहि धरहिं मुनि ध्यान।**
**सोइ दशरथ सुत भगत हित कोसलपति भगवान्।।**[11]

**बाली-वध** के प्रसंग में प्रथम द्वन्द्वयुद्ध में दोनों के एकरूप होने के कारण राम ने बाण नहीं छोड़ा। जिससे पराजित होकर सुग्रीव को ऋष्यमूक लौट जाना पड़ा। दूसरी बार श्री राम ने सुग्रीव के गले में गजपुष्प की माला पहना दी। दुबारा सुग्रीव का आह्वान सुनकर तारा के अनुरोध को ठुकराकर वाली पुनः निकला। सुग्रीव से द्वन्द्वयुक्त करते समय राम बाण से आहत होकर वाली गिर पड़ा[12]–

**एक रूप तुम्ह भ्राता दोऊ।**
**तेहि भ्रम तें नहिं मारेउँ सोऊ।।**
**सखा सोच त्यागहु बल मोरें।**
**सब बिधि घटब काज मैं तोरें।।**

**समुद्र लंघन के प्रसंग में अंगद ने कहा–** मैं पार तो चला जाऊँगा। परन्तु लौटते समय के लिये हृदय में कुछ सन्देह है–

**अंगद कहइ जाउँ मैं पारा।**
**जियँ संसय कछु फिरती बारा।।**[13]

**हनुमान जी महाराज एवं भगवती सीता जी** के संवाद के प्रसंग में जब हनुमान जी ने कहा कि हे माता! कुछ दिन और धीरज धरो श्री रामचन्द्र जी वानरों सहित यहाँ आवेगें और राक्षसों को मारकर आपको ले जायेंगे तो हनुमान जी के कथन पर भगवती सीता को संदेह होता है–

**हैं सुत कपि सब तुम्हहिं समाना।**
**जातुधान अति भट बलवाना।।**
**मोरे हृदयं परम संदेहा।**
**सुनि कपि प्रगट कीन्हि निज देहा।।**
**कनक भूधराकार सरीरा। समर भयंकर अतिबल बीरा।।**[14]

**संदर्भ:–**


1. तर्कसंग्रह: (शब्दपरिच्छेद: पृ. 69)
2. यथादृष्टमयथादृष्टत्वाच्च (वैशेषिकसूत्रोपस्कार: अ. 2 आ. 2 सूत्र 19)
3. विद्याऽविद्यातश्च संशय:। (वै.सू. 2/2/20)
4. रामचरित मानस, (अरण्य. 11)
5. रामचरित मानस, (बा. 95)
6. रामचरित मानस, (बा. 95)
7. रामचरित मानस, (बा. 96)
8. रामचरित मानस, (बा. 98)
9. रामचरित मानस, (बा. 100)
10. रामचरित मानस, (बा. 117)
11. रामचरित मानस, (बा. 113, 119)
12. वाल्मीकि रा. कि. 13-16
13. रामचरित मानस, कि. 30,
14. रामचरित मानस, (सु. 16)

# विशिष्टाद्वैतनये संशयवादः

**प्रो. केदारप्रसादपरोहा**

भारतीय दर्शन एवं संस्कृति वेदों पर आधारित हैं। श्रद्धामयी एवं विश्वासमयी बुद्धि के अनुसार वेद अपौरुषेय हैं, वे ब्रह्म या ईश्वर की साक्षात् वाणी हैं। हमारे मन्त्रदृष्टा तपः पूत=ऋषियों को परमात्मा ने जो शस्वत एवं अलौकिक ज्ञान प्रदान किया उसी की अभिव्यक्ति वेदों में हुयी है। वेद संसार के प्राचीनतम धार्मिक ग्रन्थ हैं जिनकी प्रामाणिकता विश्व के समस्त मानवों के लिये सर्वमान्य है।

वेदों में समस्त साधनाओं ज्ञान, कर्म उपासनापद्धतियों मानवीय कर्तव्यों तथा आचार-विचार के सूत्र संकलित हैं। वेदों में मानवमात्र को अमृतपुत्र कहकर उसकी श्रेष्ठता का प्रतिपादन किया है।[1] यह दृष्ट विश्वास है कि मानवजाति का चरम अभ्युदय वेदविहित नियमों ही है। वेद ही हमारी संस्कृति का मेरुदण्ड हैं, वेद ही धर्म का मूल हैं।[2] वेदोक्त धर्माचरण मानव के अन्तवीध्य सभी कर्मों तथा उद्योगों के लिए सदैव मार्गदर्शक सिद्धान्त के रहे हैं। वेदों के वाक्यों से सदा ही सत्यानुभूति, आत्मज्ञान और आध्यात्मिक चेतना से मनुष्य प्रदीप्त रहा है। आस्तिक दर्शनानुयायी देहात्मवादी नहीं हैं वह तो आदिकाल से अध्यात्मवादी रहे हैं।

ब्रह्माण्ड के समस्त रहस्यों के गर्भ में एक अलौकिक सत्ता विद्यमान है, जो सृष्टि के उद्भव, पालन एवं प्रलय का कारण होती है। यह दृश्य - जगत् परमात्मा का ही व्यक्त रूप है, ईश्वर इसमें सर्वत्र विराजमान हैं। ईशावास्योपनिषद् एवं तैत्तरीयोपनिषद् में भी ब्रह्म या ईश्वर को ही समस्त प्राणियों को उसी की सत्ता से अनुप्राणित सिद्ध किया है।[3]

ईश्वर की सर्व व्यापकता में भगवान् श्रीकृष्ण गीता में स्वयं कहते हैं मुझसे भिन्न कोई भी इसका करण नहीं हैं, यह सम्पूर्ण जगत् मणियों के समान एक सूत्र में गुंथा हुआ है।[4] अत: परमेश्वर के अस्तित्व एवं उसकी सत्ता तथा सर्वशक्तिमत्ता का आभास संसार के समस्त मानव जाति को है। हमारी गौरवमयी विश्वकल्याण की भावना, प्राणिमात्र का हितचिन्तन व परोपकार का संस्कार तथा आध्यात्मिक वृत्तियों का मंगलमय व्यावहारिक पक्ष जन समुहाय को समझने के लिये पर्याप्त है। वास्तव में समत्वबुद्धि की हमारे भीतर सभी के प्रति विश्वबन्धुत्वं एवं विश्वशान्ति की भावना को परिपुष्ट करती है।[5]

अतएव भगवान की माया मनुष्य को बन्धन में नहीं डालती, भगवान की माया को जब अपनी माया हम समझने लगते हैं तभी उसमें संलिप्त होते जाते हैं। इस माया की सन्तकृपा भगपत्कृपा से ही निवृत्ति हो सकती है, वह अपने पुरुषार्थ से नहीं हो सकता जो कृपा से शक्ति मिलती है वह आपकी बुद्धिमानी से नहीं।

जब हम अपनी बुद्धि का प्रयोग करते है तभी हमें सभी द्रव्यों पदार्थों, व्यक्तियों में भ्रम हो जाता है, उसी को हम संशय कहते हैं।[6]

बुद्धि का लक्षण करते हुये अन्नंभट्टी ने कहा कि समस्तव्यवहारों का कारण ज्ञान से होता है, वह ज्ञान का कारण बुद्धि होती है, वह बुद्धि भी दो प्रकार की है, स्मृति तथा अनुभव।[7]

अमरकोश में भी बुद्धि को दो भागों में विभाजित किया है, प्रथम मोक्षप्रदान करने में सहायक दुसरे शिल्प एवं शास्त्र का ज्ञान कराने में कारण होती है उसी को बुद्धि कहते हैं।

पूर्वकृत कर्मों से उत्पन्न संस्कारों से जो ज्ञान की अवधारणा वनती है उसे स्मृति कहते हैं।

संस्कारों से भिन्न किसी भी वस्तु व्यक्ति पदार्थ का स्वयमेव इन्द्रिय जन्य ज्ञान की अनुभूति होती है उसे अनुभव कहते हैं। यह अनुभव भी दो प्रकार का होता है, यथार्थ एवं अयथार्थ।[8]

यथार्थ अनुभव वह है विषय जिस प्रकार का हो वैसा ही ज्ञान होना यथार्थ अनुभव कहलाता है यह यथार्थ अनुभव भी चार प्रकार का है, प्रत्यक्ष, अनुमिति, उपमिति एवं शाब्द।[9] जो विषय जैसा है उसके विपरीत जो ज्ञान होता है उसे अयथार्थ ज्ञान कहते हैं। यह अयथार्थ ज्ञान तीन प्रकार का होता है। संशय, विपर्याय एवं तर्क।[10]

विशिष्टाद्वैत सिद्धान्त अनुसार मुख्य विषय **'संशयवाद'** है, यद्यपि सर्वप्रथम जो वस्तु, पदार्थ, व्यक्ति जिस प्रकार का है, व्यवहार में अभी वैसा ही है ऐसे इस भाव को प्रमा अर्थात् ज्ञान कहते हैं।[11] इन विषयों पर जब हमें भ्रम उत्पन्न होता है उसी को संशय कहते हैं। विशिष्टाद्वैतवेदान्त विश्वविख्यात दर्शन है। यह विद्वत् समाज एवं जन साधारण दोनों को प्रिय है, क्योंकि इसमें धर्म और तर्क दोनों भाव सम्मिलित हैं। अपने सर्वोत्कृष्ट शास्त्र सम्मत विद्वानों के कारण यह दर्शन वेदान्त के प्रस्थानों में मूर्धन्य स्थान रखता है। इस सिद्धान्त का विश्लेषण इस प्रकार से किया जाता है।

(1) विशिष्टस्य अद्वैतम्, (2) विशिष्टयोः अद्वैतम्।

सूक्ष्मचिद्विशिष्टं स्थूलचिद्विशिष्टं च इति विशिष्टयोः अद्वैतं विशिष्टद्वैतम्।

प्रथम परिभाषा के अनुसार ईश्वर चित् एवं अचित् इन दो तत्त्वों से विशिष्ट होता है, परन्तु ईश्वर प्रधान है, तथा चित् एवं अचित् दोनों ईश्वर के अधीन हैं।[12] द्वितीय परिभाषा के अनुसार जब प्रलयावस्था में जीव एवं जगत् सूक्ष्मरूपापन्न होते हैं, तब ईश्वर इनकी सूक्ष्मावस्था अपने में धारण कर लेता है।[13] ऐसी अवस्था में ईश्वर सूक्ष्म चिदचिद्विशिष्ट रहता है। इस स्थिति में इसे 'कारणावस्थ ब्रह्म' कहते हैं। इसी प्रकार सृष्टिकाल में स्थूल रूप धारण करने पर ''स्थूलचिदचिद्विशिष्ट'' होकर ईश्वर कार्यवस्थ ब्रह्म कहलाता है।

अत एवं विशिष्टाद्वैतसिद्धान्त ने चित् अचित् एवं ईश्वर इन तीन तत्त्वों को स्वीकार किया है। चित् का अभिप्राय भोक्ता जीव से, अचित् का भोग्य जगत् से तथा ईश्वर को अन्तर्यामी परमेश्वर के रूप में

स्वीकार किया है। ईश्वर एवं चित्-अचित् में ''शरीर-शरीरीभाव सम्बन्ध'' है। यह उपनिषदों पर आधारित है। चित् और अचित् ईश्वर का शरीर है, और ईश्वर चित्-अचित् की आत्मा है। चित् अचित् की सत्ता स्वीकार करने पर भी ईश्वर के "एकत्वं एवं अद्रव्यत्व" की हानि नहीं होती क्योंकि भेद की दृष्टि से तत्त्व तीन हैं, परन्तु अभेद के विस्तार से तत्त्व एक ही है, वह है चिदचिद्विशिष्ट ब्रह्म। संशय की व्याख्या करते हुये आचार्य वुच्चिवेंकटाचार्य लिखते हैं कि संशय वह अवस्था है जिसमें मन दो पदार्थों के मध्य दोलाय मान रहता है और किसी एक का निश्चय नहीं कर पाता। जैसे– अन्धकार में कुछ दूरी पर पुरुषाकार कोई पदार्थ दिखायी देता है। वह वस्तु क्या है? उसका निश्चयात्मक ज्ञान नही हो रहा, ऐसा लगता है कि स्थाणुत्व ये दोनों परस्पर विरुद्धधर्म हैं, जो एक साथ उस धर्म में नहीं रह सकते। या तो 'यह' होगा या वह होगा, किन्तु इन दोनो पदार्थों में कौन सत्य है कौन असत्य है, उसका ज्ञान उपलब्ध नहीं है इस अवस्था में मन एक ही धर्मों में अनेक विरुद्धधर्मों का आरोपण करता है।

इसके कारण ही न्याय सूत्रकार महर्षि गौतम ने संशय का लक्षण करते हुये सूत्र में विमर्श शब्द से संशय के सामान्य लक्षण का संकेत करते हुये कहते हैं कि शब्द का अर्थ है– विरोध और मृश् धातु का अर्थ ज्ञान है। अतएव विमर्श शब्द का अर्थ हुआ– "विरुद्ध पदार्थ का ज्ञान" फलितार्थ यह हुआ कि किसी एक ही पदार्थ में नाना विरुद्धपदार्थों का ज्ञान ही संशय कहा जाता है।[14]

न्यायसूत्र वृत्तिकार विश्वनाथ के अनुसार किसी एक धर्मी अर्थात् पदार्थ में परस्पर विरुद्ध भाव और अभाव दोनों को विशेष ज्ञान किया जाय तो वह ज्ञान "संशय" कहलाता है।[15] जैसे यह धनी है या नहीं। पुष्प सुगन्धित है या नहीं, इस प्रकार के ज्ञान को संशय कहा जा सकता है।

"न्यायपरिशुद्धि" नामक ग्रन्थ में वेदान्तदेशिक, ने गौतम अन्नंभट्ट और लौगक्षिभास्कर के समान संशय का लक्षण किये हैं।

सामान्य धर्मियों अर्थात् पदार्थों का स्फुरण होने पर कुछ सामान्य साधारण लक्षणों वाले धर्मियों अर्थात् पदार्थों का अनुभव होने पर विशिष्ट विरोधी गुणों के अग्रहण से अनेक परस्पर विरुद्ध विकलपों का जो स्फुरण अर्थात् अनुभव होता है उसे "संशय" कहते हैं।[16]

अत: आचार्य वेंकटनाथ का संशय लक्षण अतिव्याप्ति दोष से सर्वथा मुक्त है।

वेदान्तकारिकावलीकार बुच्चिवेंकटाचार्य संशय का लक्षण करते हैं कि जहां एक धर्मों में नाना प्रकार की वस्तुओं का ज्ञान होता है उसे संशय कहते हैं।[17] जैसे जब केवल एक वस्तु ही दिखायी देती है चाहे पुरुष हो या स्थाणु हो जो एक दूसरे से सर्वथा भिन्न होने से एक साथ दोनों कभी हो ही नहीं सकते। इसलिये दोनो विकल्प एक दूसरे से सर्वथा भिन्न नहीं होने चाहिये और वस्तु को देखने से पता नहीं चलता चाहिये कि वहां एक है या दूसरी है उसी से संशय उत्पन्न होता है।[18]

इस संशय की व्याख्या करते हुये स्वयं भगवान् श्री कृष्ण ने अर्जुन के माध्यम से हम सबको संकेत किया है कि संशय युक्त मनुष्य का पतन हो जाना है क्योंकि उसकी बुद्धि में अज्ञानता के कारण सबको संदेह की दृष्टि से देखता है, इस प्रकार संदेह युक्त पुरुष का नाम संशयात्मा है। ऐसे संशयात्मा मनुष्य को न उस लोक अर्थात् संसार में सुख मिलता न ही परलोक अर्थात् संसार से जाने के वाद भी सुख नहीं मिलता।[19] संशयात्मा मनुष्य का इस लोक में व्यवहार बिगड़ जाता है। कारण कि वह प्रत्येक विषय में संशय करता है, जैसे यह आदमी ठीक है या नहीं, यह भोजन ठीक है यह वे ठीक है, इसमें मेरा हित है या अहित है ऐसी भावना रखने वाले उस संशयात्मा मनुष्य को परलोक में भी कल्याण की प्राप्ति नहीं होती, क्योंकि स्वकल्याण में निश्चयात्मिका बुद्धि की आवश्यकता होती है, किन्तु संशयात्मा मनुष्य दुविधा में रहने के कारण कोई एक निश्चय नहीं कर सकता भीतर संशय भरे रहने के कारण उसके मन में सुख-शान्ति नहीं रहती। समस्त संशय अज्ञान से अर्थात् कर्मों के न समझने से ही उत्पन्न होते है। क्रियाओं और पदार्थों

को अपना तथा अपने लिये मानना ही अज्ञान है। यह अज्ञान तब तक रहता है जब तक अन्तःकरण में संशय रहते हैं।

मनुष्य जब शुभ कर्म करने की विद्या जान लेता है, तब उसके सभी संशयों का नाश हो जाता है अर्थात् कोई भी कर्म अपने लिये न करने से एवं किसी भी पदार्थ को अपना तथा अपने लिये न मानने से जब समस्त क्रियायें-पदार्थों एवं संसार से सर्वथा सम्बन्ध-विच्छेद हो जाता है तब स्वतः सिद्ध समता का भाव अपने आप अनुभव हो जाता है।[20] तभी हमारे मन में महापुरुषों में धर्म में शास्त्रों में और परमात्मा में आदरपूर्वक विश्वास होने लगता है उसे ही श्रद्धा कहते हैं। इसलिये "परमात्मा अपने में है" ऐसा मान लेने का नाम ही श्रद्धा है। ऐसी श्रद्धा वाले पुरुषों को ही परमात्म तत्त्व का ज्ञान हो जाता है। "तत्त्वज्ञान" होने पर स्वतः सिद्ध परमशान्ति का तत्काल अनुभाव होने लगता हैं।[21] श्रद्धा, विश्वास के कारण ही सभी मनुष्यों साध को अपने लक्ष्य की ओर अग्रसर होने का योग बनता है। हाँ कर्मयोग तथा ज्ञानयोग में मुख रूप से विवेक की आवश्यकता होती है, परन्तु भक्तियोग में श्रद्धा, विश्वास से ही साधक अपनी साधन के माध्यम से संसार के समस्त संशयों के समाप्त करता है। इसीलिये भगवान् कृष्ण ने श्रीमद्‌भगवद्‌गीता के अठारहवें अध्याय के छाछठवें मंत्र में कहा दया कि "सर्वधर्मात्परित्यज्य मामेकं शरणं ब्रज" अर्थात् जब मनुष्य भगवान के शरण में चला जाता है तब वह व्यक्ति या भक्त लोक-परलोक, सद्‌गति-दुर्गति, किसी भी बात की समस्त चिन्ताओं से मुक्त हो जाता है। भगवान् के सम्बन्ध की दृढ़ता होने पर जब संसार-शारीर के आश्रम से सवर्था मनुष्य का सम्बन्ध नहीं रहता, तब है जीने की आशा, मरने का भय, करने का राग, और पाने का लालच ये चारों का प्रभाव जीवन में नहीं रहता, जो मुक्त भगवान् के चरणों में प्रीति की दोड़-सी पड़ी है, वे कभी भी साधना से नहीं गिरते, क्योंकि भगवान् जो भी विधान करते हैं वह संसार मात्र के सम्पूर्ण जीवों के कल्याण के लिए ही करते हैं।[22] वास्तव में जीव का उद्धार केवल भगवत्कृपा से ही होता हैं। संसार वेदान्त समस्त प्रकार के संशयो को समाप्त करने के लिये– विशिष्टाद्वैतवेदान्त सिद्धान्त में शरणागति एवं प्रपत्ति को ही मुख्य रूप से माने हैं, क्योंकि हमारे यहां

दो प्रकार की भक्तियों का आश्रय है। "मार्जार किशोरन्याय" एवं कपि किशोर न्याय अर्थात् उन दोनो नयों में शरणगति, प्रपत्ति को ही दर्शाया गया है।

अत: किसी साधना से यदि जीव का कल्याण होगा तो वह केवल एक ही साधना है भगवान् की भक्ति। भगवान् सर्वेश्वर ही भक्त की भक्ति और प्रपत्ति से प्रसन्न होकर उसको भक्ति प्रदान करते हैं, अतएव भक्ति और प्रपत्ति ही मुक्ति का परम कारण है।[23] इस प्रकार विशिष्टाद्वैत वेदान्त के माध्यम से ही समस्त संशयो से मुक्ति प्राप्त होती है इस सिद्धान्त की पुष्टि उपनिषदो में मुक्त कण्ठ से प्रशंसा की है। भगवान् ने स्वयं कहा है कि मेरी त्रिगुणमयी माया रूपी संसार को पार करना अन्यन्त कठिन मार्ग है, परन्तु जो मेरे शरण में आ जाता है भक्ति प्रपत्ति से उसका उद्धार करता है।[24] अत: संशयो से मुक्त करने का शरणागति, एवं प्रपति ही यह एक उयाय है।[25]

---

1. शृण्वन्तु विश्वे अमृतस्य पुत्र आ ये धामानि दिव्यानि तस्थुः। –यजुर्वेद, 11.5
2. "वेदोखिलो धर्ममूलम्" –मनुस्मृति, 2.6

3.(क) "ईशावास्यमिदं सर्वं यत्किञ्चित् जगत्यां जगत्" –ईशावास्योपनिषद् – मन्त्र–1

(ख) यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति – तद्ब्रह्म – तैत्तिरीयोपनिषद, 3.1

4. "मत्त: परतरं नान्यत्किञ्चिदस्ति धनञ्जय"
   मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव। – श्रीमद्भगवद्गीता – 7.7

5.(क) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः,
   तत्र को मोहः कः शोक एकत्वमनुपश्यतः। –ईशावास्योपनिषद् – 7

(ख) यो मां पश्यति सवत्र सर्वं च मयि पश्यति।
   तस्याहं न प्रणश्यामि स च मेन प्रण्श्यति।। –श्रीमद्भगवद्गीता – 6.30

6. "नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।"
   स्थितोऽस्मि गत संदेहः करिष्ये वचनं तव।। –श्रीमद्भगवद्गीता, – 8.73
7. सर्वव्यवहार हेतुर्गुणो बुद्धिर्ज्ञानम्। स द्विविधा। स्मृतिरनुभवश्च। –तर्कसंग्रहः, पृष्ठ
8. संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधः। यथार्थोऽयथार्थश्च। –तर्कसंग्रहः, पृष्ठ – 16
9. तद्वति तत्प्रकारकोऽनुभवो यथार्थः। सैव प्रमेत्युच्यते।। यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। –तर्कसंग्रहः, पृष्ठ – 18.19
10. तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। अयथार्थानुभवस्त्रिविधः। संशयविपर्यय–

तर्कभेदात्। –तर्कसंग्रहः, पृष्ठ - 18, 50

11. "यथावस्थितवस्त्वेकव्यवहारानुगा प्रमा" –वेदान्तकारिकावली विमर्शः पृष्ठ–

12. अशेषचिदचित्प्रकारं ब्रह्मैक्यमेव तत्त्वम्। तत्र प्रकारप्रकारिणोः प्रकारणाञ्च मिथोऽत्यन्तभेदोऽपि विशिष्टैक्यादि विवक्ष्यैकत्वव्यपदेशः।

13.(क) अतः स्थूलसूक्ष्मचिदचित्प्रकारं ह्यैव कारणञ्चेति ब्रह्मोपादानञ्जगत्। सूक्ष्म–चित्वस्तुशरीरकं ब्रह्मैव कारणमिति। –श्रीभाष्यम्, श्रुतिप्रकाशिका, पृष्ठ - 213

(ख) उत्तरत्र कार्यावस्थः कारणवस्थश्च परमात्माप्त एवेति भाष्येण इदमेव वाक्यं कार्यकारणद्रव्यैक्यप्रतिपादनपरमित्यादिव्याख्यातम्। न्यायसिद्धाञ्जनम्, सुदर्शनटीका, पृ. 1317

14. समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षे विमर्शः संशयः। न्यायसूत्रम् - 1.1.23

15.(क) एकधर्मिणि विरोधेन भावाभावप्रकारकं ज्ञान संशयः। न्यायसुत्रवृत्तिः, 1.1.23 पृ. 30

(ख) एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः। –न्यायसिद्धान्तमुक्तवली, पृष्ठ 424-425

16. सामान्यधर्मिस्फुरणे सति अप्रतिपन्नतद्विरोधप्रतिपन्नमिथो विरोधानेकविशेषस्फुरणं संशयः। – न्यायपरिशुद्धिः, न्यायतत्वप्रकाशिकासहिता, पृष्ठ - 58

17. स संशयान्यथाज्ञानविपरीतधियो न हि। एकधर्मिकनानार्थविषयाधीस्तु संशयः।
–वेदान्तकारिकावलीविमर्शः, का. 16

18. एकविशेष्यकनानाप्रकारकं ज्ञानमित्यर्थः। यथा "अयं स्थाणुर्वा पुरुषो वा" इति पुरोवर्ति पदार्थविशेष्यकमिथोविरुद्धस्थाणुत्वपुरुषत्वप्रकारकं ज्ञानं संशयः।। –वेदान्तकारिकालीविमर्शः, पृष्ठ - 79

19. अज्ञश्चाश्रद्धधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः। –श्रीमद्भगवद्गीता, 4.40

20. तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत।। –श्रीमद्भगवद्गीता, 4.42

21. श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।। –श्रीमद्भगवद्गीता, 4.39

22. सर्वधमान्परित्यज्य मामेकं शरव्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।
श्रीमद्भगवद्गीता - 1.66

23. भक्तिप्रपत्तिसुप्रीत ईश्वरो मुक्तिदायकः। अतो भक्तिप्रपत्तीहि मुक्तौ परमकारणम्। –वेदान्तकारिकावलीविमर्शः, का. सं. 9

24.(क) दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते –भगवद्गीता, 7.14

(ख) भक्त्या परमयावापि प्रपत्त्या वा महामते। प्राप्योऽतंनान्यथा प्राप्यो मम कैङ्कर्यनित्सुभिः। –अहिर्बुध्न्य संहिता

25. अनन्यसाध्ये स्वीभीष्टे महाविश्वासपूर्वकम्। तदेकोपायता याञ्चया प्रपत्तिः शरणागतिः।। –वेदान्तकारिकावलीविमर्शः, पृष्ठ 14।

# Saṃśaya-Viśiṣṭadvaita's view on

Dr. K. Anantha

The Indian philosophical tradition makes use of three kinds of inquiry into the sources of knowledge (pramana-vicara), inquiry into the objects of knowledge (premeya-vicara) and inquiry into the value system (prayojana-vicara). Of these, the first one is the basis for the other two. Every vedantic system follows its own pramana theory making suitable modifications in the ground- work of logic and epistemology prepared by the naiyayika. Like Advaita, Visistadavaita has worked out its pramana theory which is the basis for its metaphysics. The nyayaparisuddhi of Vedanta desika, which is comparable to the Vedanta paribhasa in the Advaita tradition, is an excellent introduction to the epistemology of Visistadvaita. As the name indicates, the Nyayaparisuddhi adopts and also modifies the pramana theory of the Naiyayika in order to make it acceptable.

The study of origin, nature, means and scope of knowledge is the major concern of epistemology. It also deals with a cluster of related problems like the relation of knowledge to reality, the nature and criterion of truth and error, standards for verification of truth. This science that goes deep into the fundamentals of knowledge has been assigned a great deal of importance in ancient Indian philosophy. The above view can be ascertained from the well-known dictum manadhina meyasiddhih-the soundness of cognition depends on the sources of valid cognition (mana or pramana), which is used to substantiate it. Thus the science that developed as a regulative aid for determination of knowledge has been known as Pramanasastra.

Every system of Indian philosophy strives to establish its ontological position on the basis of the pramanas. The systems of Vedanta are no exception. Their starting point is the ultimate reality, Brahman.They also accept Brahman as the supreme goal of knowledge. But any philosophical search must have a logical determination of knowledge as the means of realization of truth. Hence a thorough scrutiny and analysis of the means of knowledge (pramanas) is undertaken by every system of Indian thought.

The dharmabhutajnana admits of slips in an embodied state owing to the limitations imposed by karma. The Indian philosophical systems make a distinction between knowledge or valid cognition, an ordinary cognition and an erroneous or invalid cognition. A valid or true cognition is referred to by the word prama. It is equivalent to the English word 'knowledge'. An ordinary cognition which may or may not be true is known as jnana. An invalid cognition is aprama or bhramal bhranti. While all systems of Indian philosophy accept truth as differentia of knowledge, differences arise while defining the word 'true'. The criterion for judging truth varies from systems to system. As a result, the definition of prama is also diverse.

## The Buddhist definition

The Buddhist logicians hold that any successful human action is necessarily preceded by a right knowledge. Right cognition (samyag-jnana) is successful cognition, that is to say, it is a cognition followed by a judgment (adhyasaya), which in its turn is followed by a successful operation (purusarthasiddhi). Accordingly, the Nyaya-bindu of Dharmakirti defines true cognition as that which reveals an object that serves some fruitful purpose. This attitude that lays stress on the consequences and emphasizes the practical and the useful resembles the viewpoint of Western pragmatists. A popular criticism levelled against the undue stress on successful volition is that at times even an invalid cognition is known to lead to a fruitful activity.

For instance, a person who stretches his hand after mistaking the rays emanating from a gem for a gem actually gets it also. Hence, it is pointed out that a successful action need not necessarily be preceded by a true cognition.

### The Nyaya Definition

The Naiyayika considers truth as faithfulness to the one with which knowledge reveals its object. True cognition is defined as that which predicates of something character really possessed by it. This view lays stress on the correspondence of knowledge to the object concerned.

### The Advaita Definition

The Advaitin favours non-contradiction and novelty as the criteria for determination of truth. The Vedantaparibhasa of Dharmaraja Adhvarinda defines knowledge as that, which excludes recollection , consists in being the cognition having for its content an entity that is already not know (anadhigata) and is not sublated (abadhita) The aspect of novelty is not stressed upon by many systems so as not to exclude memory from being accepted as a sources of knowledge memory.

### The Visistadvaita Definition

This system defines prama as the knowledge of a thing as it is and as it satisfied the practical interest of life. Truth, according to this definition, has both conative and cognitive value in so far as it is pragmatic (vyavahara-nuguna) and corresponds to the object as it is (yathartha). Thus, truth is that which can be both experientially and experimentally verified. The Yatindramatadipika explains the need for the inclusion of these two qualifying terms, 'as they really are' (yathartha) and 'satisfying the practical needs of life' (vyavadharanuguna) by pointing out that these ensure that the definition does not suffer from the fallacy of being too wide (ativyapti). A Cognition may be valid or erroneous. To exclude the error element, as in the case of perceiving a sheil as silver, the expression

vyavaharanuguna has been used. The fallacy of over-extensiveness may still persist in the form of the cognition 'This is silver' as long as the state of illusion lasts. This is avoided by the use of the expression yathartha. This expression distinguishes the right cognition from other forms of cognitions like doubt (samsaya), erroneous cognition (anyathajnana) and cognition of the contrary(viparitajnana).

### Aprama or Bhrama

As opposed to valid cognition (prama) there are other invalid cognitions (aprama or bhrama). They are also examined by the Indian thinkers in order to safeguard and preserve facts. There are different types of invalid cognitions such as erroneous cognition (viparyaya), doubt and indecisive (anadhyavasaya).

### Viparyaya

There are two types of erroneous cognitions:

1. Cognizing one thing as another is one type of viparyaya, as for example, cognising the shell as silver, rope as snake, etc.

2. The apprehension of contradictory properties of a particular object, the essential nature of which is already cognised, is another form of viparyaya.

**The latter is of more than one kind:**

1. Apprehending the conch as yellow is an example of apprehension (sphurana) of a contradictory property.

2. The theory of being different and non-different at the same time is another form of viparyaya having many contradictory attributes.

3. The experiencing of moon as double and small is again a case of viparyaya. Even though the moon is cognised along with its characteristic attribute of

'moonness', the attributes of "doubleness" and "littleness" are opposed to the "oneness" and "bigness" of the moon. This is a typical example of apprehension of many qualities that are mutually contradictory (paraspara-viruddha-aneka-visesa-sphurana)

The cause of viparyaya is classified as wrong identification as in the case of rope-snake and superimposition of one characteristic for another as in the case of yellowness of conch.

## Sansaya

Doubt (samsaya) is caused by the cognition of contradictory and in compatible attributes of two or more objects in one and the same locus. Here, the object of cognition (dharmi) is apprehended along with incompatible features. "Is it a post or man?" is an example of doubt. The attribute of "tallness" is cognized and it gives rise to the cognition of contradictory features and it becomes difficult to decide whether it is a man or a post, since the attributes of "post" and "man" is contradictory and incompatible in one and the same locus. Distinguishing between a doubtful cognition and a definite one, Yamunacarya says that, the decisive contact of consciousness (dharmabhutajnana) with the object is a definite cognition. But when the consciousness is in loose contact (adrda samyoga) with many incompatible features simultaneously, it is known as doubt. Quoting the above view of Yamuna, Vedanta desika clarifies that the word simultaneously (yugapat) should be taken in the sense of quick succession.

Vedanta desika says that there will be apprehensions of the incompatibles alternately as in the case of a swing that gains forward and backward movements at the same time.

## The cause of doubt

Doubt arises due to two main causes known as samanadharama and vipratipatti. Samanadharma is a

doubt is that arises from the apprehension of common characteristic like "tallness", which is common to both post and man and the cognition is in the form of "Is it a post or a man?" Vipratipatti is a doubt arising due to perplexity caused by not being able to decide between the relative strength of the various contrary and different possibilities suggested by what is cognized or otherwise known. Doubt may arise between a true and a false perception, as when looking at a face in a mirrior,a man does not know whether it is a real face or not, until he touches the mirror. Doubt may arise between a valid inference and an invalid one, as also between two contradictory texts. Doubt may also arise between a perception and inferences. In the case of the illusory perception of yellow conch, what is cognised is a yellow conch, but a valid inference leads one to the conclusion that a conch cannot be yellow and so doubt arises. Wherever doubt arises between different cognitions resulting from different kinds of pramanas.

# न्यायव्याकरणसाहित्यदिशा संशयविमिर्शिनी सङ्क्षिप्ता दृष्टिः

डा. सञ्जीतकुमारः झा

न्यायनये सर्वव्यवहारहेतुर्गुणो भवति बुद्धिर्नाम।[1] सा च ज्ञानापरपर्याया। तस्याः स्मृतिरनुभवाविति भेदौ स्तः। अनुभवस्यापि यथार्थायथार्थभेदेन द्वैविध्यं भवति। तत्रायथार्थानुभवस्य त्रिषु भेदेषु प्राथम्यं भजते संशयो नाम। यतः खलु 'अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोकोऽस्ति न परो न सुखं संशयात्मनः।।[2] इति श्रीमद्भगवद्गीतायामुक्तम्, अथ च संशयस्य ज्ञानासिना विनाशित्वात् छिन्नसंशयं भवितुं न्यायशास्त्रीयविचारपरम्परायां "प्रमाणप्रमेय-संशय प्रयोजन-दृष्टान्तसिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्वज्ञानान्निः-श्रेयसाधिगमः'[3] इति गौतमीयादिमे सूत्रे तृतीयपदार्थरूपेण संशयस्य समावेशो विहितः। तस्य संशयस्य स्वरूपजिज्ञासायाम् 'एकस्मिन्धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यावगाहिज्ञानं संशयः'[4] इति तर्कसङ्ग्रहकारेणोक्तम्। तत्र एकस्मिन्धर्मिणि अर्थात् एकस्मिन्नेव पुरोवर्तिनि पदार्थे विरुद्धाः व्यधिकरणाः ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यंसम्बन्धः, तदवगाहिज्ञानं संशयः इत्यर्थः। तत्र नानामुख्यविशेष्यताशालिज्ञानस्वरूपघटपटाविति समूहालम्बनज्ञानस्य घटत्वपरत्वरूपविरुद्धानानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिवारणाय 'एकस्मिन्नि' ति पदं लक्षणे प्रदत्तम्। 'घटः पृथ्वी' ति, घटः द्रव्यम्' इत्यादौ ज्ञानस्यैकस्मिन्धर्मिणि घटे घटत्वपृथ्वीत्वरूपनानाधर्मवैशिष्ट्याव-गाहित्वादतिप्रसक्तिवारणाय विरुद्धेति पदम्। 'पटत्वविरुद्धघटत्ववान् घट' इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति पदं लक्षणे समाविष्टम्। अर्थात् एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारताशालिज्ञानत्वं संशयत्वं नाम,[5] तच्च 'पटत्वविरुद्धघटत्ववान् घट' इत्यत्र नास्तीति भावः। अथ च स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वस्वसामानाधि-

करण्योभयसम्बन्धेन विषयिताविशिष्टविषयिताशालिज्ञानत्वं[6] संशयस्य लक्षणम्। अत्र स्वपदेन विषयितैव गृह्यते। 'एकस्मिन्धर्मिणि–' इत्यादि–तर्कसङ्ग्रहकृत्संशयलक्षणे एकशब्दार्थस्याभेदसम्बन्धेन धर्मिपदार्थेऽन्वयः। धर्मिणीति सप्तम्याः विशेष्यत्वमर्थः। तत्राधेयतासम्बन्धेन प्रकृत्यर्थस्य धर्मिणोऽन्वयः। विशेष्यतायाः निरूपकतासम्बन्धेन ज्ञानेऽन्वयः। विरुद्धौ विरुद्धा वा नानाधर्मौ नानाधर्मा वा, तयोस्तेषां वा वैशिष्ट्यं, तस्य ज्ञानम् संशयः इति। विरुद्धशब्दस्य विरोधविशिष्टेत्यर्थः। तस्याभेदसम्बन्धेन नानाधर्मपदार्थानेकधर्मेष्वन्वयः। नानाधर्माणामिति षष्ठ्याः प्रतियोगित्वमर्थः। तत्राधेयतासम्बन्धेन नानाधर्मेऽन्वयः। प्रतियोगितायाः निरूपकतासम्बन्धेन वैशिष्ट्यपदार्थेऽन्वयः। वैशिष्ट्यस्येति षष्ठ्याः विषयत्वमर्थः। विषयत्वं च संसर्गतारूपम्। तत्र प्रकृत्यर्थस्य संसर्गस्य आधेयतासम्बन्धेनान्वयः। संसर्गतायाः निरूपकतासम्बन्धेन ज्ञानेऽन्वयः। ज्ञानस्याभेदसम्बन्धेन संशयेऽन्वयः।

तथा च एकाभिन्नधर्मिनिष्ठविशेष्यतानिरूपकविरोधविशिष्टाभिन्ना–नेकधर्मनिष्ठप्रतियोगितानिरूपकसंसर्गनिष्ठसंसर्गतानिरूपकज्ञानाभिन्नः संशयः[7] इति शाब्दबोधः। यथा 'स्थाणुर्वा पुरुषो वा' इति। अत्र वाशब्दस्य विरोधोऽर्थः। अयमित्यध्याहारः। 'अयम्' इत्यस्य स्थाणुः पुरुषश्चार्थः। वाशब्दार्थे विरोधे स्थाणोः प्रतियोगितयाऽन्वयः। विरोधस्याश्रयतासम्बन्धेन इदंपदार्थे पुरुषेऽन्वयः। एवं 'पुरुषो वा' इत्यत्रापि ज्ञेयः। इतिशब्दस्य विषयत्वमर्थः। तत्रेदं पदार्थयोः स्थाणुपुरुषयोः आधेयतासम्बन्धेनान्वयः। 'इति' इत्यस्मादनन्तरं ज्ञानमित्यध्या–हार्य्यम्। तत्र विषयतायाः निरूपकतासम्बन्धेनान्वयः। यथाशब्दस्योक्त–प्रकारविशिष्टमित्यर्थः। तस्य ज्ञानेऽन्वयः। तथा च 'स्थाणुप्रतियोगिकविरोधाश्रय–स्थाणुनिष्ठाविषयता तन्निरूपकं ज्ञानम् उक्तप्रकारविशिष्टमिति बोधः।[8] प्रकारोऽत्र लक्षणम्।

तर्कभाषायाम् 'एकस्मिन्धर्मिणि विरुद्धनानार्थावमर्शः संशयः[9] इत्युक्तम्। कारिकावल्याम्–

**"किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिस्तु संशयः।**
**तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥**
**स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥"[10]** इत्युक्तम्।

न्यायसारतदीयटीकादिषु च अनेकाः व्युत्पत्तयः सन्दर्शिताः। तथाहि–संशीतिः संशयः इति भावसाधनम्[11], संशेतेऽनेनात्मा सुप्त इव भवतीति करणसाधनम् वा। सर्वात्मना शेते इवात्मा यस्मिन् सति स संशयः[12], संशेरते मुह्यतीन्द्रियाण्यस्मिन्निति संशयः[13], 'तत्रानवधारणज्ञानं संशयः'[14] इति च। अन्तिमे लक्षणे 'तत्रे'ति पदं निर्धारणार्थम्। तत्र अर्थात् तयोः संशयविपर्ययोर्मध्ये यदनवधारणज्ञानं स संशयः इति। न विद्यतेऽवधारणं यस्य तदनवधारणम्, तच्च तज्ज्ञानञ्चानवधारणज्ञानम् अनिश्चितज्ञानमित्यर्थः। संशयस्य निवृत्तौ ज्ञानसापेक्षतां हृदि सन्निधाय लक्षणे 'ज्ञाने' ति पदम्।

न्यायसूत्रकारेण तु 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'[15] इत्युक्तम्। अस्य सूत्रस्य व्याख्यां कुर्वता Validation of cognition through Discourse (Goutrna's Nyay sutra) नामके ग्रन्थे उच्यते–

Doubt is entertained to resolver uncertainities in a concern or a word construct, such uncertainities are Inherent in the conundrum of disorganized diversity of simmillar and dissimmilar behaviours, opinions, beliefs and consideration.[16] एतच्च गौतमीयसूत्रस्थानुवादमात्रम्। स च संशयः केषाञ्चिन्मते त्रिविधः, अथ भाष्यकृता न्यायसारकृता च पञ्चविधः स्वीकृतः। तथाहि 'स च समानधर्मानेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारणभेदात् पञ्चधा भिद्यते' इति। तत्रैतेषां उदाहरणानि क्रमशः 'किमयं स्थाणुः स्यात्पुरुषो वा' इति, आकाशविशेषगुणत्वात्किमयं शब्दो नित्योऽनित्यो वा इति, एके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानी'ति, किं सदुदकमुपलभ्यते, उतासदिति? किं विद्यमानः पिशाचो नोपलभ्यते, उताविद्यमान इति च भवन्ति।

व्याकरणशास्त्रीयपरम्परायामपि संशयस्य व्यावहारिकं स्वरूपं यत्र तत्र समुपलभ्यते। परिभाषेन्दुशेखरस्य प्रथमपरिभाषायाः अवतरणे 'ननु लण्-अइउण्-सूत्रयोर्णकारस्यैवोपादानेनाणिण्ग्रहणेषु सन्देहादनिर्णयोऽत आह–

'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्'[17] इति शेखर-कारेणोच्यते। तत्रैव 'असन्दिग्धानुष्ठानसिद्ध्यर्थेऽत्र शास्त्रे सन्दिग्धोच्चारण-रूपाचार्यव्यवहारेण सन्देहनिवृत्तेर्व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यत' इति वाक्येन शास्त्रस्य असन्दिग्धत्वसम्पादनाय सन्देहस्य संशयस्य वा प्रासङ्गिकत्वम् आचार्यव्यवहारद्वारा प्रदर्शितम्।

महाभाष्यकारेण तु 'असन्देहार्थमध्येयं व्याकरणम्'[18] इति रूपेण व्याकरणस्य परमप्रयोजनमेव प्रतिपादितम्। तत्र कैयटेन सन्देहस्य प्रागभावोऽत्र द्रष्टव्यः न तु प्रध्वंसाभावः। न हि वैयाकरणस्य संशय उत्पद्य विनश्यति, इतरस्य तदुत्पादात्[19] इत्युक्तम्। भाष्यकारपतञ्जलेस्तु शैल्येव संशयात्मिका प्रतिभाति। यत्र तत्र संशयगर्भितस्य वाक्यस्य प्राचुर्यं महाभाष्ये दृश्यते। तथाहि—'शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे,[20] किमिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः'[21] इत्यादि।

शाब्दिकमनुकुर्वद्भिरालङ्कारिकैरपि सन्देहालङ्कारविमर्शे साहित्यदर्पण उच्यते—

"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः" इति। प्रकृतेऽर्था-दुपमेयेऽन्यस्यार्थादुपमानस्य संशय एव सन्देहो नामालङ्कारः। तत्रोदाहरणं द्रष्टव्यं भवति—

**"किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी,**
**वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारां निधेः।**
**उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः,**
**किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः॥"**

अर्थात् किमियं नायिका रसाधिक्यकारणात् प्रस्फुटितयौवनवृक्षस्य नवा वल्लरी वर्ततेऽथ सागरतटप्रोच्छलितलावण्यवारां निधेः लहरिका। अथवा वर्धितोत्साहानां पुरुषाणां कृते स्वसमयमर्थात् सिद्धान्तं काम-शास्त्रीयव्यवहारं शिक्षितुं श्रृङ्गाराधिष्ठातृदेवकामदेवस्य उपदेशयष्टिः अस्ति। अत्र श्लोके वर्णनं समाप्तं परन्तु संशयस्य निश्चयो न जातः। इयमेव खलु चमत्कृतिरालङ्कारिकाणाम्। अत एव चात्र सन्देहोऽलङ्कारः। स च शुद्ध-संशयस्वरूपः।

एवम्प्रकारेण सर्वत्र शास्त्रे संशयस्य सैद्धान्तिकं वा भवतु, व्यावहारिकं वा, वर्णनन्तु दृश्यत एव।। इति शम्।।

**संदर्भः–**


1. तर्कसंग्रहः (व्याख्याचतुष्टयोपेतः), पृष्ठम्-60
2. श्रीमद्भगवद्गीता (श्लोक 40/4)
3. न्यायसूत्रम्-1/1/1
4. तर्कसंग्रहः व्याख्याचतुष्टयोपेतः, पृष्ठम्-157
5. तर्कसङ्ग्रहदीपिकायाम् (व्याख्याचतुष्टयोपेतः, पृष्ठम्-157)
6. तत्रैव पृष्ठसंख्या-158
7. शाब्दबोधमीमांसा, चतुर्थो भागः, पृष्ठ-411
8. तत्रैव पृष्ठ संख्या-412
9. तर्कभाषायाम्, पृष्ठ-263 (डॉ. श्रीनिवासशास्त्रीकृतायाम्)
10. कारिकावली, कारिका संख्या-129-130।
11. न्या.वा.पृष्ठ-91
12. प्र.मी. पृष्ठम्-5
13. न्या.ता.दी. पृष्ठ-57
14. तत्रैव
15. न्यायसूत्रम् (2.1.23)
16. Validation of cofnition through Discourse (Goutma's Nyau Sutra, GIA-23, Page-GNSIA-13)
17. परिभाषेन्दुशेखरः पृ.सं.-1
18. म.भा., पस्पशाह्निकम्, पृष्ठम्-21
19. तत्रैव, प्रदीपे
20. तत्रैव, पृष्ठ संख्या-62
21. म.भा., द्वितीयाह्निकम्, पृष्ठम्-138

# आचार्यबदरीनाथशुक्लसमीहितं
# संशयस्वरूपम्

**दीपककुमारद्विवेदी**

भारतीयदर्शनवाङ्मये न्यायशास्त्रस्य वैशिष्ट्यं महत्त्वमुपयोगिता च विशेषरूपेण दरीदृश्यते। अस्माकं दर्शनानां प्रामाणिकं, व्यवस्थितं तर्कसङ्गतं स्वरूपञ्च यदनुभूयते तत्र वादविद्यायाः अपूर्वयोगदानं विद्यते। अस्याः वादविद्यायाः मूलं न्यायशास्त्रमेवेति ज्ञेयम्। अस्य न्यायशास्त्रस्य मूल्याङ्कनं एतेनैव स्पष्टं भवति यत्सर्वे विचारशिलाः विद्वांसः स्वकीयं मतं प्रकाशयितुम् इमां न्यायविद्यामेव आश्रयन्ते। स्व-स्व शास्त्रार्थप्रकाशनाय दीपकवत् सर्वाणि शास्त्राणि प्रवृत्तानि भवन्त्येव परमिदं न्यायशास्त्रं तु सर्वेषां शास्त्राणां प्रदीपने समर्थं, मन्ये अत एव सर्वविद्यानां प्रदीपत्वमुद्घोषितं महर्षिणा कौटिल्येन।[1]

संशयसंलग्नसंसारसागरेऽस्मिन् संशयनिवारणार्थं न्यायशास्त्रस्य उत्पत्तिःजाता। न्यायमञ्जरीग्रन्थे जयन्तभट्टेन मुक्तकण्ठेन प्रोच्यते-- "न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां, वेदप्रामाण्यरक्षाहेतुत्वात् इति। वेदेषु हि दुस्तार्किकरचितकुतर्कप्लावितप्रामाण्येषु शिथिलतास्या कथमिव बहुवित्तव्ययायाससाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः। किं वा स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यमिति। तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेशक्षमम-क्षपादोपदिष्टमिदं न्यायविस्तराख्यं शास्त्रं प्रतिष्ठाननिबन्धनमिति।"[2]

संशयः समाधानस्य जनकोऽस्ति। संशयं विना न कस्यापि पदार्थस्य यथार्थज्ञानं सम्भवति। यावत् मनसि संशयस्य जन्म न भवति तावत् तस्य निराकरणेच्छा नात्मनि जायते। यथा व्याकरणशास्त्रे माहेश्वराणि चतुर्दशसूत्राणि आधारस्तम्भभूतानि इति मन्यते तथैव न्यायशास्त्रेऽपि षोडशपदार्थनिरूपण-

परं प्रथमं सूत्रं न्यायशास्त्रमूल भवति। न्यायशास्त्रस्य प्रमाणादिषोडशपदार्थानां वर्णनक्रमस्य नितान्तं वैज्ञानिकत्वम् अद्भुतं वैशिष्ट्यञ्च प्रतिभाति।

एषु षोडशपदार्थेषु 'संशयः' तृतीयः पदार्थो वर्तते। न्यायस्य प्रवृत्तिः संशयिते पदार्थे एव भवति। न्यायसूत्रस्यावतरणभाष्ये भाष्यकारः वात्स्यायनः निर्दशति "नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं तर्हि संशयितेऽर्थे" इति। महर्षिगौतमेन प्रथमाऽध्याये संशयस्य लक्षणं तु प्रमाणप्रमेयानन्तरं क्रमानुसारमेव कृतं परं परीक्षाऽवसरे प्रथमं प्रमाणप्रमेयपदार्थयोः परीक्षामकृत्य सर्वप्रथमं संशयस्यैव परीक्षा कृता। एवं स्वतः संशयस्योपयोगिता महत्ता सिद्धा भवत्येव। न्यायसूत्रे सूत्रकारेण गौतमेन त्रयोविंशति सूत्रेषु संशयशब्दस्य प्रयोगः कृतः। तत्र नवसूत्रेषु उद्देश-लक्षण-परीक्षाक्रमे संशयपदसमावेशः एवमवशिष्टेषु चतुर्दश सूत्रेषु प्रसङ्गान्तरेण संशयशब्दस्य समावेशः प्राप्यते।

कठोपनिषदि यम-नचिकेतासंवादे नचिकेतसः मनसि संशय उत्पद्यते यत् मृत्योरनन्तरम् आत्मनः सत्ता अस्ति न वा? नचिकेतसा यमराजेन तृतीयो वरः संशयनिराकरणार्थमेव याचितः–

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वमाहं वराणामेष वरस्तृतीयः।।**[4]

अत एव प्राचीनकालतः मान्यतेयं प्रसिद्धा यत्प्रथमं संशयो जायते तदनु यथार्थज्ञानस्य कृते जिज्ञासा भवतीति। न केवलं न्यायशास्त्रेऽपितु सम्पूर्णेऽपि संस्कृतवाङ्मये 'ननु', 'न वा', इति पदेन भाष्यकारः, वार्तिककारः, टीकाकारः। अन्ये वा ये केऽपि व्याख्यातारः तदनु समाधानं प्रस्तुवन्ति।

यदा मनसि विद्यमानानां सर्वेषां संशयानां निराकरणं भवति तदा मानवः परमानन्दस्वरूपं परमेश्वरं प्राप्नोतीति मुण्डकोपनिषद्यपि वर्णितम्–

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।।**[4]

श्रीमद्भगवद्गीतायामपि अर्जुनस्य मनः स्वजनसम्बन्धिमोहवशात् संशयसंलग्नो भवति तत्र भगवता श्रीकृष्णेन सम्यक् ज्ञायते यद्यावत् अर्जुनस्य अज्ञानरूपी मनसि विद्यमानः संशयो नष्टो न भविष्यति।

तावदस्यार्जुनस्य युद्धं प्रति मनः संकल्पबद्धं नैव भविष्यति। फलतः पार्थहृदि समुत्पन्नं संशयं निराकर्तुं श्रीकृष्णः अर्जुनमुपदिदेश–

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शन्तिमचिरेणाधिगच्छति।।**
**अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।**
**नायं लोकोऽस्ति न परो न सुखं संशयात्मनः।।**
**योगसन्न्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम्।**
**आत्मवन्तं न कर्माणि निबध्नन्तिधनञ्जय।**
**छित्त्वैनं संशयं योगमातिष्ठोतिष्ठ भारत।।**[5]

जैनदर्शनस्य प्राणस्वरूपसिद्धान्तः स्याद्वादो विद्यते। तेषु सप्ताभङ्गीनयेषु तृतीयं वाक्यं 'स्यादस्ति नास्ति' एवं सप्तमं वाक्यं 'स्यादस्ति नास्ति अवक्तव्यञ्च' अत्र संशयं परिदृश्यं शिवमहिम्नस्तोत्रेऽपि पुष्पदन्ताचार्येण वर्ण्यते यदा संसार-रक्षार्थं भगवता शिवस्य नृत्यमानन्देन प्रचलति तदा नृत्यसमये पृथिवीमातुः मनसि शिवपादैः प्रहारे सति संशयः जायते यद् अहं पादप्रहारणेन छिन्ना भिन्न सती पाताललोके गमिष्यामि वा' इति–

**मही पादाघाताद् व्रजति सहसा संशयपदं**
**पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।**
**मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटाताडिततटा**
**जगद्रक्षायै त्वं नटसि ननु वामैव विभुता।।**[6]

श्रीमदमरसिंहेनामरकोषे "सन्देह-द्वापरौ च विचिकित्सा तु संशयः[7]" इति संशयस्य चत्वारः पर्यायाः प्रतिपादिताः। संशयपदस्यानेका व्युत्पत्तयो दृश्यन्ते–

"संशीतिः संशय इति भावसाधनम् करणसाधनं वा संशेतेऽनेनात्मसुप्त इव भवति।"

"संशीतिः संशय इति भावसाधनम् करणसाधनं वा संशेतेऽनेनात्म-सुप्त इव भवति।"[8]

**"सर्वात्मना शेते इवात्मा यस्मिन् सति स संशयः।"[9]**
**एवं संशेरते मुह्यन्तीन्द्रियाण्यस्मिन्निति संशयः॥[10]**

**संशयस्य लक्षणम्**–न्यायसूत्रे गौतममुनिना "समानानेकधर्मोपपत्ते-र्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"[11] इति संशयस्य लक्षणं प्रोच्यते। "किं स्विदितिवस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः"[12] इति भाष्यकारेण वात्स्यायेन सूत्रमिदं व्याकुर्वता प्रतिपादितम्।

उद्योतकरभारद्वाजेन न्यायवार्तिके "समानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं नावधारयति यः स संशयः"[13] इति लक्षणं कृतम्। संशयस्य स्वरूपविषये भाष्यकारवार्तिकारौ केवलं सूत्राधारितस्य विषयस्यैव विवेचनं कृतवन्तौ। विशेषरूपेण वार्तिककारस्य संशय-प्रभेदविषयकं विवेचनं प्रथममस्ति सर्वप्रथमं वार्तिककारेणैव त्रयो भेदाः स्वीकृताः, परं सूत्रभाष्ययोः संशयस्य सामान्यसमीक्षणेन पञ्चविधत्वमेव भाति परिभाषायाः सम्बन्धे सूत्रे आपाततः मौलिकं चिन्तनं न कृतमिति प्रतिभाति। न्यायसिद्धान्तमुक्तावल्यां विश्वनाथभट्टाचार्येण संशयः इत्थं निरूप्यते–

**स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥[14]**

एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्।

न्यायसिद्धान्तमुक्तावलीकारः विश्वनाथपञ्चाननभट्टाचार्यः साधारणासाधारणौ धर्मौ संशयस्य कारणे स्तः इति स्वीकरोति परं विप्रति-पत्तिं संशयकारणत्वेन नाङ्गीकरोति "विप्रतिपत्तिस्तु शब्दो नित्योनवेत्यादिकं न संशयकारणं, शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभाव्यात्, किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते। संशयस्तु मानस एवेति। सर्वदर्शनकारः एवं न्यायभूषणकारः "अनवधारणज्ञानं संशयः"[15] इत्येवं संशयस्य लक्षणं प्रतिपादितवन्तौ। एतयोः आचार्ययोः मते अनिश्चयज्ञानं चानवधारणमित्युक्तम्।

अत एव निर्विकल्पकप्रत्यक्षस्य संशयत्वं न प्रसज्यते, तस्यापि निश्चयात्मकत्वात्। निश्चयात्मकत्वं च तत्प्रभवस्मृत्यनुमेयम्। तथाहि इदं

वस्तु तत्र नास्त्येव, अनेन सदृशमेतद्वस्तु, एतस्मादधिकं न्यूनं चेत्येवात्मिका स्मृतिः पूर्वानुभवनिश्चयात्मकं सूचयति। यतश्चानुभवादनिश्चयात्मिका स्मृतिरुपद्यते स संशय एवानिश्चयात्मकत्वात् इति।[16]

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः"[17] इति संशयलक्षणं तर्कसङ्ग्रहकारेणोक्तम्। एकस्मिन् पुरोवर्तिनि पदार्थे अनिश्चयात्मकाः परस्परविरुद्धाः ये स्थाणुत्वपुरुषत्वादयः नानाधर्माः तेषां वैशिष्ट्यम् अर्थात् सम्बन्धः तद्विषयकं ज्ञानं संशय इत्युच्यते।

अस्याशयोऽयं एकस्मिन्नेव विशेष्ये यत्र भावाभावौ विशेषणतया अवभासेते तज्ज्ञानं संशयः। यथा भूतलं घटवद्वा न वा इति। अत्र हि भूतले घटो घटाभावश्च विशेषणतया भासते इतीदं ज्ञानं संशयः।

वैशेषिकसूत्रे कणादमुनिः संशयस्य लक्षणं सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्-विशेषस्मृतेश्च संशयः[18] इत्युक्तम्। सूत्रस्यास्य उपस्कारटीकायां श्रीशङ्करः एवं व्याख्यां करोति–सामान्यवतो धर्मिणः प्रत्यक्षात् ग्रहणात् मतुब्लोपात् विशेषस्य परस्परव्यावर्त्तकस्य धर्मस्य वक्रकोटरादेः शिरः पाण्यादेश्चाप्रत्यक्षादग्रहणात्। विशेषस्मृतेः विशेषस्य कोटिद्वयस्य स्थाणुत्वपुरुषत्वलक्षणस्य स्मरणात्। स्मरणापि ग्रहणपरं कचिदनुभूयमानधर्मयोरपि कोटित्वात् इति[19] अत्र स्पष्टं भवति यत् वैशेषिकाचार्याणामपि लक्षणं सम्मतमेव इति।

तर्कभाषायां केशवमिश्रेण "एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशय इति प्रोच्यते।[20] प्राचीनाचार्याणां संशयलक्षणे प्रयुक्तः "विमर्शः" इति शब्दः तर्कभाषाकारस्य लक्षणे "अवमर्शः" इति परिष्काररूपेण इति परिदृश्यते स च त्रिविधः–विशेषादर्शने सति जायमानः समानधर्मजः विप्रतिपत्तिजः असाधारणधर्मजश्चेति।

**1. साधारणधर्मजः–** साधारणधर्मजः अर्थात् साधारणधर्मप्रयुक्तः। आचार्यबदरीनाथशुक्लमहोदयाः साधारणधर्मजस्य परिभाषां कुर्वन्ति "परस्परविरुद्धयोः द्वयोः धर्मयोः पूर्वदृष्टयोः कस्यापि एकस्य धर्मस्य कस्मिंश्चित् एकस्मिन् धर्मिणि ज्ञाने सति विशेषधर्मादर्शनदशायां कस्याश्चिद् एकस्याः कोट्याः अनिर्णयस्य स्थितौ यः संशयः जायते स साधारणधर्मज-

संशयो भवति। यथा स्थाणुर्वा पुरुषो वेति।[21]

अयं संशयः परस्परविरोधि द्वयोः भावात्मकधर्मयोः भवति। अस्य संशयस्य उदयार्थं तयोः द्वयोः धर्मयोः स्वरूपज्ञानस्य उभयोः विरोधज्ञानस्य चापेक्षा भवति। यद्यपि ययोः द्वयोः धर्मयोः कस्यापि एकस्य ज्ञानेन द्वितीयस्य ज्ञाने कापि सहायता न प्राप्यते तयोः द्वयोः चिरं विरोधः प्रतीयते। अत एव परस्परविरोधिनोः एतादृशयोः भावात्मकधर्मयोः संशयाः न्यूना एव भवन्ति। अधिकांशतः संशयाः भवन्ति। यत्र एकस्मिन् धर्मिणि परस्परविरुद्धयोः द्वयोः भावाभावात्मकधर्मयोः भानं भवति। यथा अयं स्थाणुर्नवा। अत्र स्थाणुत्वस्य ज्ञानेन स्थाणुत्वाभावस्य ज्ञाने सहायता प्राप्यते यतो हि स्थाणुत्वं स्थाणुत्वाभावस्य प्रतियोगी अस्ति, प्रतियोगिज्ञानम् अभावज्ञाने कारणं भवति। तयोः द्वयोः विरोधोऽपि सुस्पष्टः सुगमश्च भवति। फलतः भावाऽभावयोः परस्परविरोधिता आपामरप्रसिद्धा प्राप्यते।[22]

2. **विप्रतिपत्तिजः**— विप्रतिपत्तिजः अर्थात् विप्रतिपत्तिप्रयुक्तः। परस्परविरुद्धयोः धर्मयोः प्रतिपत्तेः अर्थाद् उपस्थितेः जनकः शब्दो विप्रतिपत्तिः। यथा शब्द एकः पदार्थः तस्य विषये विद्वान् मीमांसकः कथयति 'शब्दो नित्यः' अपरो विद्वान् नैयायिकः कथयति 'शब्दो अनित्यः' इति। उभयोः वाक्ययोः श्रोतुः मध्यस्थस्य पुरुषस्य उभाभ्यां वाक्याभ्यां शब्दरूपे धर्मिणि नित्यत्वाऽनित्यत्वरूपयोः परस्परविरुद्धधर्मयोः उपस्थितिः भवति। शब्दे च नित्यत्वानित्यत्वयोः अन्यतरनिश्चायकस्य विशेषधर्मस्य निश्चयो न भवति। अस्यां स्थितौ समुत्पन्नः शब्दमूलकः संशयः विप्रतिपत्तिजः भवति इति बोध्यम्।[23]

3. **असाधारणधर्मजः**— आसाधारणधर्मस्यार्थोऽस्ति 'परस्परविरुद्धयोः द्वयोः धर्मयोः एकस्यापि अधिकरणे अविद्यमानो धर्मः। यथा गन्धेन पृथिव्यां विद्यमानेन नित्यत्वानित्यत्वयोः संशयः। नित्यत्वम् अनित्यत्वञ्च परस्परौ विरुद्धौ धर्मौ स्तः। गन्धः तयोः एकस्यापि अधिकरणे न निश्चितः। यतो हि गन्धोऽयम् नाकाशादिषु नित्यपदार्थेषु तिष्ठति न वा जलाद्यनित्यपदार्थेषु विद्यते। एवंविधो गन्धः यदा पृथिव्यां ज्ञातो भवति तदा पृथिव्यां नित्यत्वस्य अनित्यत्वस्य वा निश्चायकविशेषधर्मस्यादर्शनाद् पृथिव्यां नित्यत्वानित्यत्वयोः

संशयो पृथ्वी नित्या नवेत्याकारको भवति।[24]

न्यायसूत्रकारेण संशयस्य पञ्चभेदाः उपदिष्टाः-समानानेकधर्मोपपत्तेः, विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति।[25] समान धर्मोपत्तेः अर्थः एकस्मिन् धर्मिणि परस्परविरुद्धयोः कोटिद्वयोः सामानाधिकरणस्य ज्ञानम्। अनेकधर्मोपपत्तिः—एकस्मिन् धर्मिणि परस्पराविरुद्धकोटिद्वयोः उपस्थापकः शब्दः। उपलब्धेरव्यवस्थायाः अर्थः उपलभ्ये वस्तु सद् एव भवति अस्य नियमस्याभावा। अनुपलब्धेरव्यवस्था अनुपलब्धं वस्तु असद् एव भवति इति अस्य नियमस्याभावः।

वैशेषिकसूत्रे संशयस्य प्रकारद्वयं क्रियते—"द्विविधः संशये बहिर्विषयकोन्तर्विषयकश्च। पुनः दृश्यमान धर्मिकोऽदृश्यमानधर्मिकभेदात् बहिर्विषयकोऽपि द्विविधः। तत्र दृश्यमानधर्मिको यथा ऊर्ध्वत्वविशिष्टस्य धर्मिणाः दर्शनाद् अयं स्थाणुः पुरुषो वेति। अदृश्यमानधर्मिको यथा अरण्ये गवयादिपिण्डे विषाणमात्रदर्शनाद् अयं गौर्गवयो वेति।[26]

तर्कभाषायां संशयविवरणप्रसङ्गन्यायसूत्रोक्तान्तिमद्वयभेदयोः विवेचनं केशवमिश्रेण न कृतम् यतो हि उपलब्ध्यनुपलब्ध्यव्यवस्थाभ्यां जायमानयोः संशययोः समावेशः साधारणधर्मजसंशये एव अभ्युपेयते केशवमिश्रेण।

न्यायसूत्रे साधारणधर्मणाऽसाधारणधर्मजसंशययोः विवेचनानन्तरं तृतीयक्रमे विप्रतिपत्तिजसंशयस्य वर्णनमस्ति। परं तर्कभाषायां साधारणासाधारण-धर्मजयोः संशययोः मध्ये तावत् विप्रतिपत्तिजस्य उल्लेखोऽस्ति। मध्ये वर्णनाद् अन्यद्वयोः अपेक्षा अस्य महत्त्वं सूचयति तर्कभाषाकारः। तन् महत्त्वं इदमस्ति यत् विप्रतिपत्तिजः संशयः विचारस्य अर्थात् कथायाः प्रवर्तको भवतीति आचार्याणां बदरीनाथशुक्लमहोदयानां युक्तियुक्तमभिमतम्।

**निष्कर्षः**— संशयस्य महत्त्वम् उपयोगिता च सर्वशास्त्रसम्मता यथार्थज्ञानप्राप्तेः प्रथमं सोपानं खलु संशयः। वस्तुतः संशय एव सन्मार्गप्राप्तेः तत्त्वज्ञानस्य च साधनम् इति।

**संदर्भः—**

1. प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
   आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।। (न्या.भा. 1-1-1)
2. न्यायमञ्जरी पृ.13
3. कठोपनिषदि 2-2-17
4. मुण्डकोपनिषद् 2/2/8
5. श्रीमद्भगवद्गीता 4 अ. श्लोकः 39-42
6. शिवमहिम्नस्तोत्रम् श्लो. 16।
7. अमरकोषः पृ. 25।
8. न्यायवार्तिकम् पृ. 91।
9. प्रमाणमीमांसा पृ. 5।
10. न्यायतात्पर्यदीपिका।
11. न्यायसूत्रम् 1-1-23।
12. न्यायभाष्यम् 1-1-23।
13. न्यायवार्तिकम् पृ. 1-1-23
14. न्यायसिद्धान्तमुक्तावली का. 130
15. सर्वदर्शनसङ्ग्रहः,
16. न्यायभूषणम् पृ.-13
17. तर्कसङ्ग्रहः पृ. 10
18. वैशेषिकसूत्रम् 2-2-17
19. वैशेषिकसूत्रोपस्कारः पृ. 172
20. तर्कभाषा पृ. 334
21. तर्कभाषा व्याख्या (बहरीनाथशुक्लः) पृ. 334
22. तत्रैव
23. तत्रैव पृ. 335
24. तत्रैव पृ. 336
25. न्यायसूत्रम् 1-1-23
26. वैशेषिकसूत्रोपस्कारः 2.2.17, पृ. 176

# संशयस्वरूपविचारः

**श्री जोगिन्द्रः**

अयथार्थानुभवस्य लक्षणं "तदभाववति तत्प्रकारकानुभवोऽयथार्थः"[1] इति। तथा च तदभाववद्विशेष्यकतत्प्रकारकोऽनुभवोऽयथार्थानुभव इत्यर्थः। यथा शुक्तौ रजतमिति ज्ञानम्। इयमेवाप्रमेत्युच्यते। विपर्यय–विपरीतज्ञानम्–अन्यथाख्याति–प्रभृतिभिः शब्दैरप्रमारूपस्य भ्रमज्ञानस्य व्यवहारो जायते।

तेन तदभाववति तत्प्रकारकज्ञानं भ्रम इत्यर्थः। रजतत्वादिशून्यायां शुक्तौ या रजतत्वप्रकारकबुद्धिः 'इदम् रजतम्' इति साऽप्रमेत्यर्थः। तेन च तदभाववन्निष्ठ–विशेष्यतानिरूपिता या तन्निष्ठप्रकारता तन्निरूपकज्ञानत्वम–प्रमात्वमिति। रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपिता या रजत्वनिष्ठ–प्रकारता तन्निरूपकज्ञानत्वस्य शुक्तौ 'इदं रजतम्' इत्यत्र सत्त्वात् समन्वयः। अत एव कारिकावल्यामुक्तं विश्वनाथेन "तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।"[2] "अथार्थानुभवस्त्रिविधः संशय विपर्यय–तर्क भेदात्।"[3] यद्यपि न्यायप्रस्थाने अयथार्थज्ञानस्य त्रैविध्यं प्रसिद्धं तथापि जगदीशनये संशय–विपर्यय–स्वप्न–अनध्यवसाय–भेदात् चतुर्विधम्। किन्तु भूषणकारनये संशयविपर्यय–भेदात् अयथार्थज्ञानं द्विविधं भवति। अन्येषां एषु एव अन्तर्भावात्।

महर्षिणा गौतमेन "समानानेक धर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य–व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"[4] इति सूत्रेण संशयो विवेचितः। संशये विशेषधर्मोपलब्धिः प्रतिबन्धिका, किन्तु संशयविषयीभूतस्य तस्य विशेषधर्मस्य स्मरणं तत्रावश्यकम्।

"स च समानधर्मानेकधर्मविप्रतिपत्युपलब्ध्यनुपलब्धिकारणभेदात् पञ्चधा भिद्यते।"[5]

तच्छब्दस्य प्राकरणिकार्थपरामर्शित्वात् स पूर्वोक्तः संशयः पञ्चधा

भिद्यत इति सम्बन्धः। कस्मादित्याह। समानधर्मेत्यादि। समानश्चासौ धर्मश्चेति कर्मधारये समानपरिणामादिरूपो धर्मो प्रत्याश्रयं भिन्नो लभ्यते। समानस्य धर्म इति षष्ठीतत्पुरुषे तु प्रत्याश्रयमभिन्नोऽपि धर्मः सामान्यावयविसंयोगादिरूपो लभ्यते।

अनेकस्मात् सजातीयविजातीयाद् व्यावर्तको धर्मोऽनेकस्य सम्बन्धी वा अनेकस्मिन् प्रतिषिद्धो वा अनेक[1] प्रत्यहेतुर्वा भेदसाधकत्वेनेत्यतोऽनेकधर्म इति। सर्वत्र मध्यपदलोपि समासात् सर्वथाप्यसाधारणो धर्मो इत्यर्थः। व्याहतः प्रवादो विप्रतिपत्तिः। प्राप्तिरुपलब्धिरप्राप्तिरनुपलब्धिः। पश्चाद् द्वन्द्व एव, यान्यसाधारणानि कारणानि तेषां भेदः पार्थक्यं तस्मात्। कोऽर्थः। समानधर्मादिरूपात् कारण-पञ्चकात् संशयपञ्चविधो भवति। विशेषापेक्षसामग्रीतः पतितात् तदनेकधर्माद्युपलक्षितसामग्रीजनितेभ्यः संशयेभ्योऽअर्थान्तरं भवतीत्येवमन्येष्वपि संशयेषु वाच्यम्। यद्यपि सूत्रकारवार्तिककारमते समानानेकधर्मोपपत्तेविप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः इति वचनात् संशयस्त्रेधा। तथाप्यसौ भाष्यकारमतेन संशयस्य पाञ्चविध्यमभिहितवान्।

ननु संशय एव नास्ति। कुतः तत्पाञ्चविध्यचिन्ता। यतः संशयज्ञाने किं धर्मी धर्मो वा प्रतिभाति। यदि धर्मी स किं तात्त्विकोऽतात्त्विको वा। यदि तात्त्विकः कथं तर्हि तद्बुद्धेः संशयत्वं तात्त्विकार्थग्रहणात्। अथातात्त्विकस्तर्ह्यतात्त्विकार्थविषयत्वाद् भ्रान्तिरेव न संशयः।

अथ धर्मः किं स्थाणुत्वरूपः पुंस्त्वरूपः उभयरूपो वा। पक्षत्रयेऽपि तात्त्विकत्वातात्त्विकत्वविकल्पाभ्यां प्राग्वद्दोषः, अथैकं तात्त्विकमन्यदतात्त्विकं तर्हि ज्ञानं तदेकम् एवाभ्रान्तं भ्रान्तं च स्यात्। मैवं, संशयः खलु सर्वेषामनवधारणप्रत्ययात्मकत्वेन एवात्मसंवेद्यः स धर्मिविषयो वा नोच्छेत्तुं शक्यः प्रमाणसिद्धत्वादिति। उक्तञ्च—

"स च समानधर्माऽनेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारणभेदात् पञ्चधा भिद्यते।"[6]

तद्यथा—

(क) समानधर्मात्– 'किमयं स्थाणुः स्यात् पुरुषो वेति'?

(ख) अनेकधर्मात्– 'आकाशविशेषगुणत्वात् किमयं शब्दो नित्यः स्यादिनित्यो वेति'?

(ग) विप्रतिपत्तेः– 'एके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानीति'।

(घ) उपलब्धेः– 'किं सदुदकमुपलभ्यते, उतासदिति?'

(ङ) अनुपलब्धेः– 'किं विद्यमानः पिशाचो नोपलभ्यते, उताविद्यमान इति?'

**उपसंहारः–**

इत्यत्र प्रथमसंशयस्य उदाहरणस्य अयं भावः यत् स्थाणुपुरुषयोः समाजः साधारणो धर्मो उर्ध्वत्वं तस्मात्। तच्चोर्ध्वव्यवहारकारणं सामान्यमवयवरचनाविशेषो वा।

द्वितीयः उदाहरणस्य अयं भावः यत् समानासमानजातीयमनेकमिहाभीष्टम्। अनेकस्माद् व्यावर्त्तको धर्मोऽनेकधर्म इति मध्यमपदलोपिसमासः। असाधारणो धर्म इति भावः।

तृतीयः संशयः विप्रतिपत्तेः उदाहरणस्य अयं भावः यद् एकरूपायाः विप्रतिपत्तेः सकाशात् किमिन्द्रियाणि भौतिकान्याहोस्विदभौतिकानीति संशयो मध्यस्थस्य विशेषमजानानस्य जायत इति।

चतुर्थसंशयभेदस्य उपलब्धेः उदाहरणस्य अयं भावः यद् विधिमुखेन ज्ञानप्रवृत्तिरुपलब्धिस्तस्या एव संशयः। क्वापि कूपखननान्तरं जलोपलब्धौ तदुपलब्ध्या संशेते तटाकादौ जलं सदुपलब्धं मरुमरीचिकाचक्रे चासत्। इदानीमत्र जलं यदुपलब्धं तत् किं सदसद्वेति।

संशयस्य पञ्चमभेदस्य उदाहरणस्य अयं भावः यत् प्रतिषेधमुखेन प्रवृत्तं ज्ञानम्। ज्ञानानुत्पादश्चानुपलब्धिः। तस्याः इत्थं संशयः। श्मशाने पिशाचो अस्तीति कश्चित् प्रसिद्धिमाकलय्य तत्र गत्वा तमदृष्ट्वा सन्दिग्धे।

"इत्यलम्"

**संदर्भः–**


1. तर्कसंग्रहः, पृ. 34
2. कारिकावली, पृ. 127
3. तर्कसंग्रहः, पृ. 94
4. न्यायसूत्रम्, पृ. 1.1.13
5. न्यायसूत्रम्, पृ. 3
6. न्यायसूत्रम्, पृ. 3

# न्यायदर्शने संशयः

**सियंका शर्मा**

दर्शनवाङ्मये 'न्याय' इति शब्दस्य प्रयोगः अत्यन्तप्राचीनोऽस्ति। किन्तु न्यायविद्यायाः तर्कभाषायाः वाऽर्थे तावदेव प्राचीनः नास्ति। पाणिनेरष्टाध्याय्यां[1] न्यायशब्दस्य प्रयोगस्तु अस्त्येव किन्तु तत्र स्पष्टं नास्ति यत् कस्याः संज्ञायाः रूपेण तत्र प्रयुक्तोऽस्ति। भट्टोजिदीक्षितेन तस्य निर्वचनात्मकोऽर्थः "नयन्त्यनेनेति न्यायः" इति स्पष्टं क्रियते। किन्तु अनेनार्थेन इदं न ज्ञायते यत् "न्यायशब्दः" तस्मिन् काले कस्य वाचक आसीत्। एकस्मिन् अन्यस्थले पाणिनिना विशेषार्थे न्यायशब्दस्य निष्पत्तिः 'निर' उपसर्गेण 'इण' धातुना मन्यते। पुराणेषु 'न्यायविद्या' कुत्रचित् विष्णोः कुत्रचित् ब्रह्मणः मुखात् निःसृतविद्यासु एका मन्यते।[2]

'आन्वीक्षिकी' शब्दः न्यायशास्त्रस्य कृते कौटिल्यार्थशास्त्रे प्रयुक्तोऽभवत्।[3] वात्स्यायनमते आन्वीक्षिकी समस्तधर्माणां आधारोऽस्ति।[4] न्यायभाष्यकारेण न्यायभाष्ये "प्रमाणैरर्थपरीक्षणं न्यायः" इति प्रतिपादितमस्ति। गौतमीयन्यायसूत्रमेव न्यायशास्त्रस्याधारोऽस्ति। न्यायसूत्रकारेण गौतममुनिना निःश्रेयसमेव शास्त्रस्य प्रयोजनम् इति स्वीकृतम्। इदं निःश्रेयसं प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् भवति।

यथोक्तम्—"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।"[6] एतेषां षोडशपदार्थानां मध्ये तृतीयपदार्थस्य संशयस्य विशिष्टं स्थानमस्ति। न्यायशास्त्रस्य प्रवृत्तिरपि संदिग्धपदार्थस्योपरि भवति। 'न्यायभाष्यस्य प्रारम्भे भाष्यकारेण वात्स्यायनेन प्रथमसूत्रस्य भाष्ये प्रोच्यते "नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं तर्हि संशयितेऽर्थे"[7] अर्थात् यस्य पदार्थस्य उपलब्धिरभवत् विद्वद्भिः यः अर्थः निश्चितः कृतः, तस्मिन् न्यायशास्त्रस्य प्रवृत्तिर्न भवति

केवलं संशययुक्तपदार्थविषये एव शास्त्रस्यास्य प्रवृत्तिर्भवति। अतः स्फुरति यत् संशयः तत्त्वज्ञाने विशेषः पदार्थोऽस्ति।

यतोहि न्यायसूत्रकारेण गौतमेन न्यायसूत्रे सर्वेषां षोडशपदार्थानां उद्देशलक्षणे विधाय परीक्षाऽऽवसरे संशयस्य परीक्षा कृता। क्रमानुसारेण तु सर्वप्रथमं प्रथमोद्दिष्टस्य प्रमाणपदार्थस्य परीक्षा भवेत्। अत इदमायाति यत् पदार्थस्यास्य अस्ति किमपि महत्त्वातिशयः। संशयपदस्यानेका व्युत्पत्तयो दृश्यन्ते–"संशीतिः संशय इति भावसाधनम्" कारणसाधनं वा संशेतेऽनेनात्मा सुप्त इव भवति"[8]। "सर्वात्मना शेते इवात्मा यस्मिन् सति स संशयः"[9] "संशेरते मुह्यन्तीन्द्रियाण्यस्मिन्निति संशयः।"[10]

तच्च संशयविपर्ययोरस्ति लोकशास्त्रयोस्तथा व्यवहारदर्शनादिति। नाज्ञातस्वरूपं हातुमुपादातुं वा शक्यमित्यतस्तयोः स्वरूपं व्यक्तं करणीयम्। अथेदमुच्यते–"तत्रानवधारणज्ञानं संशयः"। अनवधारणं च तज्जानं चेति। ननु ज्ञायते प्रतीयतेऽवधार्यतेऽर्थोऽनेनेति व्युत्पत्त्या "ज्ञानान्निःश्रेयसाधिगमः[11]" "ज्ञानं मोक्षैककारणम्[12]" "मोक्षे धीर्ज्ञानम्[13]" इत्यादि कोषाप्तवचोभिर्ज्ञान-पदस्य निश्चयवचनता अवसीयते, अनवधारणशब्दश्चानिश्चयवचनः प्रसिद्ध एव। तथा चानवधारणज्ञानमित्युक्तं भवति अनिश्चयो निश्चय इति। वार्तिककारेणापि एवं ज्ञानमवधारणं प्रत्ययश्चेति अनर्थान्तरं मत्वा इत्युक्तम्– "अनवधारणात्मकश्च प्रत्ययश्चेति व्याहन्यते"[14]। एतद्व्याघातपरिहार-परवार्तिकस्याशयं प्रकटयितुं टीकाकारः कथयति–"परमार्थस्तु प्रत्ययशब्दो ज्ञानपर्यायः, ज्ञानत्वं तु सामान्यं संशयादिषु अपि अस्तीति न विरोधः"[15] इति व्याघातान्न युक्तमिति चेत् न गोशब्दादिवत् जातिनिमित्तत्वात् ज्ञानशब्दस्य। यथा–गोपङ्कजादिशब्दा न व्युत्पत्तिवशेन स्वार्थेषु रूढाः किं तर्हि? जातिनिमित्तत्वेन, तथा ज्ञानशब्दोऽपि ज्ञानत्वजातिनिमित्तः स्वार्थे निरूढः।

सा च ज्ञानत्वादिजातिर्निश्चयानिश्चयस्वभावासु व्यक्तिषु वर्तते। अनिश्चयज्ञानं चानवधारणमित्युक्तम्। अत एव निर्विकल्पकप्रत्यक्षस्य संशयत्वं न प्रसज्यते, तस्यापि निश्चयात्मकत्वात् निश्चयात्मकत्वं च तत्प्रभवस्मृत्यनुमेयम्। तथाहि इदं वस्तु तत्र नास्त्येव अनेन सदृशमेव तद्वस्तु एतस्मादधिकं न्यूनं चेत्येवात्मिका स्मृतिः पूर्वानुभवं निश्चयात्मकं सूचयति। यतश्चानुभवादनिश्चयात्मिका स्मृतिरुत्पद्यते स संशय

एवानिश्चयात्मकत्वात्। अनुभवकारानुकारिणी हि स्मृतिः सा कथमन्यथा भवेदिति। प्रथमाक्षदर्शनजं ज्ञानं विशेषदर्शनादिनिमित्तमन्तरेणोपजायमानं निश्चयात्मकं संशयात्मकं वा कथं भवितुर्महतीति चेत्, नः अदृष्टादिसामग्री-वशात् तथोत्पत्तेः। अन्यथाऽनवस्थाभयाद् विशेषदर्शनमन्तरेणोपज्ञातं विशेषवतोऽप्यनिश्चय इत्यनिश्चयात्मकं जगत् स्यात्। न हि शिरः पाण्यादिविशेषानिश्चयज्ञानात् पुरुषेऽनिश्चयो दृष्टः। अदृष्टादेश्च सामर्थ्याभ्युपगमे तत एव निश्चयो भवतु, किमनिश्चयात्मकेन विशेषदर्शने-नानुपपन्नप्रमाणकेनेति? तदेवं विशेषदर्शनादिनिमित्तमन्तरेणापि क्वचिन् निश्चयात्मकमनिश्चयात्मकं च ज्ञानमस्ति इत्यतो निरवद्यं लक्षणम् "अनवधारणज्ञानं संशयः" इति मात्रादसम्भवी संशय इति चेत् न अनवधारणात्। न ह्येवमवधार्यते समानधर्मादेव संशय इति किं तर्हि? इन्द्रियार्थसन्निकर्षवद् साधारणकारणवचनं समानजातीयव्यवच्छेदार्थं, विजातीयव्यवच्छेदस्तु सामान्यलक्षेणैव कृतवान् नानुक्रियते सामान्यलक्षणानुवादेन हि विशेषलक्षणम् द्रष्टव्यम्। भाष्यकारवात्स्यायनेन "स चायं" किंस्विदिति वस्तुविमर्शन-मात्रमनवधारणं ज्ञानं संशयः"[16] इति संशयस्य लक्षणं साधितम्।

न्यायवार्तिककारेण उद्योतकरभारद्वाजेन "समानधर्मादिभ्यः उत्पन्नो विषयस्य विशेषं नावधार्यते यः स संशयः इत्युच्यते।"[17] संशयस्य स्वरूपविषये भाष्यकारेण वार्तिककारेण च सूत्रानुसारेणैव स्वव्याख्यानं प्रस्तुतम्। महर्षिणा कणादेन संशयस्य लक्षणं कृतम्–''सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः[18] इति।'' तर्कभाषायां तर्कभाषाकारेण संशयस्य लक्षणं कृतम् "एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः"[19] इति अर्थात् एकस्मिन्नेव धर्मिणि परस्परविपरीतानां बहूनां धर्माणां बोधः संशयः। यथा– स्थाणुर्वा पुरुषो वा इति ज्ञानम्। संशयस्य तर्कभाषायां भेदत्रयं स्वीकृतम्। तद्यथा- साधारणधर्मजविप्रतिपत्तिजासाधारणधर्मजभेदात्"

**1. साधारणधर्मजः–** तत्र प्रथमस्तु विशेषस्यादर्शने सति–

समानधर्मस्य दर्शनात् उत्पन्नो संशयो यथा– स्थाणुर्वा पुरुषो वेति "ज्ञानं साधारणधर्मजं भवति पुरोऽवस्थिते एकस्मिन् द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरादिकं एवञ्च पुरुषत्वनिश्चायक शिरःपाण्यादिकं विशेषतः

शारीरिकाङ्गानाम् अपश्यत: स्थाणुपुरुषयो: उर्ध्वत्वादिकं समानधर्मं पश्यत: पुरुषस्य तत्पदार्थविषये संशय: भवति" किमयं स्थाणुर्वा पुरुषो वा इति वक्रकोटरादिकं शिर:पाण्यादिकदर्शनं तथा च समानधर्ममूर्ध्वादिकदर्शनं संशयस्य कारणं भवति।

**2. विप्रतिपत्तिज:–** अयं संशयस्तु विशेषादर्शने सति विपरीता विविधा वा प्रतिपति: विप्रतिपत्ति: तदर्शनाद् भवति। अर्थात् एकस्मिन् विषये परस्परविरुद्धानां पदार्थानां विरुद्धवाक्याज्जन्यं भिन्नं ज्ञानमेव विप्रतिपत्ति: यथा– "शब्दो नित्यानित्यो" वा इति। तथाहि एक: वादी वैयाकरण: कथयति 'शब्दो नित्य' इति। अपर: नैयायिक: कथयति 'शब्दोऽनित्य" इति तयो: विप्रतिपत्त्या नित्यत्वानित्यत्वप्रतिपादकहेतुम् अपश्यत: मध्यस्थस्य पुरुषस्य संशयो भवति किमयं? "शब्दो नित्य उत वा अनित्य" इति।

**3. असाधारणधर्मज:–** तृतीय: संशयस्तु असाधारणधर्मदर्शनाद् भवति यथा– नित्यात् अनित्यात् च पृथक्त्वेन भासमानेन भूमात्रासाधारण-धर्मेण गन्धवत्त्वेन नित्यत्वानित्यत्वयो: निश्चायकं विशेषमपश्यत: पुरुषस्य पृथिव्यां नित्यत्वानित्यत्वविषये संशयो भवति तथाहि–आकाशादिसम्पूर्णनित्य-पदार्थेभ्य: व्यावृत्तेन गन्धवत्त्वधर्मेण योगाद् किं "भू: अनित्या" उत वा जलाग्न्यादिसम्पूर्णनित्यपदार्थेभ्य: व्यावृत्तेन तेन एव गन्धवत्त्वधर्मेण योगाद् "पृथिवी नित्या" इति संशयो भवति। अयं संशय: गन्धवत्त्वरूपा-साधारणधर्मदर्शनाद् भवति।

**संशयस्य प्रभेदा:–** न्यायसूत्रकारेण भाष्यकारेण च संशयस्य पञ्चभेदा: स्वीकृता– ते च "समानानेकधर्मोपपत्ते: विप्रतिपत्तेरुप-लब्ध्यनुपलब्ध्यव्यवस्थातश्चेति भेदात्।

**1. समानधर्मोपपत्ते:–** स्थाणुपुरुषयो: उर्धत्वस्थूलत्वादिधर्मा: समाना:। एतत्सदृशवस्तु दृष्ट्वा जिज्ञासा भवति यत् कोऽयं? "स्थाणुर्वा पुरुषोवेति।" उभयोर्मध्ये धर्मसमानता एव जिज्ञासाया: कारणम्। प्रत्यक्षं तु केवलं एकस्यैव भवति।

एतादृशस्य अत्र वस्तुसाधारणधर्मस्य ज्ञानेन संशयो भवति। तस्मात् कारणात् पुरुषस्य वस्तुन: विषये जिज्ञासा भवति। संशयार्थं "विशेषापेक्षा"

पदमत्र अनिवार्यं यतः समानधर्मस्य ज्ञानन्तु वस्तुनः स्वरूपनिर्णये सत्यपि वस्तुनि तिष्ठति परं विशेषधर्मस्य निर्णयानन्तरं सन्देहो न प्रतिभाति।

**2. अनेकधर्मोपपत्तेः–** अत्रानेकपदेन समानधर्मः, असमानधर्मश्च गृहीतः भवति। यथा "शब्दः विभागजः" इत्थं ज्ञाने सति संशयो जायते यत् शब्दः द्रव्यं गुणः कर्म वा यतोहि विभागजत्वं शब्दस्य विशेषधर्मोऽस्ति। स कदापि तेन रहितो न भवति। वार्तिककारेण उद्योतकरेण समानानेकधर्मयोः मध्ये विद्यमानं वैमत्यं स्पष्टीकृतम्।[20] अनेक धर्म इति पदे 'धर्मः' शब्दः विशेषवाची, यतोहि– कस्यापि पदार्थस्य विशेषः तस्य धर्म एव भवति, सः विशेषस्तु स्वकीयातिरिक्तं सर्वस्य समानजातीयात्मकस्य असमान–जातीयात्मकस्यानेकस्यापेक्षां करोति। अत एव अनेकस्माद् विशेषः अनेकेभ्यो विशेषः अनेक धर्मः एतादृशव्याख्यानानुसारमसाधारणधर्मः अनेकधर्म इति कथ्यते। अत एव ज्ञानेन संशयस्य उपस्थितिः अस्वाभाविकीति गर्वेण न वक्तुं शक्यते।

**3. विप्रतिपत्तिविशेषापेक्षाजन्यसंशयः–** अस्मिन् संशये विप्रतिपत्ति–वाक्यस्य ज्ञानम्" कदापि पदार्थस्य स्वरूपसम्बन्धे परस्पर विरोधिमतानि दृश्यन्ते। दर्शनवाङ्मये एकं दर्शनमात्मनः सत्तां स्वीकरोति अपरमात्मनः सत्ता न स्वीकरोति। अत्र आत्मनः यथार्थस्वरूपविषये निश्चयो न भवति। फलतः मनसि विषयेऽस्मिन् संशयो जायते आत्मनः सत्ता अस्ति न वा इति।

**4. उपलब्धेरव्यवस्थातः–** जलाशये जलस्य भावे तस्य भानं भवति परन्तु भास्करस्य मयूखेषु जलाभावेऽपि जलस्य प्रतीतिर्भवति। अत एव न एतादृशी व्यवस्था यत् विद्यमानस्य पदार्थस्य एव ज्ञानं भवेत्। अत इदम् अवधार्यते यत्पदार्थस्य उपस्थितौ एव तस्य प्रतीतिर्न भवति, अपितु अनुपस्थितौ अपि तस्य प्रतीतिर्दृश्यते इति। तथा च संशयो जायते–"जलं सदुपद्यते उतासदिति।

**5. अनुपलब्धेरव्यवस्था–** एतादृशी व्यवस्था यथा उपलब्धविषये भवति तथैव अनुपलब्धविषयेऽपि दृश्यते। पदार्थे विद्यमाने सत्यपि कदापि अप्रतीतिर्भवति, यथा–भूमौ अन्तःभागे स्थितस्य पदार्थस्य मूलभागस्य,

अविद्यमानपदार्थस्य च अप्रतीतिस्तु स्पष्टा एवास्ति, यथा–शशविषाणस्याप्रतीति:। एतेषु स्थलेषु संशय: उत्पद्यते यद् वस्तुनि विद्यमाने सति तस्य ज्ञानं न भवति अथवा अविद्यमाने सति।

इत्थं न्यायदर्शनदिशा यथामति संशयपदार्थस्य स्वरूपं मया प्रतिपादितम्। प्राय: संशयपूर्विकैव सर्वापि विचारप्रवृत्ति: दृश्यते। अत: संशयस्य विचाराङ्गता स्वीकरणीया।

'इति शम्'

**संदर्भ:–**

1. अष्टाध्यायी 2/3/122
2. मत्स्यपुराणम्।
3. कौटिल्यार्थशास्त्रे। 12/1/11
4. प्रदीप: सर्वविद्यानामुपाय: सर्वकर्मणाम्।
   आश्रय: सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।। (न्या.भा. 1-1-1)
5. न्यायसूत्रम् 1-1-1
6. न्यायसूत्रम् 1-1-1
7. न्यायभाष्यम् 1-1-1
8. न्यायवार्तिकम्, पृ. 91
9. प्रमाणमीमांसा पृ. 5
10. तात्पर्यदीपिका पृ. 56
11. न्यायसूत्रम् 1-1-1
12. कौलो?
13. अमरकोश: पृ. 25
14. न्यायवार्तिकम्, पृ. 12
15. तात्पर्यटीका पृ. 244
16. न्यायभाष्यम् 1-1-1
17. न्यायवार्तिकम्, 1-1-23 पृ. 87
18. वैशेषिकसूत्रम्-2/2/17
19. तर्कभाषा पृ. 334
20. न्यायवार्तिकम्, 1-1-23 पृ. 91

# तर्कसंग्रहदिशा संशयस्वरूपविमर्शः

रामनिहोरचतुर्वेदी

"न्यायदर्शने षोडशपदार्थाः अभ्युपगताः सन्ति। तच्चोक्तं सूत्रकारैः [1]"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः इति। एतेषां षोडश-पदार्थानामन्तर्भावः वैशेषिकोक्तसप्तपदार्थेषु भवतीति न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वं प्रसिद्धम्।

"एते च पदार्थाः वैशेषिकनये प्रसिद्धाः नैयायिकानामप्यविरुद्धाः।[2]

"तत्र गुणपदार्थस्य व्याख्यानावसरे प्रत्येकं गुणनिरूपणक्रमे तर्कसंग्रहकारेण श्रीमदन्नम्भट्टेनोक्तम्–[3]"सर्वव्यवहारहेतुर्गुणो बुद्धिः ज्ञानम्। सा द्विविधा स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञान-मनुभवः, सः द्विविधः यथार्थोऽयथार्थश्चेति। तद्वति तत्प्रकारकोऽनुभवो यथार्थः।

"यथा–अयं घटः इति ज्ञानं सैव प्रमेत्युच्यते। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। सैवाप्रमेत्युच्यते। यथा शुक्तौ इदं रजतमिति ज्ञानम्।

अयथार्थानुभवस्त्रिविधः–संशयविपर्ययतर्कभेदात्।[4] अयथार्थानुभवो मिथ्याज्ञानं संशयः स्मृतिः संकल्पः तर्कः स्वप्नश्चेति षड्विध इति केचित्। प्रशस्तपादानां शङ्करमिश्राणां च मते अयथार्थानुभवः संशय-विपर्ययानध्यवसायस्वप्नभेदात् चतुर्विधः।

"न्यायदर्शनस्य प्रवर्तकानां महर्षीणाम् अक्षपादगौतमानां न्यायदर्शन-भाष्यकर्तृणां वात्स्यायनानां च मते स संशयः "समानानेकधर्मोपपत्ते-र्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यऽव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति। स च संशयः न्यायदर्शनदिशा पञ्चविधः।

"न्यायवार्तिककाराणामुद्योतकरभारद्वाजानां वाचस्पतिमिश्राणाम्, उदयनाचार्याणां च मतेऽयं संशयः [6]"समानधर्मोपपत्तेरनेकधर्मोपपत्ते-र्विप्रतिपत्तेश्चेति त्रिविध एव इतरपदविशेषणाद् भवतीति सूत्रार्थः। तर्कभाषाप्रणेतृणां केशवमिश्राणां श्रीविश्वनाथपादानां च मते संशयोऽयम् एवं विवेचितः।

[7]"एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः। स च त्रिविधः विशेषादर्शने सति समानधर्मदर्शनजः, विप्रत्तिपत्तिजः, असाधारणधर्मजश्चेति।

तत्रैको विशेषादर्शने सति समानधर्मदर्शनजः यथा "स्थाणुर्वा पुरुषो वा" इति। एकस्मिन्नेव हि पुरोवर्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरादिकं पुरुषत्वनिश्चायकञ्च शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्ध्वत्वादिकञ्च पश्यतः पुरुषस्य भवति संशयः "किमयं स्थाणुर्वा पुरुषो" इति।

[8]द्वितीयस्तु संशयो विशेषादर्शने सति विप्रतिपत्तिजः। स यथा "शब्दो नित्य उत वा अनित्य" इति। तथा ह्येको ब्रूते शब्दो नित्य इति, अपरो ब्रूते शब्दोऽनित्य इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुंसो विशेषमपश्यतो भवति संशयः "किमयं शब्दो नित्य उतानित्य" इति।

तृतीयोऽसाधारणधर्मदर्शनजस्तु- संशयो यथा–"नित्यादनित्याच्च व्यावृत्तेन भूमात्रासाधारणेन गन्धत्वेन विशेषमपश्यतो भुवि नित्यत्वानित्यत्व-संशयः। तथाहि सकलनित्यव्यावृत्तेन गन्धवत्त्वेन योगाद् भूः किमनित्या, उत सकलानित्यव्यावृत्तेन तेनैव योगान्नित्या" इति संशयः।

**[9]"स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥"**

अर्थाद् एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः। इति न्यायसिद्धान्तमुक्तावलीकाराणां विश्वनाथपञ्चाननभट्टाचार्याणां मतम्।

प्रभाकरमतिरिच्य सर्वेऽपि दार्शनिकाः संशयं स्वीकुर्वन्ति। तत्र "एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः इत्यन्नम्भट्टपादाः। एकस्मिन् धर्मिणि विरुद्धानां नानाधर्माणां ज्ञानं संशय

इत्यर्थः।

ये[10] धर्मा एकस्मिन् एव काले एकस्मिन् एव पदार्थे स्थातुं शक्नुवन्ति ते तस्य पदार्थस्य विरुद्धाधर्माः। यस्मिन् अधिकरणे विरुद्ध-धर्माणां ज्ञानं भवति तदधिकरणं धर्मिशब्देन विरुद्धधर्मश्च कोटिशब्देन व्यपदिश्यते। यद्यपि क्षेत्रभेदेन संशयः त्रिकोटिकः चतुष्कोटिकः ततोऽधिक-कोटिको वा भवितुमर्हति, तथापि प्रायशः संशयो द्विकोटिक एव भवति।

यथा "स्थाणुर्वा पुरुषो वा" इति द्विकोटिकज्ञानम्।

स्थाणुत्वपुरुषत्वयोर्यद्यपि विरोधः तथापि एकस्मिन् वस्तुनि तयोर्ज्ञानं भवतीति इदं संशयज्ञानम्। अत्र स्थाणुपुरुषत्वांशे एव संशयः न तु इदन्त्वांशे इति संशयस्य अव्याप्यवृत्तित्वम् इति नैयायिकनामाशयः।

"एकधर्मिविशेष्यकत्वे सति विरुद्धनानाधर्मप्रकारकत्वे सति ज्ञानत्वं संशयस्य लक्षणम्।[12] स्थाणुर्वा पुरुषो वेति संशये पुरोवर्त्तिवस्तु-रूपैकधर्मिविशेष्यकत्वस्य स्थाणुत्वपुरुषत्वरूपविरुद्धनानाधर्मप्रकारकत्वस्य ज्ञानत्वस्य च सत्वाद् भवति लक्षणसमन्वयः। संशयलक्षणे ज्ञानत्वमात्रोक्तौ विपर्ययादौ, ज्ञानत्वानुपादाने संशय-जन्यसंस्कारे स्थाणुर्वा पुरुषो वेति संशयो मे भूयादितीच्छायां वा अतिव्याप्तिः।

"प्रथमसत्यन्तानुपादाने" पर्वतो वह्निमान्, ह्रदो वन्ह्यभाववान् इति समूहालम्बनज्ञाने अतिव्याप्तिः। अत्र वह्निवह्न्यभावरूपविरुद्धनानाधर्मयोः प्रकारत्वात्। एकधर्मिकविशेष्यकत्वस्योपादाने तु तज्ज्ञानस्य धर्मिद्वयमुख्य-विशेष्यकतया नातिव्याप्तिः।

[13]नानापदानुपादाने पर्वतो वह्न्यभावविरुद्धवह्निमानितिज्ञानेऽतिव्याप्तिः। तत्र पर्वतरूपैकधर्मिविशेष्यकवन्ह्न्यभावविरुद्धवह्निरूपविरुद्धधर्मिविशेष्यक-वह्न्यभावविरुद्धवह्निरूपविरुद्धधर्मप्रकारकत्वस्य च सत्वात्। अतो नानापदम्। तन्निवेशे तु तत्र वह्न्यभावविरुद्धवह्निरूपैकधर्मस्यैव प्रकारत्वेन नानाधर्म-प्रकारकत्वाभावात्। न चैवमपि पर्वतो वह्न्यभावविरुद्धवह्निधूमवान् इति वह्निधूमोभयांशेऽपि वह्न्यभावविरुद्धत्वावगाहिनि निश्चयेऽतिव्याप्तिः। मुख्यप्रकारीभूतनानाधर्मयोः परस्परं विरोधस्य विवक्षितत्वात्। पूर्वोक्तज्ञानीय-

वह्निधूमयोः परस्परमविरुद्धत्वात्। विरुद्धपदानुपादाने "घटपटवद्भूतलम्" इति एकत्र द्वयमितिरीत्यावगाहिज्ञाने एकधर्मिविशेष्यकत्वनानाधर्मप्रकारकत्व-ज्ञानासत्वादतिव्याप्तिः। विरुद्धपदनिवेशे तु घटपटयोर्विरुद्धत्वा-भावान्नातिव्याप्तिः।

नन्वेवमपि शतेपंचाशन्न्यायेन पर्वतो वह्निमान् ह्रदो वह्न्यभाववान् इति समूहालम्बने एकधर्मिविशेष्यकत्वस्यापि सत्वादतिव्याप्तिरितिचेत् न, एकधर्मिनिष्ठविशेष्यतानिरूपिताः विरुद्धनानाधर्मनिष्ठाः याः प्रकारताः तन्निरूपकत्वस्यैव विवक्षितत्वात्। प्रकृते च एकधर्मिनिष्ठविशेष्यतानिरूपिता न नानाधर्मप्रकारता इति नातिव्याप्तिः। एवमपि द्रव्यं वह्निमत् ह्रदो वह्न्यभाववान् इति समूहालम्बने द्रव्यत्वेन रूपेण ह्रदस्यापि विशेष्यतया एकस्मिन् ह्रदरूपे धर्मिणिवह्नितदभावयोः प्रकारत्वेन अतिव्याप्तितादवस्थ्यम्। तद्वारणाय एकधर्मावच्छिन्नविशेष्यतानिरूपितत्वं विरुद्धनानाधर्मनिष्ठप्रकारतासु विशेषणीयम्। तत्त्वं च द्रव्यत्वह्रदत्वाभ्यां भासमानह्रदरूपैकधर्मिणि नानाधर्मयोः प्रकारत्वेऽपि एकधर्मावच्छिन्ने तयोः प्रकारत्वाभावात् नातिव्याप्तिः।

तत्रायमाशयः प्राचीननैयायिकानां मते भावात्मककोटिकः संशयः। यथा–स्थाणुर्वा पुरुषो वा इत्यत्र स्थाणुः पुरुषश्च इति कोटिद्वयमपि भावात्मकम्। नव्यनैयायिकानां मते तु संशयो विरुद्धभावाभावचतुष्कोटिकः। यथा अयं स्थाणुर्न वा पुरुषो नवेति। अत्र "स्थाणुः स्थाण्वभावः", "पुरुषः पुरुषाभावश्चेति" भावाभावचतुष्कोटिकः संशयः।

वस्तुतः तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किन्तर्हि? संशयितेऽर्थे इति न्यायभाष्यकारोक्तवचनमवधृत्य संशयो हि जिज्ञासामुत्पादयतीति भवति न्यायाङ्गं मोक्षं प्रति सहायकश्च।[14] अत एव न्यायदर्शनप्रणेतृभगवताक्षपादगौतमेन प्रमाणादिषोडशपदार्थमध्ये अयं संशयः परिगणितः।

यथोक्तञ्च न्यायभाष्यकारैः "तस्याः पृथक् प्रस्थानाः संशयादयः पदार्थाः[15] तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात्" यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते। इयं न्यायविद्या इति विशेषतोऽवधेयम्।

**संदर्भः–**


1. न्या.द.सू. 1 1/1/1
2. न्या.सि.मु.कि. पृ. 25
3. तर्क.स.कि. पृ. 60
4. तर्क.स.कि. पृ. 157
5. न्या. सू. 1/1/23 पृ. 30
6. न्या.वा. पृ. 91
7. तर्क.भा. पृ. 235
8. तर्क.भा. पृ. 236
9. न्या.सि.मु.का.स. 130 कि. पृ. 424
10. न्या.द.वि. पृ. 116
11. न्या.द.वि. पृ. 117
12. न्या.प्र. पृ. 155
13. न्या.प्र. पृ. 156
14. न्या.प्र.स. पृ. 18
15. न्या.भा. पृ. 3

# न्यायदर्शने अयथार्थज्ञानस्वरूपम्

**धीरजकुमारः**

भगवता गौतमेन प्रमाणदिषोडशपदार्थानां गणना एकेनैव सूत्रेण कृता। ते च पदार्थाः **प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽऽवयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानि।**[1] एतेषु मध्ये अन्यतमपदार्थः संशयः। स च संशय अयथार्थज्ञानस्य भेदः। अयथार्थज्ञानस्य त्रयो भेदाः सन्ति– संशयः विपर्ययः तर्कश्च। भासर्वज्ञविरचिते न्यायसारनामके ग्रन्थे **'तत्रानवधारणज्ञानं संशयः'**[2] इति प्रतिपादितमस्ति। स च संशयः कुत्रचित् पञ्चविधः कुत्रचिच्च त्रिविध एव।[3]

भाष्यकारवात्स्यायनः संशयस्य पञ्चभेदान् स्वीकरोति[4] किन्तु वार्तिककारमते संशयः त्रिविधः। न्यायवार्तिके प्रतिपादितम् यत् – त्रिविध एव संशय अपरे पुनः समानधर्मोपपत्यादिभिः पदैः पञ्चविधः संशयः वर्णयन्ति, तन्न युक्तम्। तदेतन्मतं निराकरोति भासर्वज्ञः[5] अप्रमाज्ञानात्मक-संशयस्य अनेकाः व्युत्पत्तयः भवन्ति– संशीतिः संशयः, संशेते अनेन आत्मा इति संशयः, संशेरते मुह्यन्तीन्द्रियाणि अस्मिन् इति संशयः।

अप्रमात्मकज्ञानस्य द्वितीयो भेदः विपर्ययः। तत्र **'मिथ्याज्ञानं विपर्ययः'**[6] इति विपर्यय लक्षणम्। अयञ्च भ्रमः इति।। एतेन तदभाववति तत्प्रकारकनिर्णयो विपर्ययः इत्यर्थः। यथा– शुक्तौ रजतमिति। अत्र शुक्तौ इति पदं परिचायकमात्रम्। वस्तुतः इदं रजतमिति ज्ञानं विपर्ययः इति।[7] ह्रदो वह्निमानिति ज्ञानं वह्न्यभाववद् ह्रदविशेष्यकवह्निप्रकारकः भ्रमः विपर्ययो वेति। विश्वनाथपञ्चाननमते शरीरादावात्मबुद्धेः शंखादौ च पीतबुद्धे-र्निश्चायकज्ञानं विपर्ययः[8] इति।

भ्रमशब्दोऽन्यथाख्यातिनाम्ना न्यायनये सुप्रसिद्धः। अन्यथा ख्यातिश्चा-प्रमात्मकज्ञानेऽन्यस्य अन्यभानात्मिका। वार्तिककार उद्योतकरोऽपि 'विपर्ययो

नाम अतस्तस्मिंस्तदिति प्रत्यय इत्याह।' विपर्ययस्य अन्यथाख्यातिरिति नामान्तरं तात्पर्यटीकाकारः कथयति।

मिथ्याध्यवसायो विपर्ययः[9] इति। विपरियन्तीन्द्रियाणि अस्मिन्निति विपर्ययः मिथ्येत्यादि। मिथ्या अतस्मिंस्तदितिरूपोऽध्यवसायो निश्चयो मिथ्याध्यवसायः। विपर्ययेति लक्षणे कृते किमपेक्षस्यातन्निवृत्यर्थमध्यवसायेति। अध्यवसाय सम्यक् ज्ञानेऽप्यस्तीति तद्व्युदासार्थं मिथ्येति। मिथ्याविपर्यय इति कृते असत्वे तत्त्वं मिथ्यात्वं तच्च संशयेऽप्यस्तीति। तन्निरासार्थमध्यवसायेति 'विपरीतं ज्ञानं विपर्ययेत्यर्थः।'

विपर्ययो द्विधा अनुभूयमानारोपः स्मर्यमाणारोपश्च। तत्रादौ अनुभूयमानारोपमुदाहरति। तद्यथा– द्वौ चन्द्राविति।

अत्र पूर्वक्षणे एकत्वेनानुभूयतज्जन्या कनीनिका निष्पीडनतिमिरातिशयाद्वा द्वौ चन्द्रावुभूयेते। तदपसारणे पुनरैक एव। ततः प्राक्तनेन पाश्चात्येन च चन्द्रैक्यग्राहिणाज्ञानेन चन्द्राद्द्वित्वज्ञानस्य बाध्यमानत्वाद्विपर्ययस्तत्त्वं स्यादिति।

स्मर्यमाणारोपमाह–'सुप्तस्य गजादिदर्शनञ्चेति'।

अत्र वादीनां विवेकख्यात्यख्यात्यसत्ख्यातिप्रसिद्धार्थख्यात्यात्मख्यातिसदसत्वाद्यनिर्वचनीयार्थख्यात्यलौकिकार्थख्यातिविपरीतख्यातिरूपा अष्टौ विप्रतिपत्तयः सन्ति। विपरीतार्थख्यातिख्यापयितुमिदमुदाहरणम्।

भूषणकारास्तु यत् स्वप्नज्ञानं प्रमाणफलस्मृतिसंशयादिभ्योऽर्थान्तरमिच्छन्ति तन्मतप्रतिक्षेपार्थं सकलविपर्ययसंग्रहार्थञ्च द्वितीयमुदाहरणमित्युदाहार्षीत्। स्वप्नज्ञानस्य कथं विपर्ययत्वमिति चेत्। गजादीनां प्रागनुभूतानां स्वप्ने देशकालावस्थावैपरीत्येनानुभवात्। अनुभवोऽनुयुज्यताम्। न खलु अनुभवेऽप्यप्रतीतिर्नाम। तदुक्तञ्च–

**जन्मन्येकत्रभिन्ने वा तथा कालान्तरेऽपि वा।**
**तद्देशे वा अन्य देशे वा स्वप्नज्ञानस्य गोचरः॥**[10]

अनुभूतप्रतिभासाङ्गीकारे च पृष्ठभूतप्रतिभानुषङ्गात्। देशादिवैपरीत्यन्तु अनुभवसिद्धम्। तदेव नैयायिकमते विपरीतख्यातिर्व्यवस्थिता। इतरख्यातिनिरासौ भूषणादिशास्त्रेभ्यो ज्ञेयः। अतएव तात्पर्यटीकायाम्–

सम्प्रति संदिहानो विपर्ययस्वरूपं पृच्छति कः पुनरयं विपर्ययेति।

परीक्षकाणां विप्रतिपत्तेः संशयः। केचित् स्वाकारबाह्यत्वविषयं ज्ञानं विपर्ययः इत्याचक्षते। अन्ये असद्विषयं ज्ञानमन्यथाख्यातिं तु वृद्धाः इति।

शुक्तौ इदं रजतमिति ज्ञानं रजतत्वनिष्ठप्रकारतानिरूपित शुक्तिनिष्ठ-विशेष्यताशालि इदञ्चैकं विशिष्टज्ञानम्। ततः प्रवृतिरिति प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वमसत्यस्थले सत्यप्रवृत्तिवद् इत्यनुमानमन्यथाख्याति-प्रमाणम्। अनुव्यवसायात्मकमपि ज्ञानं तत्र मानम्।

प्रशस्तपादभाष्ये प्रत्यक्षविषयकविपर्ययोऽनुमानविषयकविपर्ययश्च विचारितौ। तत्र प्रत्यक्षविषयक "विपर्ययो"[11] नाम प्रत्यक्षाभावोऽपि यत्र प्रत्यक्षाभिमानो जायते। व्यपगतघनपटलमचलजलनिधिसदृशमम्बरमञ्जन-चूर्णपुञ्जश्यामं शार्वरं तमिति।

अयथार्थज्ञानस्य अन्तिमः तृतीयो भेदः तर्कः। स च तर्कः अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहेति। ऊहश्च सम्भावनाप्राप्त्यर्थः।

अत्र प्रयोजनं तत्त्वज्ञानम्। कारणोपपत्तितः इत्यत्र कारणशब्दस्य प्रमाणरूपोर्थः उपपत्तिशब्दस्य च सम्भवरूपार्थः। तथा च प्रमाणस्य सम्भवप्रयुक्तो य ऊहः स तर्कः इति। तर्कः इति पर्यायः। तथा च ऊहरूपत्वं तर्कलक्षणं स्पष्टमिति।

इत्थं प्रकारेण यथामति अयथार्थज्ञानस्य स्वरूपं भेदाश्च उपस्थापिताः।

**संदर्भः–**

1. न्यायसूत्रम्
2. न्यायसारः
3. न्यायवार्तिकम्
4. वात्स्यायनभाष्यम्
5. न्यायसारः
6. तर्कसंग्रहः
7. तर्कसंग्रहः–पदकृत्यम्
8. कारिकावली
9. न्या. सू. पद.
10. न्या. ता. दी
11. प्र. पा. भा.

# न्यायमते संशयस्वरूपम्

राजेशकुमारः

न्यायशास्त्रे ज्ञानं द्विविधं स्मृत्यनुभवभेदात्। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। स्मृतिभिन्नं ज्ञानमनुभवः। अनुभवस्तु यथार्थायथार्थभेदेन द्विविधः। तद्वति तत्प्रकारकोऽनुभवः यथार्थः। तदभाववति तत्प्रकारानुभवो अयथार्थः। यथार्थज्ञानं प्रमा एव। सा च प्रमा न्यायमते प्रत्यक्षानुमित्युपमितिशाब्दभेदात् चतुर्विधा। अप्रमा च संशयविपर्यतर्कभेदात् त्रिविधा। त्रिविधेषु अयथार्थज्ञानेषु संशयस्य किं स्वरूपमिति जिज्ञासायां तत्र महर्षिणा गौतमेन "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"[1] इति सूत्रेण संशयो विवेचितः। संशये विशेषधर्मोपलब्धिः प्रतिबन्धिका, किन्तु संशयविषयीभूतस्य तस्य विशेषधर्मस्य स्मरणं तत्रावश्यकम्।

अयं कः पदार्थः। पदार्थस्य एतादृशानवधारणात्मकविमर्शः संशय इति। तथा च विशेषधर्मापेक्ष्य समानधर्मादनेकधर्मदर्शनाद् विप्रतिपत्तितो वा उपलब्धेरव्यवस्थातो अनुपलब्धेरव्यवस्थातश्च संशय उत्पद्यते।

"तत्रानवधारणज्ञानं संशय"[2] इति न्यायसारे संशयलक्षणं प्रतिपादितम्। तत्रानवधारणञ्च तज्ज्ञानञ्चेति विग्रहो भूषणे निरूपितः। संशयपदस्य व्युत्पत्त्यः बहवो दृश्यन्ते, तथाहि संशीतिः संशय इति भावसाधनम्, करणसाधनं वा संशेतेऽनेनात्मा सुप्त एव भवति।[3] सर्वात्मना शेते इवात्मा यस्मिन् सति स संशय।[4] संशेते मुह्यन्तीन्द्रियाण्यस्मिन्निति संशय इति। संशयो द्विकोटिकश्च-तुष्कोटिको वा। तत्र स्थाणुर्न वेति तथा स्थाणुर्वा पुरुषो वेति यथाक्रममुदाहरणम्।

1. न्या.सू. 1/1/13
2. न्या.सा. पृ. 12
3. न्या.वा. - सं. प्र.
4. प्र.मी. - सं. प्र.

एकस्मिन् धर्मिणि विरुद्धोभयप्रकारकं ज्ञानं संशय:।[1] शब्दो नित्यो न वेत्याकारकज्ञानं शब्दरूप एकस्मिन् धर्मिणि नित्यत्वनित्यत्वाभावप्रकारकं भवति। न चात्मा नित्य: बुद्धि: अनित्या इत्याकारकसमूहालम्बनज्ञानं संशय इति वाच्यम्, संशयस्योभयप्रकारतानिरूपितत्वेऽपि एकविशेष्यतया अङ्गीकारात्, समुच्चये तु विशेष्यताद्वयस्य भानात्, अत्र च नित्यत्वानित्यत्वयो- र्विरुद्धधर्मप्रकारत्वेऽप्यात्मविशेष्यताया: बुद्धिविशेष्यतायाश्च भिन्नत्वात्। न चात्मा नित्यो विभुश्चेत्याकारकं ज्ञानं संशय इति वाच्यम्, धर्मिण आत्मन एकत्वेऽपि नित्यत्वविभुत्वरूपप्रकारयो: परस्परं विरोधाभावात्।

न चायं वृक्ष: कपिसंयोगवान् कपिसंयोगाभाववान् चेत्याकारकज्ञानं संशयपदवाच्यम्, एकस्मिन् वृक्षे अवच्छेदकभेदेन कपिसंयोगतदभावयो: सत्त्वेऽपि परस्परमविरुद्धत्वात्।

न विद्यते अवधारणा यस्य तदनवधारणं तच्च तद् ज्ञानञ्चानवधारण- ज्ञानमनिश्चितज्ञानमित्यर्थ:। संशय इत्युक्ते किमपेक्षा स्यात्तन्निवृत्तये,ज्ञानमिति पदम्, तथापि घटोऽयमिति सत्यज्ञानेऽप्यतिव्याप्ति: तत्परिहृत्यै अनवधारणमिति, अनवधारणमित्युक्ते विशेष्यापेक्षमिति ज्ञानपदम्। न चैतद् वाच्यम्। अनवधारणं च तत् ज्ञानं चेति। मिथो व्याघातान्न युक्तमिति। गोशब्दादिवद् ज्ञानशब्दस्य जातिनिमित्तत्वात्। सा च ज्ञानत्वजातिर्निश्चयस्वभावसु व्यक्तिषु वर्तते इति न मिथो व्याघात:। तस्मादनिश्चितज्ञानं संशयो भवतीति तात्पर्यम्।

**संशयविभाग:**

भाष्यकार: पञ्चविधान् संशयान् बभाषे वार्तिककारस्तु संशयस्य त्रैविध्यं विदधे पाञ्चविध्यं च प्रत्याचचक्षे–

**"त्रिविधमेव संशय:"**[2] अपरे पुन: समानधर्मोपत्यादिभि: पदै: पञ्चविधं संशय: वर्णयन्ति तन्न युक्तम्।[3] वार्तिकपक्षमनुसृत्य टीकाकारा: निगदन्ति–

"त्रिविध एवेति ये पञ्चविधमाचक्षते, ते निराकृता:"[4] तदेतन्मतम- पनयन्निव भाष्योद्घोषमनुघोषयति भासर्वज्ञ:। काश्यपीया अप्येनमेव न्यायमतं

1. एकधर्मिकविरुद्धोभयप्रकारकज्ञानं संशय:। अनु. चिन्तामणौ।
2. न्या.वा. पृ. 87
3. न्या.वा. पृ. 96
4. न्या.वा.ता.टी. पृ. 243

मन्वते–"समानतान्त्रिकैः पञ्चविधः संशयो वर्णितः"[1]

**"स च समानधर्मानेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारण-भेदात् पञ्चधा भिद्यते।"[2]**

तद्यथा–

(क) **समानधर्मात्** – 'किमयं स्थाणुः स्यात् पुरुषो वेति'?

(ख) **अनेकधर्मात्** – 'आकाशविशेषगुणत्वात्किमयं शब्दो नित्यः स्यादनित्यो वेति'?

(ग) **विप्रतिपत्तेः** – 'एके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानीति'।

(घ) **उपलब्धेः** – 'किं सदुदकमुपलभ्यते, उतासदिति'?

(ङ) **अनुपलब्धेः** – 'किं विद्यमानः पिशाचो नोपलभ्यते, उताविद्यमान इति?"

इत्यत्र प्रथमं संशयस्य उदाहरणस्य अयं भावः स्थाणुपुरुषयोः समानः साधारणो धर्म उर्ध्वत्वं तस्मात्। तच्चोर्ध्वत्वव्यवहारकारणं सामान्यम-वयवरचना विशेषो वा।

द्वितीयोदाहरणस्य अयं भावः यत् समानासमानजातीयम-नेकमिहाभीष्टम्। अनेन कस्माद् व्यावर्त्तको धर्मोऽनेकधर्म इति मध्यमपदलोपी-समासः। असाधारणो धर्म इति भावः।

तृतीयसंशयविप्रतिपत्तेः उदाहरणस्य अयं भावः यद् एकरूपायाः विप्रतिपत्तेः सकाशात् किमिन्द्रियाणि भौतिकान्याहोस्विदभौतिकानीति संशयो मध्यस्थस्य विशेषमजानानस्य जायते इति।

चतुर्थसंशयभेदोपलब्धेरुदाहरणस्य अयं भावः यद् विधिमुखेन ज्ञानप्रवृत्तिरुपलब्धिस्तस्या एव संशयः। क्वापि कूपखननान्तरं जलोपलब्धौ तदुपलब्ध्या संशेते तडागादौ जलं सदुपलब्धं मरुमरीचिकाचक्रे चासत्।

---

1. न्या.क. पृ. 421
2. न्या.सा. पृ. 3

इदानीमत्र जलं यदुपलब्धं तत् किम् सदसद्वेति। संशयस्य पञ्चमभेदस्य उदाहरणस्य अयं भावः यत् प्रतिषेधमुखेन प्रवृत्तं ज्ञानम्। ज्ञानानुत्पादश्चानुपलब्धिः। तस्याः इत्थं संशयः। श्मशाने पिशाचो अस्तीति कश्चित् प्रसिद्धिमाकलय्य तत्र गत्वा तमदृष्ट्वा सन्दिग्धे इति।

# भेदप्रतिपादनपूर्वकं संशयस्वरूपनिर्वचनम्

**निशारानी**

न्यायशास्त्रे अनुभवात्मकं ज्ञानं द्विविधम्, एकं ज्ञानं प्रमारूपं भ्रमरूपं च अपरम्। तत्र भ्रमस्य लक्षणं अन्नम्भट्टेन कृतं तदभाववद्विशेष्यकत्वे सति त ,कारकत्वरूपं यथा शुक्तौ इदं रजतमितिज्ञानं शुक्तिविशेष्यकरजतत्व-प्रकारकमस्ति, सा च शुक्तिः रजतत्वाभाववती, शुक्तौ रजतत्वेन रजत्वप्रकारं भवति। अतः तज्ज्ञानमप्रमा भ्रमः इति चोच्यते सैव भ्रमः अयथार्थानुभव-संज्ञां लभते। सोऽयमयथार्थानुभवः संशयविपर्ययतर्कभेदात् त्रिविधः।

तत्र संशयः बहिरिन्द्रियजन्यः भवति तल्लक्षणं तु एकधर्मिक-विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानत्वरूपम्।[1] यथा– स्थाणुर्वा पुरुषो वा। इत्थं प्रकारेण संशयस्वरूपं मूलग्रन्थे प्रतिपादितमस्ति। वस्तुतस्तु एकधर्मिक-तत्तदभावप्रकारकज्ञानमेव संशयः।[2] एतल्लक्षणानुसारेण अयं स्थाणुर्वा पुरुषो वा इत्याकारकः, स हि संशयः अयं स्थाणुर्नवा, अयं पर्वतः वह्निमान् न वा इत्याद्याकारक एव संशयो भवति।

विपर्ययश्च मिथ्याज्ञानस्वरूपः।[3] तल्लक्षणं तु तदभाववद्-विशेष्यकत्वविशिष्टतत्प्रकारकज्ञानत्वरूपम्। यथा– ह्रदो वह्निमान् इतिज्ञाने वह्न्यभाववद्ध्रदविशेष्यकत्वस्य वह्निप्रकारकत्वस्य च विद्यमानत्वात् भवति लक्षणसमन्वयः।

भवति च ह्रदो वह्निमानित्याकारकज्ञानस्य विपर्ययत्वम्।

तर्कश्च व्याप्यारोपेण व्यापकारोपः। इदानीं विशेषरूपेण संशय-स्वरूपविषये एव वच्मि। न्यायसारग्रन्थे भासर्वज्ञः संशयस्वरूपं प्रतिपादयति– "तत्रानवधारणज्ञानं संशयः"[4] इति। तत्र तयोर्मध्ये अनवधारणं च तज्ज्ञानं चेति विग्रहः। न चावधारणाभाववाचकत्वादनवधारणशब्दस्य कथं ज्ञानशब्देन सामानाधिकरण्यमिति वाच्यम्। तस्यानिश्चयत्वजातिसहितव्यक्तिवाचकत्वात्।।

तस्यावान्तरभेदमाह—

**स च समानधर्मानेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धि-कारणभेदात् पञ्चधा भिद्यते॥[5]**

समानधर्मश्चानेकधर्मश्च विप्रतिपत्तिश्चोपलब्धिश्चानुपलब्धिश्च तानि कारणानि च तेषां भेदात्। अत्रासाधारणकारणभूतानां समानधर्मादीनां भेदात् संशयस्य भेदोऽभिहित:, न पुन: कारणमात्रभेदात्। अनेककारणजन्य-स्यापि घटस्यैकत्वदर्शनात्। स च समानधर्मादसाधारणकारणाद् विशेषाग्रहणादि-तरकारणगणसहिताज्जायमान: संशयोऽनेकधर्मादिकारणजनितसंशयेभ्यो भिद्यत इति योज्यम्। एवमुत्तरत्रापि॥

क्रमेण तेषां संशयानां स्वरूपमाह—

**तद् यथा समानधर्मात्-किमयं स्थाणुः पुरुषो वेति॥[6]**

स्थाणुपुरुषयो: समान: साधारणो धर्म ऊर्ध्वत्वं, तस्मात्। तच्चोर्ध्वत्वव्यवहारकारणं सामान्यमवयवरचनाविशेषो वा। इतिशब्द: प्रकारार्थ:। एवम्प्रकार: संशय उत्पद्यत इत्यर्थ:। एवमुत्तरवाक्येष्वपीतिशब्दो व्याख्येय:॥

द्वितीयं संशयमाह—

**अनेकधर्मात्-आकाशविशेषगुणत्वात् किमयं शब्दो नित्यः स्यादनित्यो वेति॥[7]**

समानासमानजातीयमनेकमिहाभीष्टम्। अनेकस्माद् व्यावर्तको धर्मोऽनेकधर्म इति मध्यमपदलोपी समास:।[8] असाधारणो धर्म इति भाव:। ननु स्थाणुत्वपुरुषत्वादिविरुद्धोभयविशेषै: सह समानधर्मस्योर्ध्वत्वस्य पूर्वमुपलम्भात् पश्चाद् दूरत्वादिनिमित्तेन विशेषद्वयाग्रहणेन समानधर्म: केवल एवोपलभ्यमानस्तत्स्मृतिद्वारेण संशयहेतुरितियुक्तम्। असाधारणस्तु धर्मो विरुद्धोभयविशेषै: सहादृष्ट:। कथं तत्स्मृतिहेतु:। तदहेतुश्च कथं संशयोपाय इति। व्यतिरेकमुखेनेति ब्रूम:। तथाहि-नित्येभ्यो व्यावृत्तधर्मयोगी खल्वनित्यो दृष्ट:। अनित्येभ्यश्च व्यावृत्तधर्मयोगी खलु नित्योदृष्ट:। शब्दस्तु नित्यानित्य-व्यावृत्तेनाकाशविशेषगुणत्वधर्मेण युक्त:। तस्मादनित्यव्यावृत्तधर्मवत्त्वाद् नित्य:

स्याद्, उत नित्यव्यावृत्तधर्मवत्त्वादनित्य इति सन्देहः। नन्वेवमपि समानधर्मा-साधारणधर्मविप्रतिपत्तीत्यादिवाक्यं क्रियताम्। किमनेकधर्मग्रहणेनाप्रसिद्ध-प्रकृतार्थेनेति। सत्यम्। अनेकश्चासौ धर्मश्च अनेकधर्मः सोऽपि संशयहेतुरिति ज्ञापनार्थत्वाददोषः। तथाहि– विरुद्धार्थद्वयाविनाभूतधर्मद्वयस्यैकत्रोपलम्भाद् विशेषाग्रहणादिसहकारिणि च सति संशयो भवति। यथा क्रियावत्त्वान्मूर्तं मनः[9], किं वा स्पर्शशून्यत्वादमूर्तमिति। अनेकधर्मस्य तु विप्रतिपत्तिवदेव संशयहेतुत्वम्। विरुद्धार्थद्वयप्रतिपादकवचनद्वयं विप्रतिपत्तिः। विरुद्धार्थद्वया-विनाभूतधर्मद्वयं त्वनेकधर्म इति नानयोरत्यन्तभेदोऽस्तीति।।

इदानीं विप्रतिपत्तिजनितसंशयं दर्शयितुकामो विप्रतिपत्तिस्वरूपमाह–

**विप्रतिपत्तेः–एके भौतिकानीन्द्रियाण्याहुरन्ये त्वभौतिकानीति।।**[10]

एवंरूपाया विप्रतिपत्तेः सकाशात् किमिन्द्रियाणि भौतिकान्याहोस्विद-भौतिकानीति[11] संशयो मध्यस्थस्य विशेषमजानानस्य जायत इति शेषः।।

चतुर्थपञ्चमौ संशयौ दर्शयति–

**उपलब्धेः–किं सदुदकमुपलभ्यते उतासदिति। अनुपलब्धे किं विद्यमानः पिशाचो नोपलभ्यते किं वाविद्यमान इति।।**[12]

विधिमुखेन ज्ञानमुपलब्धिः। उपलब्ध्यभावोऽत्रानुपलब्धिः नचात्र केवलोपलब्धिरनुपलब्धिर्वा संशयकारणं, येनातिप्रसङ्गः स्यात्। किन्तु विशेषाग्रहणादिसहकारिसहिता। ततो नातिप्रसङ्गः। यद्यप्यनयोः समानधर्मान्नभेदः, तथापि प्रयोजनवशात् सूत्रकारेण 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुप-लब्ध्यनुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च[13]–' इति पृथगभिहिते इति तदनुसारिणा सङ्ग्रहकृतापि पृथगुक्ते इति न दोषः। प्रयोजनं च परपक्षप्रतिक्षेपः। तथाहि– शब्दे स एवायमिति स्थायित्वोपलम्भादविनाशित्वम्, अदृष्टेश्वरादेश्चानुप-लम्भादसत्त्वं केचित् प्रतिपन्नाः। तच्चायुक्तं, विशेषग्रहणाभावे खलूपलब्धिमात्रस्य वानुपलब्धिमात्रस्य च संशयहेतुत्वात्। प्रत्यभिज्ञानं तु प्रदीपादिष्विव। अनुपलब्धिश्च भूतलान्तर्गतजलादाविवान्यथाप्युपपन्नत्वान्न निर्णयकारणमिति।।

सम्यग्ग्रहणेन चेत् संशयविपर्यययोरपोहः, तर्ह्यूहानध्यवसाययोः केन पदेनापोह इत्याशङ्क्याह–

**अनवधारणत्वाविशेषादूहानध्यवसाययोर्न संशयादर्थान्तरभाव इति॥**[14]

**तद्यथा बाह्यालिप्रदेशे पुरुषेणानेन भवितव्यमित्यूहः। किंसंज्ञकोऽयं वृक्ष इत्यनध्यवसाय इति॥**[15]

प्रायेण पुरुषेणानेन भवितव्यमित्यनिश्चयरूप एवोहः, न पुनः पुरुष एवेति निश्चयरूपः। अनध्यवसायोऽपि का संज्ञा अस्य, असौ किं संज्ञक इत्यनिश्चयात्मक एवोपपद्यते। तस्मादनयोः संशयात्मकत्वात् सम्यग्ग्रहणेनैव व्यवच्छेद इत्यर्थः। मात्र संशयोऽस्तीत्यशेषपुरुषहृदयसाक्षितया संवेद्यमानस्य संशयस्य निराकरणं परेषामज्ञत्वमेव प्रकटयतीति॥

**संदर्भः–**

1. तर्कसंग्रहः
2. तत्रैव
3. मिथ्याज्ञानं विपर्ययः।
4. न्यायसारः
5. तत्रैव
6. तत्रैव
7. न्यायसारः
8. सिद्धान्तकौमुदी-समासप्रकरणम्
9. क्रियावत्वं मूर्त्तत्वम्।
10. न्यायसारः
11. घ्राणरसनचक्षुस्त्वक् श्रोत्राणीन्द्रियाणि भूतेभ्यः।
12. न्यायसारः
13. न्यायसूत्रम्
14. न्यायसारः
15. न्यायसारः

# THE CONCEPT OF DOUBT (SAMSAYA) IN NYAYA-VAISHESIKA DARSHAN

**Summan Viswa Prakash**

The Nyaya and vaishesika are the Indian schools of Epistemology, Logic, Metaphysics, Particle physics, Philosophy.

What not? every thing is perfectly explained in the Nyaya-Vaisheśika Philosophy.

How can we understand the world in which we find ourselves?

How does universe behave?

What is the nature of reality?

Where did all this come from?

Did the universe need a creator?

What are the different ways in obtaining the knowledge ?

How many types of matter exist in the universe?

What is philosophy?

How do atoms act?

What are the qualities of the different things in the universe?

Beginning from the vast universe to the atoms in the matter every thing was clearly explained by two great scientist of the ancient India,

They are Kannada and Gautama.These people should be identified as scientist rather than sages.

Their works are undoubtedly greatest contributions to the Mankind.

Now according to Nyaya ,The Paddartha(Matter) in Nyaya is divided into 16types.

They are:-

1. Means of valid knowledge (pramana);
2. Objects of valid knowledge (prameya);
3. Doubt (samseya);
4. Purpose (prayojana);
5. Example (drushtanta);
6. Conclusion (siddhânta);
7. The constituents of a syllogism (avayava);
8. Argumentation (tarka);
9. Ascertainment (nirnaya);
10. Debate (vâda);
11. Disputations (jalpa);
12. Destructive criticism (vitanda);
13. Fallacy (hetvâbhâsa);
14. Quibble (chala);
15. Refutations (jâti); and
16. Points of the opponent's defeat (nigrahasthâna).

Most of the above mentioned Paddarthaś are divided into many .

According to Vaishesika Paddartha's (Matter) is divided into 7 types

They are:-

1.Dravya (substance): The substances are conceived as 9 in number. They are, prithvî (earth), aṗ (water), tejas (fire), vâyu (air), Akasa (ether), kâla (time), dik (space), âtman (self) and manas (mind). The first five are called bhûtas, the substances having some specific qualities so that they could be perceived by one or the other external senses.

2.Guna (quality): The Vaishesika Sûtra mentions 24 gunas (qualities), to which Praúastapâda added another 7. While a substance is capable of existing independently by itself, a guna(quality) cannot exist so. The original 17 gunas (qualities) are, rûpa (colour), rasa (taste), gandha (smell), sparsa (touch), sankhya (number), parimaṇa (size/dimension/quantity), Prithaktua (inidividuality), sanyoga (conjunction/accompaniments), vibhâga (disjunction), paratva (priority), aparatva (posteriority), Gurutva (gravitation), Dravatva (Fluidity), Sneha (Viscidity), Shabda (Sound) buddhi (Cognition), sukha (pleasure), dukha (pain), icchâ (desire), dwesha (aversion) and prayatna (effort). To these Prashastapâda added gurutva (heaviness), dravatva (fluidity), sneha (viscosity), dharma (merit), adharma (demerit), shabda (sound) and sanskâsra (faculty).

3.Karma (activity): The karmas (activities) like gunas (qualities) have no separate existence, they belong to the substances. But while a quality is a permanent feature of a substance, an activity is a transient one. Akasâ (ehter), kâla (time), dik (space) and âtman (self), though substances, are devoid of karma (activity).

4.Sâmânya (generality): Since there are plurality of substances, there will be relations among them. When a property is found common to many substances, it is called sâmânya.

5.Vishesha (particularity): By means of Vishesha, we are able to perceive substances as different from one another. As the ultimate atoms are innumerable so are the Vishesha.

6.Samavâya (inherence): Kanâda defined samavâya as the relation between the cause and the effect. Prashastapâda defined it as the relationship existing between the substances that are inseparable, standing to one another in the relation of the container and the contained. The relation of samavâya is not perceivable but only inferable from the inseparable connection of the substances.

7.Abahava(Negation):Negation is four fold, Antecedent negation, Destructive negation, Absolute negation, Mutual negation. Nowadays Nyaya-Vaishesika thoughts are merged together.

In the Nyaya-Vaishesika~Cognition(quality,Guna) is two fold Namely

1.Remembrance(Smriti) and 2.Apprehension.

Apprehension is divided into Tow types Namely

1.Valid Apprehension (yathartah anubhavaha)

2.Erroneous Apprehension (aythartha anubhavaha)

Valid Apprehension:-Valid Apprehension is four fold

1.Perception

2.Inference

3.Analytical knowledge

4.Verbal testimony

Erroneous apprehension is divided into three types

1.Doubt (samsayaha)

2.Misapprehension (Viparyaya)

3.False assumption (Tarka)

Doubt:-It is defined as "The cognition that apprehends several mutually contradictory attributes in the same attributive thing is doubt"

Example-Is it a post or a man?

In samskrit definition is "ekasmin dharmini viruddha nana dharma prakaraka gnanam"

The characteristic of doubt is being explained :-

The term "Ekasmin dharmini" is added to above definition of doubt to avert the defect of over applicability in the knowledge apprehending a group of things like: Jar and cloth etc. The word virrudha is added to avert over applicability in statements like:A jar is an object etc.The term nana is added to avert the over applicability in the knowledge:this posses jarness which is contradictory to the attribute clothness.By the use of word virrudha (contradictory) virrudhtava, (contradiction) is apprehended. In other words jarness with virruddhatvam becomes apprehended.

As such ekasmin dharmini virrudha dharmavatvam(i.e apprehending contradictory attributes in the same substratum) applies to the knowledge:Pattatva virrudha gattavan,Where pattatva viruudtavam is apprehended in the jar as prakara. By adding nana there defect of over applicability is avoided; because both virrudatvam and jarness are not different to each other in as much as they reside in the same substratum and do not reside in different substrata.

This how the definition of the Doubt (samsya) is explained.

S.VISWA PRAKASH,

ACHARYA

# संशयपदार्थविमर्शः

छबिलाल न्यौपाने

दार्शनिकचिन्तनपरम्परा भारतीयायाः संस्कृतेः सभ्यतायाश्चात्मा वरीवर्ति। विशेषतश्च तस्योत्कृष्टमीमांसापद्धतेः कारणात्। यथार्थतत्त्वज्ञानं दर्शनशास्त्रस्य प्रधानलक्ष्यभूतम्। तदर्थञ्च न्यायदर्शनं सुदृढमाधारं विधिं साधनानि च पुरस्करोति। न्यायप्रमाणमीमांसा च तेषां विधिसिद्धान्तनियमानां विशदां व्याख्यां विधाय ज्ञानावाप्तेः पन्थानं प्रशस्तयति। तस्माद् भारतीयदर्शनावबोधाय न्यायप्रमाणमीमांसापद्धतेरवगमः निशायामरण्यप्रवेशे आलोकदर्शनमिव महदुपकरोति। अतो भारतीयदर्शनशास्त्रस्याध्ययनार्थं, भारतीयसंस्कृतेस्तत्सभ्यतायाश्चात्मानमधिगन्तुं न्यायदर्शनस्याध्ययन-मतीवोपयुज्यते।

महर्षिणा गौतमेन सम्प्रोक्तं **प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम** इति। प्रमाणादीनां तत्त्वज्ञानं च तेषां सम्यक्स्वरूपविवेचनेनैव भवति, अत एव उक्तं **'प्रमाणैरर्थपरीक्षणं न्याय'** इति। तदर्थं च **'त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः, उद्देश्यो लक्षणं परीक्षा चेति। नाममात्रेण वस्तुसंकीर्तनमुद्देशः, असाधारणधर्मो लक्षणं, लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा।'** एवं क्रमेण प्रमाणैरर्थस्वरूपविचारे कृते सति पदार्थस्य तत्त्वज्ञानं संजायते, प्रमाणानि च **'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति'** गौतमसूत्रोक्तानि। यद्यपि समेऽपि पदार्थाः प्रमाणप्रमेययोरेवा-न्तर्गच्छन्ति किं वा प्रमाणप्रमेयप्रमातृषु त्रिष्वेवान्तर्भवन्ति तथापि महर्षिगौतमः षोडशपदार्थानां विवरणं प्रस्तुतवान्। अत्र विषये भाष्यकृताऽन्यैश्च टीकाकृद्भिः तानि तानि समाधानानि प्रस्तुतानि। वस्तुतो नव्यन्यायानुगृहीतं द्रव्यगुणकर्मसामान्य-विशेषसमवायाऽभावाः सप्तपदार्थाः इत्याकारकं पदार्थविभाजनमेव समीचीनं प्रतीयते किं वा प्रमाणप्रमेयप्रमातारस्त्रयः पदार्था इति पदार्थानां त्रिधा विभक्तिरपि

नासङ्गतिमञ्चति।

षोडशपदार्थानां ज्ञानं परमावश्यकमिति गौतमः प्राह- तत्त्वज्ञानादेव निःश्रेयसाधिगमोक्तेः। एषां षोडशपदार्थानां सामान्यज्ञानं किं वा एकदेशिज्ञानं लोकानां भवतु नाम, तथापि तत्त्वज्ञानं यथार्थस्वरूपज्ञानं वा न सुगमम्। प्रमाणातिरिक्ताः आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयपदार्थाः सन्ति। एषां द्वादशप्रमेयपदार्थानां तत्त्वज्ञानाय प्रमाणस्य संशयादेश्च पञ्चदशपदार्थानां ज्ञानमुपयुज्यते। आत्मेतरप्रमेयपदार्थज्ञानं विना आत्मज्ञानं न सम्भवति, आत्मनस्तात्त्विकज्ञानाय आत्मेतरपदार्थैः सह तद्भेदज्ञानस्यावश्यकत्वात्। आत्मेतरभेदज्ञानं प्रति च भेदप्रतियोगिज्ञानमावश्यकम्। आत्मेतरप्रमेयपदार्था एव तद्भेदप्रतियोगिनः पदार्थाः। अतश्च प्रतियोगिरूपतया आत्मेतरप्रमेयपदार्थानां ज्ञानं परमावश्यकम्। तदैव आत्मेतरभेदस्य बोधगम्यत्वात्। अन्यथा यस्यात्मेतरपदार्थस्य ज्ञानं न स्यात् तस्मिन्नेव आत्मभ्रमावसरोऽपि सम्भवेत्, तत्रात्मेतरपदार्थे कदाचिदपि आत्मभ्रमसम्भवात्। अतश्च आत्मनस्तात्त्विकज्ञानाय, तदर्थञ्च आत्मेतरभेदज्ञानाय आत्मेतरप्रमेयपदार्था अवश्यमेव अवगन्तव्याः। तस्माद्यथा आत्मनः (जीवात्मनः परमात्मनश्च) तात्त्विकज्ञानावाप्तिः तथा न्यायदर्शनस्य लक्ष्यम्।

यद्यपि शरीरेन्द्रियादीनामन्येषामेकादशप्रमेयपदार्थानां ज्ञानं साधनभूतज्ञानरूपम्। तथाप्येतज्ज्ञानं साधनभूतं लक्ष्यमिति वक्तुं शक्यते। आत्मज्ञानस्यापि निःश्रेयसाधिगमं प्रति हेतुत्वात्, साधनभूतज्ञानवत्त्वात्। संशयविपर्ययादिचतुर्दशपदार्थाः प्रमाणपदार्थे एवान्तर्भावयितुं शक्याः, संशयादिचतुर्दशपदार्थज्ञानस्याऽपि प्रमेयपदार्थज्ञानं प्रति साधनत्वात्, संशयादिपदार्थानां विना प्रमाज्ञानस्यैवासंभवात्, संशयादिज्ञानं विना प्रमायाः प्रमाणस्य च परीक्षणासम्भवात्। अत एवैषां चतुर्दशपदार्थानामपि ज्ञानम् आवश्यकम्। परवर्तिनो नैयायिकास्तु सप्तस्वेव भागेषु द्रव्यादिषु पदार्थान् व्यभजन्त। अन्नम्भट्टः आत्मविशेषगुणं बुद्धिं गुणेषु अन्तर्भाव्य तत्रैव प्रकरणे प्रमाणानि विवेचयामास। तस्मिन्नेव प्रसङ्गे च अयथार्थास्त्रिविधः संशयविपर्ययतर्कभेदात् इत्येवं रूपेण संशयविपर्ययतर्का अपि तेन बुद्धौ समावेशिताः। अवयवहेत्वाभासयोरपि अनुमानान्तर्गतत्वात् तावपि बुद्धावेवान्तर्भवतः। अतो नैते पृथक्पदार्थाः घोषयितव्याः। एवमेव शास्त्रार्थाङ्गभूताः वादजल्पादयोऽपि शब्दे एवान्तर्भावयितुं

शक्याः। अतो नव्यानां नैयायिकानामेव पदार्थविभाजनं युक्ततरं प्रतीयते।

तत्र प्रमाणेषु ह्यनुमानस्य किमपि अधिकं महत्त्वं विद्यते एव। यतः **'प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः'** इति।[1] वाचस्पति-वचनात्तस्य त्रैकालिकपदार्थस्वरूपनिश्चायकत्वात्, तद्यथोक्तं **'प्रत्यक्षागमाभ्या-मीक्षितस्य पुनरीक्षणमन्वीक्षा, अनुमानम्, तया प्रवर्तत इति आन्वीक्षिकी, न्यायविद्या, न्यायशास्त्रमिति।'** अतः एषा आन्वीक्षिकीविद्या अन्यप्रमाण-विवेचनपुरःसरं मुख्यतः अनुमानमेव विवेचयति, अत एव प्रमाणप्रमेयेषु अन्तर्भूतत्वेऽपि संशयादिपदार्थानां पृथग् निर्वचनं करोति। तत्र भाष्यकारेणोक्तं संशयादीनां पृथग्वचनं नानर्थकं यतो हि **'नाऽनुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्ततेऽपि तु संशयितेऽर्थे'** एव। अतः संशयो वस्तुतः न्यायाङ्गम्। यत्र संशयो जायते तत्रैव निश्चयार्थं प्रवृत्तिर्भवति। संशयस्य वस्तुतः निवारणीयतया विचारांगत्वमस्त्येव। तदुत्पत्तिश्चोभयसाधारणधर्मदर्शनाद् भवति। संशयो हि जिज्ञासामुत्पादयतीति भवति न्यायाङ्गं मोक्षं प्रति सहायकश्च। अत एव न्यायदर्शनप्रणेत्रा भगवता गौतमेन प्रमाणादिषोडशपदार्थानां मध्येऽयं संशयस्तृतीयपदार्थः परिगणितः।

श्रीभासर्वज्ञेनापि विषयोऽसावुपस्थापितो वर्तते।[2] तेषां मते संशयो नाम **'तत्रानवधारणज्ञानं संशयः'** इति। अत्र लक्षणे प्रयुक्तो ज्ञानशब्दो न निश्चयार्थपरकोऽपितु ज्ञानत्वजातिनिमित्तः स्वार्थे निरूढः।[3]

संशयपदस्यानेका व्युत्पत्तयो दृश्यन्ते- **''संशीतिः संशय इति भावसाधनम्, करणसाधनं वा संशेतेऽनेनात्मा सुप्त इव भवति''**[४], **''सर्वात्मना शेते इवात्मा यस्मिन् सति स संशयः''**[५], **''संशेरते मुह्यन्तीन्द्रियाण्यस्मिन्निति संशयः''**[६] **इत्यादयः।**

न्यायसूत्रकारेण संशयलक्षणङ्कुर्वता सूत्रितम् - **''समानानेकधर्मो-पपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः''।**[७]

संशयस्य हि पञ्चविधत्वं बभाषे भाष्यकारः, तथा हि समानधर्मोपपत्तिः, अनेकधर्मोपपत्तिः, विप्रतिपत्तिः, उपलब्ध्यव्यवस्था, अनुपलब्ध्यव्यवस्था, चेति। तत्र 'तत्र तत्त्वानवधारणं संशय इति' इत्यन्तेन

समानधर्मेत्यादीनां त्रयाणां व्याख्यानं कृतम्।

वार्तिककारस्तु संशयस्य त्रैविध्यं विदधे, पाञ्चविध्यञ्च प्रत्याचचक्षे।[8] वार्तिककाराणां त्वयमाशयो यत् विमर्शः संशय इति संशयसामान्यलक्षणम्, तत्र संशय इत्यनेन लक्ष्यस्य निर्देशः क्रियते। विमर्श इति तु लक्षणबोधकम्। एकस्मिन्धर्मिणि विरोधिनानाधर्मावगाहिज्ञानं विमर्शः। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्याभ्यां पदाभ्यां त्रीणि विशेषलक्षणानि प्रतिपाद्यन्ते तथा हि समानधर्मोपपत्तेरित्येकं लक्षणम्। अनेकधर्मोपपत्तेरिति द्वितीयम्। विप्रतिपत्तेरिति तृतीयम्। त्रिष्वपि लक्षणेषु **'उपलब्ध्यनुपलब्ध्यव्यवस्थातः, विशेषापेक्षः, विमर्शः, संशयः,'** इति चतुर्णामपि पदानां सम्बन्धो बोध्यः। तथा च समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्श संशय इति द्वितीयम्। विप्रतिपत्तेरुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति तृतीयम्। तत्र प्रथमलक्षण उपलब्ध्यनुपलब्ध्यव्यवस्थात इत्यस्याभावे वृक्षोऽयमिति विशेषनिश्चये सत्यपि पुरुषगतसमानधर्मस्य महत्त्वादेरुपलब्धिरस्तीति संशयः स्यादतस्तत्। तस्यार्थस्तु एकतरधर्मप्रकारकनिश्चयहेत्वभावे धर्मान्तराभावप्रकारनिश्चयहेत्वाभावे च सतीति। ततश्च वृक्षत्वप्रकारकनिश्चयहेतोः पुरुषत्वाभावप्रकारकनिश्चयहेतोश्चाभावोऽप्यपेक्षितः। प्रकृते च स नास्तीति न संशयः। यदि च समानधर्मोपपत्तेरिति नोच्यते तर्ह्यनुगतधर्मज्ञानाभावेऽपि विशेषनिश्चयहेत्वभावमात्रेण संशयः स्यादतस्तत्। विशेषापेक्ष इत्यस्याभावे नौकया गच्छन्नारोहपरिणाहवन्तं पदार्थमात्रं पश्यन्वृक्ष इति निश्चायकं न गज इति निश्चायकं च, हेतुमनुपलभमानोऽप्यनुपादित्सिते चोदासीने वस्तुनि न संदिग्धे बुभुत्साविरहात्। बुभुत्समानस्तु संदिग्धे तत्र बुभुत्साभावेऽपि संशयः स्यादतस्तत्। विशेषं नाम बुभुत्सामपेक्षतेऽसौ विशेषापेक्ष इति तदर्थः। एवमेवाग्रिमलक्षणद्वयेऽपि ज्ञातव्यं भवति।

अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पञ्चविधं संशयं वर्णयन्ति। तन्न युक्तम्, वार्तिकपक्षमेवाररक्ष टीकाकारः, **"त्रिविध एवेति ये पञ्चविधमाचक्षते, ते निराकृताः।"**[९]

संशयलक्षणं विवृण्वन्नाह- एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयेत्यन्नम्भट्टः। एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानमिति न्यायबोधिनीकारः। तस्य समानधर्मोपपत्त्यादीनि पञ्च कारणानि

महर्षिगौतमः।

न्यायसिद्धान्तमुक्तावल्यामपि–

**.........संशयोऽथ प्रदर्श्यते॥१२८॥**

**किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः।**
**तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥**

**स संशयो मतिर्वा स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्॥**[१०]

इति एकस्मिन् पदार्थे भावाभावात्मकविविधकोटिकं ज्ञानं संशय इति भाषापरिच्छेदे श्रीविश्वनाथपञ्चाननभट्टाचार्यः।

अतः संशयस्य पक्षत्वं सुस्पष्टत्वं भाति। पक्ष्यते परिगृह्यते विचारार्थमिति पक्षः, स च सन्दिग्धसाध्यधर्मवानेव कश्चित् अंगीक्रियते। तत्रैव निश्चयार्थमनुमानप्रमाणं प्रवर्तते। अनुमितिकरणमनुमानमिति। तत्र **'व्यापारवदसाधारणकारणं करणमिति'**[११] करणत्वादीनां नये व्याप्तिज्ञानमनुमानम्। **'फलावच्छिन्नकारणं करणमिति'** करणत्वस्वीकर्तृणां नये लिङ्गमनुमानम्। परामर्शोऽनुमानमिति। परामर्शस्य व्यापारत्वं व्याप्तिज्ञानस्य च अनुमितौ करणत्वमिति। परामर्शस्तावत् व्याप्तिविशिष्टपक्षधर्मताज्ञानं भवति। परामर्शलक्षणघटकीभूता या पक्षधर्मता सा का इति जिज्ञासायां मणिकारैः मणिग्रन्थे प्रतिज्ञारूपेण इत्थमुपस्थापितम्– **व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते**[१२] इति। व्याप्तिनिरूपणानन्तरं पक्षधर्मतानिरूपणे मूलग्रन्थे संगत्यप्रदर्शनात् मूलग्रन्थस्य न्यूनतां परिजिहीर्षुः दीधितिकारो भणति "**अनुमितिलक्षणैककार्यानुकूलत्वसङ्गत्या व्याप्त्यनन्तरं पक्षधर्मतां निरूपयितुमाह– व्याप्तीति।**"[१३] मूले अनुकूलत्वं प्रयोजकत्वं तच्च जनकजनकतावच्छेदकसाधारणमिति, व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेनानुमित्यकरणत्वेऽपि न कापि हानिः। पक्षे धर्मत्वं यस्या सा इति व्युत्पत्त्या ज्ञायते यत् पक्षनिरूपिताधेयतावति पक्षत्वे पक्षधर्मताशब्दस्य योगरूढित्वमेव। तस्याः पक्षतायाः पूर्वपक्षरूपेण सामान्यलक्षणं प्रतिपादयति मणिकारः– तत्र न तावत्सन्दिग्धसाध्यधर्मत्वं पक्षत्वमिति। मूललक्षणस्य सन्देहविषयीभूतसाध्यवत्त्वार्थकत्वं स्वीक्रियते चेत्तर्हि ह्रदादौ वह्न्यादेः, पर्वतादौ विनष्टवह्न्यादेश्च

अनुमितिर्न स्यात्, यतः तत्र तादृशसाध्याभावेन पक्षतायाः अभावात् सन्दिग्धसाध्यधर्मत्वमिति पक्षतालक्षणं परित्यज्य साध्यसंशयात्मकं पक्षतालक्षणं **'यत्र साध्यस्येति...'**[१४] दीधितिकारैः स्वीकृतमिति जगदीशो निगदति, गदाधारस्तु मूलग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या पक्षतालक्षणस्वीकारे साध्ये धर्मवत्त्वस्य निवेशनमयुक्तमिति धिया यदि साध्यकोटिकसंशय एव निवेशनं क्रियते तर्हि साध्यः पक्षवृत्तिर्न वा? साध्यः पक्षनिष्ठाभावप्रतियोगी न वा? इत्यादिसंशयस्य असंग्रहापत्तिः। अत एव साध्यसंशयस्य पक्षतात्वं स्वीकृत्य सकलसंशयस्य अनुगमाकारं प्रदर्शयति दीधितिकारः यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयः स तत्र तादृशसम्बन्धेन साध्यानुमितौ पक्षता। अभिप्रायस्तु यत्र यद्धर्मिणि इत्यत्र सप्तम्यर्थो विशेष्यत्वं, तस्य निरूपितत्वसम्बन्धेन साध्यस्य इत्यत्र षष्ठ्यन्तार्थसाध्यनिष्ठप्रकारतायामन्वयः। यत्रेति यत्पदं प्रकृतपक्षतावच्छेदकावच्छिन्नपरम्। साध्यपदं साध्यतावच्छेदकावच्छिन्नपरम्। निर्णयनिवर्त्यत्वं च निश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रकृतबध्यतावत्त्वं ग्राह्यम्। तथा चायं प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदक-सम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्न-प्रतिबन्धकतानिरूपितप्रतिबध्यताशाली संशयः प्रकृतपक्षतावच्छेदकावच्छिन्नो-द्देश्यतानिरूपितप्रकृतसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदका-वच्छिन्नविधेयताशाल्यनुमितौ हेतुभूता पक्षता इति पक्षतालक्षणं पर्यवसितं भवति।

एतादृशपक्षतालक्षणस्वीकारे **वह्निर्घटवान्** इत्यत्र वह्निधर्मिकघटादि-निर्णयस्य पर्वतधर्मिकवह्निमत्त्वनिश्चयस्य निवर्तनीयोऽपि वह्नौ घटादिसन्देहः वह्निर्घटवान्न वा इत्याकारकसन्देहस्य न पर्वतपक्षकवह्न्यनुमितौ पक्षता। मूले संशयपदानुपादाने पक्षधर्मिकसाध्यवत्तानिश्चयप्रतिबध्यो यः इत्येव-मात्रस्वीकारे बाधनिश्चयस्यापि पक्षतात्वापत्तिः यतः बाधनिश्चयस्य पक्षधर्मिक-साध्यवत्तानिश्चयप्रतिबध्यत्वादिति। अतः संशयपदमुपात्तम्। यदि च बाधनिश्चयानन्तरम् अलौकिकप्रत्यक्षानुमित्यादीनामनुत्पादात् तत्तद्रूपेण प्रतिबन्धकत्वकल्पनापेक्षया विशिष्टबुद्धित्वस्य प्रतिबध्यतावच्छेदकत्वं स्वीक्रियते तर्हि विशिष्टबुद्धिसामान्यं प्रत्येव बाधनिश्चयस्य प्रतिबन्धकत्वात् तत्रानुमित्य-सम्भवः, एवं च सन्दिग्धप्रामाण्यकबाधनिश्चयसत्त्वदशायां सिद्ध्यात्मकपरामर्शा-

दपि अनुमितिः स्यात्, यतः तत्र बाधनिश्चयस्य विशिष्टबुद्ध्यप्रतिबन्धकत्वात्। अत एव बाधनिश्चये पक्षतालक्षणस्य अतिव्याप्तिवारणाय संशयपदमुपात्तम्। निर्वह्निः पर्वतो रूपवान्न वेत्यादिसंशयरूपस्य बाधनिश्चयस्य पर्वतो वह्निमान् इत्याकारकनिश्चयनिवर्त्त्यत्वं संशयत्वं विद्यते इति तत्र पक्षतालक्षणस्यातिव्याप्तिः, तद्वारणाय संशयस्वरूपं विवृणोति जगदीशः- **'संशयत्वं च पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्त्त्यत्वे सति तादृशनिश्चयप्रतिबन्धकतावच्छेदकविषयिताशून्यज्ञानत्वमिति।'** एवं च वह्निव्याप्यवान् पर्वत इत्यत्र वह्निव्याप्यसाध्यकानुमितौ पर्वतो वह्निमान् न वेत्याकारकसंशयस्य पक्षतात्ववारणाय प्रकृतपक्षविषयताबहिर्भूतप्रकृतसाध्यविषयताघटितधर्मावच्छिन्नं यत् प्रकृतपक्षधर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्त्यत्वं संशयत्वं स्वीकार्यम्। एतादृशसंशयपक्षतालक्षणस्वीकारे गगने मेघानुमितौ साध्यसंशयाभावे अनुमितिदर्शनात् संशयपक्षतालक्षणं परित्यज्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावेति पक्षतालक्षणं मणिकारैः स्वीकृतमिति।

संशयस्य स्वरूपवर्णने नानाविधविद्वद्भिः दार्शनिकैश्च यथामति विस्तृतचर्चा कृता। तत्र हि व्याकरणे श्रीनागेशभट्टः **'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्'**[१५] इति परिभाषायां संशयस्वरूपस्य विस्तृतस्वरूपमुपन्यस्तम्। तद्वदेव न्यायशास्त्रेऽपि, तथा च न्यायभाष्यकारानुसारेण च संशयादयो यथासंभवप्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्ते इति। इमास्तु चतस्रो विद्याः पृथक् प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः तेषां पृथग्वचनमन्तरेणाऽध्यात्मविद्यामात्रमियं स्याद् यथोपनिषदः। तस्मात्संशयादिभिः पदार्थैः पृथक्प्रस्थाप्यते।

अर्थात् संशयादिप्रतिपादनं परित्यज्य मोक्षसाधनीभूततत्त्वज्ञानमात्रस्यात्र प्रतिपादनेऽस्य न्यायविद्यायाः वेदान्तविद्यात्मेव स्यात्तेन च नैरर्थक्यमिति स्यात् इति सुदर्शनाचार्याः। यतः **'नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्ततेऽपि तु संशयितेऽर्थे'**।[१६] संशयश्च विमृश्यपक्षप्रतिपक्षाभ्यामर्थावधारणे हेतुरिति दिक्।

**॥ इति शम्॥**

1 तर्कसंग्रहेऽनुमानखण्डे किरणावलीव्याख्यायाम्, पृ.सं. 109

2 'यथा कृष्यादिषु शास्त्रश्रवणे च यद्वदर्थसंशयादेवार्थिनां प्रवृत्तिर्भवत्येवं मोक्षसाधनेऽपि भविष्यतीत्यतः किमनेन शास्त्रेणेति? न, कृष्यादिफलस्य बाहुल्येन दृष्टत्वादत्यन्तादृष्टत्वेनासंभाव्यत्वादपवर्गस्य। न च कृष्यादिषु पूर्वोपार्जितसमस्तवित्त-दारादित्यागेन प्रवृत्तिः फलविप्रतिपत्तिर्वाऽस्ति, विपर्ययस्त्वपवर्गसाधनेऽतोऽन-र्थसंशयनिवृत्तिहेतुः संसाधनोऽपवर्गनिश्चयः प्रार्थ्यते प्रेक्षापूर्वकारिभिः। स च निश्चयः प्रमाणनिश्चयात्, प्रमाणनिश्चयस्तु लक्षणनिश्चयाद् लक्षणमेवादावुच्यते- "**सम्यगनुभवसाधनं प्रमाणम्**" इति। ......प्रमाणस्य समानजातीयानि व्यवच्छेद्यानि नैव सन्तीति यो (प्रभाकरः) मन्यते तं प्रत्याह- "सम्यग्ग्रहणं संशयविपर्ययापोहार्थम्।" इति। न्या.भू., पृ.सं. 11

3 न्यायभूषणम्, पृ.सं.12

4 न्यायवार्त्तिकम्.पृ.91

5 प्रमाणमीमांसा, पृ.5

6 तात्पर्यदीपिका (न्यायसारस्य व्याख्या), पृ. 57

7 न्यायसूत्रम्, 1.1.23

8 त्रिविध एव संशयः, न्यायवर्त्तिकम्, पृ. 87

9 न्यायतात्पर्यटीका।

10 न्यायसिद्धान्तमुक्तावली, प्रत्येकगुणनिरूपणप्रकरणम्, कारिका 128 तः 130 पर्यन्तम्।

11 न्यायसिद्धान्तमुक्तावली, प्रत्यक्षखण्डः, पृ.सं. 199

12 पक्षताप्रकरणम्, पृ.सं. 1

13 पक्षताप्रकरणम्, दीधितिपंक्तिरियम्, पृ.सं. 3,

14 यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्त्यो यः संशयस्तत्र सादृशसम्बन्धेन साध्यानुमितौ पक्षता इत्यर्थः। पक्षताप्रकरणम्, पृ.सं. 6

15 परिभाषेन्दुशेखरः, पृ.सं. 1

16 न्यायभाष्यम्।

# विशिष्टाद्वैतमते संशयस्वरूपम्

**पद्मिनी श्रीधर पी.एस्**

**लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।।**

नमः सभायै। अहं अधुना विशिष्टाद्वैतदिशा संशयमवलम्ब्य किञ्चिद्वक्तुमिच्छामि। विशिष्टाद्वैतसिद्धान्ते यतीन्द्रमतदीपिकायां, न्यायपरिशुद्धौ, तत्त्वमुक्ताकलापे, एवं वेदान्तकारिकावल्लयां संशयविषयं अवलम्ब्य बहु विचाराः कृताः। अहमत्र सङ्क्षेपेण किञ्चिद् प्रतिपादयितुमिच्छामि।

1. अव्यवस्थितव्यवहारकारणं ज्ञानं संशयः[1]

2. धर्मिग्रहणे मिथो विरुद्धानेकविशेषस्फुरणम्[2]

3. एकस्मिन् धर्मिणि विरुद्धानेकप्रकारकं ज्ञानम्[3]

4. सामान्यधर्मिस्फुरणे सति अप्रतिपन्नतद्विरोधप्रतिपन्नमिथो विरोधानेकविशेषस्फुरणम्[4]

5. अथ स्यात् विरुद्धकोटिद्वयं गोचरं संशयात्मकं[5] ज्ञानं सर्वेषां प्रसिद्धम्। तच्च वस्तुनि विकल्पस्य विरुद्धानियताकारत्वस्य चायोगात् अन्यथाख्यातिरूपमेव।

तदनभ्युपगमे 'सन्दिग्धे न्यायप्रवृत्तिः' विषयस्संशयः च इत्यादिकमुच्छिद्येत इत्यत्राह—"एकाधार"[6] इति श्लोकः।

**एकाधारे विरुद्धाकृतियुगयुगपत्ख्यातिरन्योन्यबाह्या।**
**डोलाविक्षेपकलपा तदनियतिरियं धीक्रमे साक्षिणी नः।।**

**तस्मात्तत्तद्विशेषस्मृतिसमसमयं छन्नतत्तद्विरोधः**
**ख्यातस्साधारणोऽर्थः परमिह विशये, येन बुद्ध्यन्तरं वः।**

अर्थात् ऊर्ध्वत्वादिविशिष्टे पुरोवर्तिन्येकस्मिन्नेवाधिकरणे विरुद्धयोः आकृत्योः स्थाणुत्वपुरुषत्वयोः द्वयस्य एककाले प्रतीतिः परस्परविरुद्धा। अतः प्रत्येकं अधिकरणज्ञानद्वयं धर्मद्वयविषयकं ज्ञानद्वयं च वक्तव्यम्। न एकस्मिन् अधिकरणे विरुद्धधर्मविषयमेकं ज्ञानं वक्तुं शक्यते। अतः अत्र डोलाविक्षेपकल्पा इति ख्याति विशेषणमत्रप्रदत्तम्। डोलायाः देशद्वयसम्बन्धः न एकक्षणावच्छेदेन भवति। पूर्वदेशेन एकदा, पश्चिमदेशेन अन्यदा च भवति। तद्वदत्रापि स्थाणुत्वपुरुषत्वज्ञानं न एकदा भवति। किंतु कालभेदेन। कोटिद्वयभानस्य एककालिकत्वाभावः अस्माकं धीः क्रमे प्रमाणभूता भवतीत्यर्थः। एवं वस्तुतात्स्थितेः वर्तमानत्वात् स्थाणुत्वपुरुषत्वरूपकोटिद्वयोपस्थिति समकालम्।

न्यायमते अतिरिक्तं ज्ञानं संशयः। विशिष्टाद्वैतनये तादृशसामग्री विशेष एव संशयः न तु अतिरिक्तं एकं ज्ञानमिति तत्त्वमुक्ताकलापे प्रतिपादितम्।

अस्माकं सिद्धान्ते प्रमानिरूपणानन्तरं अप्रमायाः निरूपणं क्रियते। अप्रमा अर्थात् अयथार्थज्ञानमिति। "यत्र यन्नास्ति तत्र तस्य ज्ञानमप्रमा।"[7] ज्ञानस्य कारणकलापे यदा दोषस्य प्रवेशः तदा ज्ञानं अयथार्थं भवति। इदं किमिति संशयात्मकं ज्ञानमपि अप्रमाज्ञानमेवेति उच्यते। अप्रमा अयथार्थानुभव एव।[8] अप्रमायाः त्रयो भेदाः संशयः, अन्यथाज्ञानम्, विपरीतधीः इति। न्यायपरिशुद्धिकारस्य, वेङ्कटनाथस्य, गौतमस्य, अन्नम्भट्टस्य, लौगाक्षि-भास्करस्य च संशयलक्षणं समानमेव भवतीति वक्तुं शक्यते। 'सामान्य धर्मिस्फुरणे सति अप्रतिपन्नतद्विरोधप्रतिपन्नमिथोविरोधानेकविशेषस्फुरणं संशयः।[9] अर्थात् सामान्यधर्मिणां स्फुरणं यदि भवेत्, विशिष्टविरोधीगुणानां न ग्रहणेन अनेक परस्पर विरुद्धकोटीनां यत् स्फुरणं यो अनुभवः भवति स एव संशयः इति उच्यते।" एकधर्मिनानार्थविषयाधीस्तु संशयः" इति संशयस्य लक्षणम्[10] अर्थात् एकधर्मिणि नानाप्रकाराणां वस्तूनां ज्ञानं यदि भवेत् अयमेव संशयः। विकल्पद्वये एकस्य स्फुरणं अन्यस्य न ज्ञानं तदपि भिन्नं न भवेत् इति तत्र संशयः उत्पन्नः भवति। अतः एकविशेष्यकनानाप्रकारकं

ज्ञानमित्यर्थः। यथा स्याणुर्वा पुरुषो वा इति पुरोवर्तिपदार्थविशेष्यकमिथो विरुद्धस्थाणुत्वपुरुषत्वप्रकारकं ज्ञानं संशयः इति।

पुरुषत्वं स्थाषुत्वं च परस्परविरुद्धौ युगपत् एकस्मिन् धर्मिणि न भवितुम् अर्हतः। इदं वा इदं न वा इति सन्दिग्धोऽयं विषयः। अस्याम् अवस्थायां मनः एकस्मिन् धर्मिणि अनेकधर्मान् एकाधिकरणे संस्थाप्य डोलायमानं भवति। अस्यैव नाम संशयः। अपि च "धर्मिग्रहणे मिथोविरुद्धानेक विशेषस्फुरणं संशयः"[11] यथा ऊर्ध्वताविशिष्ट स्थाणुर्वा पुरुषो वेति ज्ञानम् इति। संशयस्य उदाहरणे स्थाणुत्वं पुरुषत्वं च विशेषणे स्तः। विशेषणं च वस्तुनः असाधारणधर्मः अन्यवस्तुनः भिन्नं भवति। यदि स्थाणुर्भवति पुरुषो न भवितुमर्हति।

अतः ऊर्ध्वताविशिष्टवस्तुरूपेण दृश्यमानत्वात् तत् ज्ञानं संशय इति। श्रुति वाक्येभ्यः भेदप्रतिपादनवाक्यानि, अभेद प्रतिपादनवाक्यानि जीवात् ब्रह्म भिन्नं भवति उत जीवब्रह्मणोः एकत्वं वा इति संशयः। इन्द्रियाणां उत्पत्तिः पञ्चभूतेभ्यः भवति उत अहङ्कारात् वेति संशयः। जगतः उपादानकारणं परमाणवः उत परं ब्रह्म इति संशयः। कतिपयविदुषां मते संशयज्ञानकारणं समानधर्म एव। विप्रतिपत्तिः कारणत्वेन नोच्यते। संशये एकस्मिन् धर्मिणि विरुद्धविशेषणानि बहूनि भवितुम् अर्हन्ति। अतः संशयविषये अनेकाः संशयाः सन्ति। वेदान्त-विचारे संशयः ज्ञानस्य प्राप्तिहेतुः। संशयनिवृत्त्यनन्तरं ज्ञानप्राप्तिः। उक्तंच—

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।[12] इति परमात्मर्शनात, सर्वे संशयाः छिद्यन्ते। इत्युक्त्वा अहं विरमामि।

**संदर्भः—**

1. न्यायपरिशुद्धिः स. 11
2. यतीद्रमतदीपिका–स. 4
3. द्रमिडोपनिषदा–स. 213
4. न्यायपरिशुद्धिः–स. 58
5. तत्वमुक्ताकलापः स. 240
6. तत्वमुक्ताकलापः स. 240

7. न्यायपरिशुद्धिः – श्री वेङ्कटनाथार्थकृता
8. अन्नंभट्टस्य मते
9. न्यायपरिशुद्धिः
10. वेदान्तकारिकावली
11. यतीन्द्रमतदीपिका-4
12. मुण्डकोपनिषत्-3/8


# Concept Of Doubt In Nyaya Philosophy

**Chandan Kumar Jha**

Knowledge of the objects in our daily life undertakes so many forms. Sometimes it is same as object perceived, sometime this knowledge differs with the objects, sometimes knowledge of a single object bring forth to knowledge of the two objects in a single locus. Out of our inability to determine a single object. In philosophy this third kind of knowledge falls under the category of doubt different philosophical schools interprets doubt differently. This paper suppose to discuss the issue of doubt reflected in nyaya philosophy under these heads:


1. Knowledge of objects and doubt in Nyaya philosophy
2. Nyaya views on doubt.
3. Necessary condition for doubt.
4. Causes of doubt.
5. Kinds of doubt.
6. Philosophical significance of doubt.

We can put object found in the world in the order of Dharma Sambandh and dharmin. All these three must be real to make object real. Thereby they can become object of knowledge. As object man is always found man qualified with inherent Man-ness. Here manners inherence-man all these three are real. So it may become object of our knowledge




when any object have a ablility to become the object of our knowledge. Then it is real.[1]

Above metioned three fold order doesn't apply in the case of sky-flower. Here both sky and flower are real but these relation in unreal so it can't be object of our knowledge




Thus we have seen that object always framed in dharm-Samandh-dharmin when thus object becomes object of our knowledge then it is necessary that our knowledge also follow the same order, only the knowledge will be true cognition. As term "Yathrtha" itself clarifies यथा अर्थ तथा ज्ञानं means knowledge same as object. Kind of qualifier that makes an object qualified requires also for the knowledge qualified.[2] If x qualified it is qualified by x-ness in our cognition same as object, then it is called true cognition.




1. Prameyatwam padarth samaanya laksnam [Dipika T.S.].
2. Tadvati Tadprakarko Anuprakarko Anubhabah Yathartah [Tarksamgrah]

In this figure we can see that knowledge of x object is qualified by x-ness same as x-object. So knowledge of x is could be turned as true cognition.

If this dharma appears differently then it would be fauls-cognition.[3] Thus there could be two possibilities.

(a) x-ness dharma appears in a form that is different from x-ness.

(b) x-ness dharma appears more than one forms.

The second condition relates to doubt. When we preceive some object, certain mental process takes place. The moment we perceive an object its dhama appear firstly. This dharma is of two kindså

(a) General dhrarma

(b) Special dharma

Firstly we perceive the general dharma, on the basis of this dharma we distinguish all those padharth that posses this general dharma. When we perceive a post, then on the basis of its height we remember two padarth on thus basis of General dharma. That is post or man these two are also different from other object which doesn't posses height. After the appearance of Sadharma padharth on the basis of special property we can distinguish other properties which ends of in true cognition.

But is the case of doubt knower isn't able to capture the special dharma. So he preceives many sadhama-object in same locus.

General dharmaåFirst moment

Sadhama-known object å Second moment

Special dharma å Third moment

Object å Fourth moment

---

1. Tad-abhāvbati Tadprakāko Anubah Auathartah [Tarksaṃgrah]

This is complete knowledge of object. But in case of doubt this whole process doesn't complete and we can only see General dharma. When we see any pen, then at the very first moment we capture only height, on the basis of this property we remember pen, pencil, candle. After this process we can't find special property. So in a dharmin these all objects appears. So these arises doubt. If the object perceive is pen, pencil, or any other thing.

Process of knowledge as described in Nyaya it clear it we don't possess knowledge of special property most possibly we end of with knowledge of many objects having common property in the same locus and this is doubt.

As on seeing post and finding height as its common property we recall post as well as man having same property-height. Here the knowledge of man-ness and post-ness in the same locus fault knowledge and this is doubt.

Thus we have seen how absence of special property causes doubt. Besides it there are many factors responsible for doubt.

(a) Common property

In the process of knowledge we see that common property presents before our cognition objects of so many kinds previous knowledge vanishes producing impression in Atman Soul. The knowledge of two different object, taken place at different moment vanishes after producing expression when we see any object. Then by the property we recall all object, having same property. The moment I perceive a post impression is get registered in mind. Some process undergoes in perception the perception of man. Now we have two impression in hand.

Again, when we see any object having height both the impression arises at same time and we have two different property for only one object. Here we see that this doubt is caused by common property.

Here in post, because of height we get confused between post and man. This confusion is created by height which is common property of both.

## Different Opinion

Different opinion about one object also account for doubt. About शब्द some says it eternal and other non-eternal. Then here gets confused whether it is eternal or non-eternal. Here we see the confusion is the product of different opinions regarding the nature of the object could also be confused as responsible factor for doubt.

## Special Property

Special property is also a important factor that causes doubt. In the case of शब्दत्व we can see शब्द which reside in ether and pot both-. Here ether is eternal and pot in non-eternal on the basis of this draya we get confused शब्द is eternal or non-eternal. Here this confusion is created by special property - शब्दत्व

## Types of Doubt

The kind of doubt can be classified on the basis of three factor i.e.

(i) Sadharan dharmaj

(ii) Viprapattij

(iii) Asadharan dharmaj

After dealing with factors which causes doubt, we now come to definitions of the doubt.

In Nyaya-sutra Gautam[1] says while defining doubt that :

In the presence of five factors one's seeking after special property is doubt.

Bhasarvajn define doubt as ' अनवधारण ज्ञान '[1]

According to Tark bhasha[2] the knowledge as presence of various properties contrary to each other in the same locus is doubt.

---

1. Vishesha pekṣo Vimarsho Samsayah [N.S 1/1/23]

In a locus we perceive post-ness and absence of post-ness two opposite property. Similarly n the same locus we perceive different objects post and man. This is doubt. Tark Samgrah[7] also suppose this view.

In the light of discussion above mentioned. It becomes class that three important factor responsible for doubt.

**(a) The knowledge of various properties**

When we get into the knowledge of any object our mind goes through various object of the same property. Similar to object of our knowledge. But if object is such that never fell into the preview of our knowledge. Then knowledge of common properties isn't going to produce the knowledge of various object.

When I know any object it produces some impression and vanishes. Suppose if I known only one object then if I see any dharma we recall that specific object. If I know many object then I will have impression of many objects. While preceiving and dharma I recall all object that possess this common dharma, then doubt occur so knowledge of various properties account for doubt.

**(b) Dharma must be mutually exclusive**

While preceiving object, on the basis its common property two or more then two dharmin come forth dharma of these two dharma must be mutually exclusive only then doubt can take place.

**(c) Locus must be the same**

Kind of object which comes to our mind on the basis of common property, must refer to the same locus. If this refers to different locus then knowledge. Then it doesn't fulfill the condition for doubt.

---

1. Anavdharnam Jñanam Saṃsayah [Nyay Sar]

2.

3.

Here on the basis of common property we recall objects, but it also requires that all objects refer to some locus. If man-ness refers other locus, ând postness refers other locus this is not a doubt.

The concept of doubt is significant for all-metaphysics, epistemology and ethics.

If we look at point of view of metaphysics it seems doubt is in the root of all metaphysical speculation. If some one has certain and clean knowledge of something's he will not inquire into nature of object. If he already knows object differently even then he will not inquire in to the nature of object. Because there he formulates a perception of object that is certain to him. But without any correspndence to the real world. Doubt arises when we sincerely ingase ourselves inquiring true nature of objects. So we can say doubt is main driving force of the philosophy.

From epistemological point of view doubt forms a state of knowledge. Though the false one knowledge's one of two kindså True or false. When a knowledge of object is identical with the object outside it is true knowledge. Opposite to this is false knowledge. Epistemology deals with both true cognitions as well as false cognition arising from many factors doubt is one such factor.

In the sphere of ethics our moral actions doubt arises in the forms of dillemma whether this cause of action is to be followed our that course of action an Enlightened mind dispel these doubt knowing the true nature of Karma or dharma. He avoids adharma and follows right action that is dharma.

# न्यायदर्शने संशयस्वरूपम्

सुशीलकुमारः

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्ष एव परमपुरुषार्थः, तत् प्राप्त्यर्थमेव सर्वेषां दर्शनानां प्रवृत्तिः इति साक्षादनुभूयते एव। अत एव सर्वाणि दर्शनानि सर्वाश्च विद्या मोक्षे प्रवृत्ताः। तत्र न्यायसूत्रकारेण 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः[1]' इत्यनेन सूत्रेणोक्तं यत् तत्त्वज्ञानेन अज्ञाननाशः, अज्ञाननाशे दोषनाशः, दोषनाशे प्रवृत्तिनाशः, प्रवृत्तिनाशे जन्मनाशः, जन्मनाशे दुःखनाशः दुःखनाशाच्च अपवर्गः इति। "तदत्यन्तविमोक्षोऽपवर्गः।[2]" अर्थात् मोक्षे ज्ञानस्य साध नत्वात् ज्ञानस्योपयोगित्वं विद्यते इति। "ऋते ज्ञानान्न मुक्तिः।[3]" तस्य ज्ञानस्य किं स्वरूपमिति जिज्ञासायामुच्यते– तच्च ज्ञानं बुद्धेः पर्यायः। बुद्धिश्च आत्मनः विशेषगुणः। "बुद्धिर्ज्ञामित्यनर्थान्तरम्।[4]" सा च बुद्धिः द्विविधा स्मृत्यनुभवभेदात्। यथार्थानुभवः प्रमा अयथार्थानुभवश्चाप्रमा। यथोक्तं तर्कभाषाकारेण "यथार्थानुभवः प्रमा।[5]" अर्थात् संशय-विपर्यय-तर्कशून्यज्ञानस्य यथार्थानुभवत्वात् प्रमा इत्यर्थः। यथा च न्यायसिद्धान्तमुक्तावल्यामुक्तं विश्वनाथपञ्चाननभट्टाचार्येण "भ्रमभिन्नन्तु ज्ञानमिति। अतः प्रायः सर्वैः दार्शनिकैः तत्त्वज्ञानस्य यथार्थज्ञानस्य वा मोक्षं प्रति कारणत्वं स्वीक्रियते। अत्र अयथार्थानुभवः संशयविपर्ययतर्कभेदेन त्रिविधः भवति इत्युक्तम्। उक्तं च अन्नंभट्टेन अयथार्थज्ञानं त्रिविधं संशयविपर्ययतर्कभेदात्।[7]

न्यायसिद्धान्तमुक्तावल्यामपि उक्तं यथा–

**"अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते।**
**तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।।[8]"**

अर्थात् अयथार्थज्ञानं त्रिविधं भवति। विपर्ययः, संशयः, तर्क-ज्ञानञ्च। तद्वति तत्प्रकारकं ज्ञानं प्रमा, तदभाववति तत्प्रकारकं ज्ञानं च भ्रम

अयथार्थ इत्यर्थः।

तत्र संशयः न्यायदर्शनाभिमतप्रमाणप्रमेयादिषोडशपदार्थेषु तृतीयः पदार्थो वर्तते। "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।[9]" तस्य संशयस्य किं स्वरूपमिति जिज्ञासायां न्यायसूत्रकारैः सूत्रितं यत् "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यऽव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।[10]" अर्थात् विशेषापेक्षो विमर्शः एव संशयः। एतत् संशयमधिकृत्यैव न्यायशास्त्रस्य प्रवृत्तिः इति भाष्यकारस्याभिमतम् "न निर्णीते नानुपलब्धेऽर्थे न्यायः प्रवर्तते किन्तु संशयितेऽर्थे।[11]" तत्र न्यायसिद्धान्त-मुक्तावलीकारेणोक्तं यथा–

**किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः।**
**तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः।।**
**स संशयो मतिर्या स्यादेकत्राऽभावभावयोः।।**

अर्थात् एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। साधारणादिधर्मस्य ज्ञानं संशयकारणम्।।

उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्। यथा उच्चैस्तरत्वं स्थाणुपुरुषसंशयकारणम्। यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वेन शब्दे गृहीतत्वाच्छब्दो नित्यो न वेति सन्दिग्धे।

विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणम्। शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्। किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते। संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्यसंशया-द्विषयसंशय इति। एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम्। किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति।

**संदर्भः–**

1. न्यायसूत्रम् 1-2
2. न्यायसूत्रम्
3. उपनिषद्वाक्यम्
4. न्यायसूत्रम्

5. तर्कभाषा पृ. 14
6. न्यायसि.मु.का. पृ. 134
7. तर्कसंग्रहः
8. न्यायसि.मु. पृ. 126
9. न्यायसूत्रम् 1-1-1
10. न्यायसूत्रम् 1-1-23
11. न्यायभाष्यम् भू.सं.प्र.

# "Samsaya" : According to A Primer of Navya-Nyaya-Language And Methodology

Pooja Bundel

Cognition is of two types : determinate and doubt. The cognition. in which only that (say 'x') or an absence of that (say absence of 'x') appears as a qualifier, is determinate one. Again, the cognition, in which that and absence of that (say 'x' and absence of 'x') both appear, is (the case of) doubt. For instance, 'this is a man', is determinate cognition, whereas, 'this long (thing) is a man or not' is doubt. "दीर्घोऽयं मानुषो न वा" इति संशयः।"[1] In the former only one i.e. 'manness' appears as a qualifier whereas in the latter both, 'manness and its absence' appear as qualifiers. In the case of doubt, in one and the same qualificand, 'counter-positive and its absence both appear as qualifiers regularly. There only one qualificandness appears as described by both positive and negative qualifiers just as in the above-mentioned example the qualificandness in the long qualificand is described by both the qualifierness in manness and qualifierness in the absence of manness.

In case of the cognition having a collection as its content, however, there is different qualificandness described by each qualifier-ness and this is the difference of the cognition having a collection as its content' from 'doubt'.

In case of doubt qualifier is known by the name 'side'/'aspect'. In the case 'whether this is a post or a man',

1. Navya-Nyāya-Bhāṣā-Pradīpa Mm Mahesha Chandra Nyayaratna – The Asiatic Society 1 Park street Kolkata 700016, 2004, Page no. 132

there are four sides or aspects, such as, postness, its absence, manness and its absence. This is why, this doubt is called four-sides doubt. Some, however, say even here only two sides or aspects are there, (i) postness and (ii) manness which is opposite of (absence of) postness.

(i) Difference between determinate cognition and doubt–

If one looks from an angle one can divide the cognition into determinate and doubt. The main difference between the two is in the first type only one qualifierness describes the qualificandness in only one qualificand; in the second type, namely, doubt there are more than one qualifier to describe only one qualificand. The main marker of doubt on the linguistic level is vā i.e. which is invariably absent in the determinate cognition.

(ii) Difference of 'doubt' from the 'cognition content of which is collection of things'–

The point of difference between 'doubt' and the cognition having more than one thing or rather a collection of many things as its content is only this that in doubt, there is only one qualificand and many qualifiers but in samūhālambanajñāna there are many qualificands (also) which are described by respective qualifiers.

(iii) Difference of opinion regarding 'doubt'– Third point is, there are differences in doubt depending upon the quantity and quality of its aspects. The case of doubt, 'whether the long (object) is a post or a man' has four aspects. They are post and its absence and man and its absence. But it must be noted that some people do not accept the four aspects. As per them, there are only two aspects. Postness and manners. There two are themselves absence (mutual absence) of each other so there is no need to accept the four sides.

In doubt, sometimes, both the probabilities are equal. Sometimes one probability is stronger. (For instance,) in the

case 'whether there will be rains in the month of Aśvina', as there is no indicator at present to decide or know either of the two probabilities, no probability is stronger.

"आश्विने मासि वृष्टिरधिका भवति न वा"[1]

But, when there is a doubt, 'whether there will be rains in the month of Bhādrapada, because the month of Bhādrapada falls in the rainy season—this case is called the case of doubt where one probability is stronger. This 'doubt' alone is known as "possibility". This is why, the cognition, 'whether there will be rains in the month of Bhādrapada is known to be "possibility"

"भाद्रे मासि वृष्टिर्भवति न वा"[2]

The example makes the point clear. If there is doubt regarding rains in the month which falls in rainy season, obviously the probability of rains is stronger whereas if the month does not fall in rainy season then no probability is stronger i.e. (perhaps) both are equal makes a references to one Pramāna accepted by pauranikas and its possibility.

Bibliography:-

i) Guha, D.C. Navya-Nyāya-System of Logic, Motilal Banarsidass, New Delhi 1968 (2nd Edi.1979)

ii) Jha, Ujjwala A Primer of Navya Nyaya Language and Methodology. The Asiatic Society 1 Park Street, Kolkata-70016 2004.

iii) Jha V.N. Studies in Language, Logic and Epistemology, Pratibha Prakashan, New Delhi, 1986

---

1. Navya-Nyāya-Bhāṣā-Pradīpa/Mm Mahesha Chandra Nyayaratna- The Asiatic Society 1 Park street Kolkata 700016, 2004, Page no. 134

2. Navya-Nyāya-Bhāṣā-Pradīpa Mm Mahesha Chandra Nyayaratna- The Asiatic Society 1 Park street Kolkata 700016, 2004, Page no. 135

iv) Jha, V.N. Edition and English translation of Viṣayatāvāda of Harirāma Tarkalaṅkāra, University of Pune, CASS. Class C, No. 16, 1987.

v) Jha, V.N. (General Editor) Bibliography of Nyāya-Vaiśeṣika, University of Pune, CASS Bibliography Series, classs H.No. 1, Pune, 1993.

vi) Motilal, B.K. Navya Nyāya Doctrine of Negation, Harvard University, Press, 1968.

vii) Motilal, B.K. Epistemology, Logic and Grammar in Indian Philosophical Analysis, Paris, 1971.

# संशयविमर्शः

**विजयनारायणगौतमः**

न्यायसूत्रम् न्यायस्य प्रथमो ग्रन्थोऽस्ति। अस्य प्रणयनं गौतमेन ईसायाः पूर्वं प्रथमशताब्दीतः तृतीयशताब्दीमध्ये कृतम्। संशयः न्यायशास्त्रस्य तृतीयः पदार्थोऽस्तीति न्यायदर्शनप्रथमसूत्रेणावगम्यते। "प्रमाणप्रमेयसंशयप्रयोजन दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः इति।"[1] प्रथमसूत्रेण प्रमाणादि-षोडशपदार्थानां तत्त्वज्ञानं खलु मानवानामावश्यकं भवतीति समुपदिश्य महर्षिणा गौतमेन मोक्षस्य प्राप्तिः कथं अपवर्गप्राप्तौ क्रमश्चेति प्रश्नस्योत्तरं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः[2] द्वितीयसूत्रे प्रस्तुतम्। तदनु प्रमाणस्य विभागः कृतः। प्रमाणैरर्थपरीक्षणं न्याय इति दिशा न्यायशास्त्रस्य प्रमुखः प्रतिपाद्यो विषयः प्रमाणमिति सिद्ध्यति। परं प्रमाणप्रमेयानन्तरं संशयस्य एकं विशिष्टं स्थानं दृश्यते। संशयनिवारणार्थं एव सर्वाणि शास्त्राणि स्व-स्वमतं स्थापयन्ति। यतो हि अस्य संशयस्य मुक्त्यर्थं मार्गं पृथक्-पृथक् अनुसरन्ति परं सर्वेषां नास्तिकास्तिकदार्शनिकानां वैदिकानां साहित्याचार्याणां च प्रमुखं लक्ष्यं मोक्षः। गौतमेन न्यायदर्शनस्य लक्षणं कृतम्" समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय"[3] इति। तर्कसङ्ग्रहकारेण "एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः"[4] इति लक्षणं सम्पादितम्। यथा स्थाणुर्वा पुरुषो वेति।

अर्थात् एकस्मिन् धर्मिणि परस्पराणां विरुद्धानेकानां धर्माणां वैशिष्ट्यस्य अवगाहनकारकं ज्ञानं संशयः कथ्यते। "अनवधारणज्ञानं संशय" इति सर्वदर्शनकारः लक्षणं करोति। अर्थात् अनिश्चयात्मकं ज्ञानं संशयः कथ्यते। अयं संशयस्त्रिविधो भवति। प्रथमं द्वयोर्वस्तुनोः कञ्चित् धर्मसाधारणत्वात् जायमानः संशयः यथा स्थाणुरस्ति पुरुषोऽस्ति वा, इत्यत्र स्थाणुपुरुषयोरुभयोः सामान्यो धर्मः एक एव ऊर्ध्वता प्राप्यते। द्वयोर्विशेषता यथा वक्रताकोटरादिज्ञानम्

अथवा पुरुषत्वस्य निर्णायिकाः विशेषताः हस्तपादादिनां किञ्चिदपि स्पष्टं ज्ञानं न भवति। न्यायभूषणकारेण अस्मिन् विषये स्पष्टं कृतम्। प्रथमाक्षदर्शनजं ज्ञानं विशेषदर्शनादिनिमित्तमन्तरेणोपजायमानं निश्चयात्मकं संशयात्मकं वा कथं भवितुमर्हतीति चेत् न; अदृष्टादिसामग्रीवशात् तथोत्पत्तेः। अन्यथाऽनवस्थाभयाद् विशेषदर्शनमन्तरेणोपजातं विशेषदर्शनमनिश्चयात्मकं स्यात्। तस्य च अनिश्चयात्मकत्वे विशेषवतोऽप्यनिश्चय इत्यनिश्चयात्मकं जगत् स्यात्। न हि शिरःपाण्यदिविशेषानिश्चयज्ञानात् पुरुषेऽनिश्चयो दृष्टः। अदृष्टादेश्च सामर्थ्याभ्युपगमे ततः एव निश्चयो भवतु, किमनिश्चयात्मकेन विशेषदर्शनेनानुपपन्नप्रमाणकेनेति? तदेवं विशेषदर्शनादिनिमित्तमन्तरेणापि कश्चिन्निश्चयात्मकमनिश्चयात्मकं च ज्ञानमस्तीत्यतो निरवद्यं लक्षणम्– "अनवधारणज्ञानं संशयः इति।" भोजवृत्तिकारेण भोजराजेन संशयविषये प्रोच्यते–"व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः"[5] नवैते रजस्तमोबलात्प्रवर्तमानाश्चैतस्य विक्षेपा भवन्ति तैरेकाग्रताविरोधिभिश्चित्तं विक्षिप्यत इत्यर्थः, तत्र व्याधिर्धातुवैषम्यनिमित्तो ज्वरादिः, स्त्यानमकर्मण्यता चित्तस्य उभयकोट्यालम्बनं ज्ञानं संशयो योगः, साध्यो न वेति प्रमादोऽनवधानता, समाधिसाधनेष्वेव वौदासीन्यम्, अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्समाधिभूमेरलाभोऽसंप्राप्तिः अनवस्थितत्वं लब्धायामपि भूमौ चित्तस्य तत्राप्रतिष्ठा, त एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यन्ते।

**निष्कर्षः–** संशयस्य सर्वाणि शास्त्राणि स्व–स्वमतानुसारं स्वीक्रियन्ते। निजबुद्धिबलानुसारं ये दार्शनिकाः संशयं न स्वीकुन्ति ते अपरनाम्ना सम्बोधयन्ति। फलतः गौतममुनिना निरूपिततृतीयपदार्थस्य संशयस्य उपयोगितावैशिष्ट्यं महत्त्वपूर्णम् अस्ति। न केवलं न्यायशास्त्रस्य कृते अपितु संशयस्य भूमिका सर्वेषां शास्त्राणां कृते विशिष्टा एव प्रतीयते।

**सन्दर्भः–**

1. न्यायसूत्रम्, 1-1-1
2. तत्रैव–1-1-23
3. तत्रैव–1-1-2
4. तर्कसंग्रहः–पृ. 255
5. भा.पृ.–152

# तर्कभाषादिशा संशयस्वरूपम्

**सपना**

**"यो देवो लोके सुशोभते**
**तेजस्वी नित्यं प्रदीप्यते।**
**गोष्ठ्यां पो प्रेम्णा विराजते**
**तं गुरुं वाण्या नमाम्यहम्॥"** (स्वरचित)

मान्याः अद्य सभायाः सभाध्यक्षाः पूज्याः गुरुपादाः, भातृ-भगिन्यश्च। अद्य, अहं भवतां समक्षे, संशयविषयमधिकृत्य यथामति यत्किञ्चत् शोधपत्रं विवक्षुरस्मि।

**"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्"** इति न्यायसूत्रेण बुद्धिः ज्ञानमेव, ज्ञानं तावत् आत्मनो गुणः तज्ज्ञानं न्यायशास्त्रे द्विविधं प्रतिपादितम्। प्रमात्वाऽप्रमात्वभेदेन **"तद्वति तत्प्रकारकं ज्ञानं प्रमा।" तद्वति अतत् प्रकारकं ज्ञानं अप्रमा।** यथा विश्वनाथेन उक्तं–

**"तद्वत् विशेष्यकत्वे सति तत्प्रकारत्वं ज्ञानं प्रमा।"** तत्र तर्कसंग्रहकारेणाऽपि प्रतिपादितं तद्वति तत्प्रकारकोऽनुभवः। प्रमा पुनः यथार्थज्ञानम्।

न्यायशास्त्रे यथार्थानुभवः चर्तुविधः प्रत्यक्षानुमित्युपमितिशाब्दभेदेन विभक्तः अप्रमा च संशयविपर्ययतर्कभेदेन च यथा तर्कसंग्रहकारेण उक्तं **अयथार्थानुभवः त्रिविधः संशयविपर्ययतर्कभेदात्।**[1]

न्यायभाष्ये भाष्यकारेण वात्स्यायनेन प्रतिपादितं यत् अप्रमारूपः संशय एव न्यायशास्त्रस्य प्रकृतिः। **नानुपलब्धे न निर्णीते किं तर्हि संशयितेऽर्थे न्यायः प्रवर्त्तते।**

---

1. तर्कसंग्रह पृष्ठ-88

तर्कसंग्रहकारेण संशयस्य लक्षणं कृतं–**"एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानं संशयः।"** यथा–

स्थाणुर्वा पुरुषो वेति। तत्रैव तर्कभाषाकारेण संशयस्य त्रैविध्यम् अंगीकृतम्। तत्र आदौ लक्षणं प्रतिपादितम्-एकस्मिन् धर्मिण विरुद्धनानाऽर्थावमर्शः संशयः। स च त्रिविधः विशेषादर्शने सति समानधर्मदर्शनजः, अर्थात् परस्परविरुद्धयोः द्वयोः धर्मयोः युगपत् एकस्मिन् धर्मिणि उपस्थितिः। कस्मिंश्चित् धर्मिण कस्यचित् धर्मस्य ज्ञाने जाते विशेषादर्शने सति धर्मिण कस्याञ्चित् एककोटौ अस्य धर्मस्य निणर्याभावे संशयो जायते। तादृशा संशयाः साधारणधर्मजाः संशयाः, यथा– स्थाणुर्वा, पुरुषो वा। यथा चोक्तं– तत्रैको विशेषादर्शने सति समानधर्मदर्शनजा यथा 'स्थाणुर्वा पुरुषो वेति।' अत्र– एकस्मिन्नेव अधिकरणे स्थाणुत्वं पुरुषत्वयोः परस्परविरुद्धधर्मयोः भानं भवति। तत्र विशेषदर्शनाभावात् संशयो भवति।

द्वितीयं विप्रतिपत्तिसत्यामपि संशयो जायते। विप्रतिपत्तिशब्दस्य अर्थो वर्त्तते परस्परविरुद्धयोः द्वयोः धर्मयोः प्रतिपत्तेः जनकः शब्दः। यथा–शब्दः नित्यः इति एकः पक्षः, शब्दोऽनित्यः इति द्वितीयः।

अत्र शब्दस्य धर्मिण नित्यत्वानित्यत्वयोः निश्चायकस्य विशेषधर्मस्य अभावात् मनसि संशयो जायते। एतादृश : संशयः, शब्दजः शब्दजन्यत्वात्। अयं विप्रतिपत्तिजः यथा–तर्कभाषाकारेण उक्तं–द्वितीयस्तु संशयो विशेषादर्शने सति विप्रतिपत्तिजः। स यथा शब्दो नित्यः उत अनित्यः इति।

तृतीयसंशयः असाधारणधर्मजः–अर्थात् असाधारणधर्मप्रयुक्तः असाधारणधर्मस्य अर्थो वर्तते। परस्परविरुद्धयोः धर्मयोः कस्यचिदपि धर्मस्य कस्मिँश्चिद् धर्मिण ज्ञाने जाते। तेषु धर्मेषु कस्यचिद् एकस्य धर्मस्य निर्णयाभावे तस्मिन् धर्मिण तयोर्द्वयोः परस्परविरुद्धयोर्धर्मयोः ज्ञानमुत्पद्यते। यथा– गन्धवत्वेन पृथिव्यां नित्यत्वानित्यत्वसंशयः।

तत्र न्यायसूत्रकारेण यल्लक्षणं प्रतिपादितं तर्कभाषाकारोक्तलक्षणेन किञ्चित् भिन्नं यथा– समानानेकधर्मोपपत्तेः विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-वस्थातश्च विशेषापेक्षो विमर्शः संशयः। अत्र सूत्रकारेण विशेषापेक्षो विमर्शः

इत्यनेन लक्षणं विहितं, संशयपदेन लक्ष्यं निर्दिष्टं अवशिष्टांशेन संशयहेतुनिर्देशः प्रतिपादितः।

**उपसंहारः**

न्यायदर्शने ज्ञानं बुद्धिपर्यायः। सा च बुद्धिः स्मृत्यनुभवभेदात् द्विविधा। अत एव तर्कभाषाकारेण श्रीमता केशवमिश्रेण **"यथार्थानुभवः प्रमा।" तर्कसंग्रहकारेण तत्र लक्षणं प्रतिपादितम्।** अनुभवस्तु यथार्थायथार्थभेदेन द्विविधो भवति इति नैयायिका वदन्ति। **"अयथार्थज्ञानं त्रिविधं संशय-विपर्ययतर्कभेदात्।"** एवञ्च ज्ञानेच्छादीनां सविषयत्वात् ज्ञानविषयस्य प्रमेयस्य सिद्ध्यर्थं न्यायसूत्रकारैः **"प्रमाणप्रमेयसंशयप्रयोजन-मित्यादि"** सूत्रे षोडशपदार्थानां निर्देशः कृतः। तेषु षोडशपदार्थेषु तृतीयः पदार्थः संशयः। तस्य संशयस्य किं स्वरूपमिति जिज्ञासायां न्यायसूत्रकारैः इत्थं भाषितं यत् **"समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य-व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"** इति अस्य सूत्रार्थस्य चिन्तनेन इदं ज्ञायते यत् विशेषापेक्षो विमर्शः संशयः इति संशयस्य लक्षणं फलितो भवति।

एवमेव तर्कभाषाकारेण संशयस्य लक्षणं कृतं–**"एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः"** इति संशय-लक्षणं प्रदर्श्य तस्य त्रिविधान् भेदान् सोदाहरणमुपस्थापितमित्यलम्।

# न्यायदर्शने संशयस्वरूपम्

रामसिंह

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः नित्यत्वे सति निरतिशयत्वात्, इति सर्वैः वेदवादिभिः स्वीक्रियते। नित्यश्च मोक्षः, 'न स पुनरावर्तते'[1] इति श्रुतेः। 'नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते' इति भाष्योक्तेश्च। न्यादर्शने–'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'[2] इति। अस्यार्थः, प्रमाणादिषोडश-पदार्थानां तत्त्वज्ञानान्मोक्षप्राप्तिर्भवतीति। अहमत्र न्यायदर्शनग्रन्थमाश्रित्य संशयस्य-स्वरूपम्, लक्षणम्, विभागञ्च लेखेनानेन प्रतिपादितुमिच्छामि।

**संशयस्वरूपम्**

महर्षिणा गौतमेन "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुलब्ध्य-व्यवस्थातश्च विशेषापेक्षो विमर्शः संशय"[3] इति सूत्रेण संशयो विवेचितः। संशये विशेषधर्मोपलब्धिः प्रतिबन्धिका, किन्तु संशयविषयीभूतस्य तस्य विशेषधर्मस्य स्मरणं तत्रावश्यकम्।

अयं कः पदार्थः? पदार्थस्य एतादृशानवधारणात्मकविमर्शः संशय इति। तथा च विशेषधर्मापेक्ष्यसमानधर्मादनेकधर्मदर्शनाद् विप्रतिपत्तितो वा उपलब्धेरव्यवस्थातः अनुपलब्धेरव्यवस्थातश्च संशय उत्पद्यते।

**"तत्रानवधारणज्ञानं संशय"** इति न्यायसारे संशयलक्षणं प्रतिपादितम्।[4] तत्रानवधारणञ्च तज्ज्ञानञ्चेति विग्रहो भूषणे निरूपितः। संशयपदस्य व्युत्पत्तयो बहवो दृश्यन्ते, तथाहि **संशीतिः संशय इति भावसाधनम्, करणसाधनं वा संशेतेऽनेनात्मा सुप्त इव भवति।**[5] **सर्वात्मना शेते इवात्मा यस्मिन् सति स संशय।**[6] संशेरते मुह्यन्तीन्द्रियाण्यस्मिन्निति संशय इति। संशयो द्विकोटिकश्चतुष्कोटिको

वा। तत्र स्थाणुर्न वेति तथा स्थाणुर्वा पुरुषो वेति यथाक्रममुदाहरणम्। **एकस्मिन् धर्मिणि विरुद्धोभयप्रकारकं ज्ञानं संशयः।**[7] शब्दो नित्यो न वेत्याकारकज्ञानं शब्दरूप एकस्मिन् धर्मिणि नित्यत्वानित्यत्वभावप्रकारकं भवति। न चात्मा नित्यः, बुद्धिः अनित्या इत्याकारकसमूहालम्बाज्ञानं संशय इति वाच्यम्, संशयस्योभयप्रकारतानिरूपितत्वेऽपि एकविशेष्यतया अङ्गीकारात्, समुच्चये तु विशेष्यताद्वयस्य भानात्, अत्र च नित्यत्वानित्यत्वयो-विरुद्धधर्मप्रकारत्वेऽप्यात्मविशेष्यताया बुद्धिविशेष्यतायाश्च भिन्नत्वात्। न चात्मा नित्यो विभुश्चेत्याकारकं ज्ञानं संशय इति वाच्यम्, धर्मिण आत्मन एकत्वेऽपि नित्यत्वविभुत्वरूपप्रकारयोः परस्परं विरोधाभावात्।

न चायं वृक्षः कपिसंयोगवान् कपिसंयोगाभाववान् चेत्याकारकज्ञानं संशयपदवाच्यम्, एकस्मिन् वृक्षे अवच्छेदकभेदेन कपिसंयोगतदभावयोः सत्त्वेऽपि परस्परमविरुद्धत्वात्।

**संशयविभागः**

भाष्यकारः पञ्चविधन् संशयान् बभाषे, वार्तिककारस्तु संशयस्य त्रैविध्यं विदधे पाञ्चविध्यं च प्रत्याचचक्षे–

"त्रिविधमेवं संशयः"[8] अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पञ्चविधं संशयं वर्णयन्ति, तन्न युक्तम्।"[9] वार्तिकपक्षमनुसृत्य टीकाकाराः– "त्रिविध एवेति ये पञ्चविधमाचक्षते, ते निराकृताः।"[10] तदेतन्मतमपनयन्निव भाष्योद्घोषमनुघोषयति भासर्वज्ञः। काश्यपीया अप्येनमेव न्यायमतं मन्वते–"समानतान्त्रिकैः पञ्चविधः संशयो वर्णितः।"[11]

**"स च समानधर्माऽनेकधर्माऽनेकधर्मविप्रतिपत्त्युपलब्ध्य-नुपलब्धिकारणभेदात् पञ्चधा भिद्यते।"**[12]

तद्यथा–

(क) **समानधर्मात्** – 'किमयं स्थाणुः स्यात् पुरुषो वेति'?

(ख) **अनेकधर्मात्** – 'आकाशविशेषगुणत्वात्किमयं शब्दो नित्यः स्यादनित्यो वेति'?

(ग) **विप्रतिपत्तेः** – 'एके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानीति'।

(घ) **उपलब्धेः** – ' किं सदुदकमुपलभ्यते, उतासदिति?'

**( ङ ) अनुपलब्धेः** – किं विद्यमानः पिशाचो नोपलभ्यते, उताविद्यमान इति?'

इत्यत्र प्रथमसंशयस्योदाहरणस्य अयं भावः यत् स्थाणुपुरुषयोः समानः साधारणो धर्म उर्ध्वत्वं तस्मात्। तच्चोर्ध्वत्वव्यवहारकारणं सामान्यमवयवरचनाविशेषो वा।

द्वितीयोदाहरणस्य अयं भावः यत् समानासमानजातीयमनेक-मिहाभीष्टम्। अनेकस्माद् व्यावर्त्तको धर्मोऽनेकधर्म इति मध्यमपदलोपिसमासः। असाधारणो धर्म इति भावः।

तृतीयसंशयविप्रतिपत्तेः उदाहरणस्य अयं भावः यद् एकरूपायाः विप्रतिपत्तेः सकाशात् किमिन्द्रियाणि भौतिकान्याहोस्विदभौतिकानीति संशयो मध्यस्थस्य विशेषमजानानस्य जायत इति।

चतुर्थसंशयभेदस्य उपलब्धेः उदाहरणस्य अयं भावः यद् विधि-मुखेन ज्ञानप्रवृत्तिरुपलब्धिस्तस्या एव संशयः। क्वापि कूपखननान्तरं जलोपलब्धौ तदुपलब्धा संशेते तटाकादौ जलं सदुपलब्धं मरुमरीचिकाचक्रे चासत्। इदानीमत्र जलं यदुपलब्धं तत् किम् सदसद्वेति। संशयस्य पञ्चमभेदस्य उदाहरणस्य अयं भावः यत् प्रतिषेधमुखेन प्रवृत्तं ज्ञानम्। ज्ञानानुत्पादश्चानुपलब्धिः। तस्याः इत्थं संशयः। श्मशाने पिशाचो अस्तीति कश्चित् प्रसिद्धिमाकलय्य तत्र गत्वा तमदृष्ट्वा सन्दिग्धे। एवमत्र न्यायदर्शने संशयस्य स्वरूपं प्रतिपादितम्।

**सन्दर्भः–**


1. छा. उप. 64/8/15/1
2. न्या. सू. 1/1/1
3. न्या. सू. 1/1/13
4. न्या. सा. पृ. 12
5. न्या. वा
6. प्र. मी.
7. एकधर्मिकविरुद्धोभयप्रकारकज्ञानं संशयः। अनु. चिन्तामणौ।
8. न्या. वा. पृ. 87
9. न्या. वा. पृ. 96
10. न्या. वा. ता. टी. पृ. 243
11. न्या. क. पृ. 421
12. न्या. सा. पृ. 3

# योगदर्शने संशयस्वरूपम्

**सुनीता कुमारी नागर**

भारतीयदर्शनेषु योगदर्शनस्य स्वकीयं विशिष्टं स्थानं वर्तते। यत्र चित्तवृत्तिनिरोधेन ध्यानधारणासमाधिभिः मोक्षस्य स्वरूपं निगदितमस्ति। चित्तवृत्तीनां सम्यक्तया निरोधः एव असम्प्रज्ञातः समाधिः इति उच्यते। यत्र पूर्वं सम्प्रज्ञातसमाधेः प्रभेदान् उक्त्वा समाधौ एव आत्मतत्वसाक्षात्कारः प्रतिपादितः। सामान्यतः चित्तवृत्तीनां विषयानभिमुखीकरणाय योगदर्शनस्य महान् प्रयत्नः। यस्यामवस्थायां प्रमाता आत्मसाक्षात्कारं करोति तत्र शरीरेन्द्रियाणां मनसः समस्तबन्धनानां मुक्तिर्भवति। सामान्यतः सांख्ययोगदर्शनयोः अभिन्नमेव स्वरूपम् आचार्यैः प्रतिपादितम्। उभयोः दर्शनयोः जीवः स्वतन्त्रः जीवात्मा स्वभावेन शुद्धचैतन्यस्वरूपः। वस्तुतः शारीरिकबन्धनात् मानसिकविकारात् च स जीवात्मा मुक्तो भवति, परञ्च अज्ञानेन कुत्रचित् कुत्रचित् सादृश्यात्, स्मृतिज्ञानात् अनुभवात् च भ्रमस्य स्थितिरुत्पाद्यते। भारतीयदर्शनेषु संशयः, विपर्ययः अध्यारोपः, विवर्तः, अध्यासः इत्यादिभिः शब्दैः सा भ्रमस्य स्थितिः ज्ञानाज्ञानयोः संयुक्तावस्था प्रतिपादिता।

सन्दर्भेऽस्मिन् योगदर्शने आद्यसूत्रे योगश्चित्तवृत्तिनिरोधः इत्यत्र चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यं विषयप्रियं भवति। तदेव तमसाऽनुविद्धमधर्मा-ज्ञानावैराग्यानैश्वर्योपगमं भवति। तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगमं भवति। तदेव रजोलेशमलोपेतं स्वरूप-प्रतिष्ठं सत्त्वपुरुषान्यथाख्यातिमात्रं धर्ममेघध्यानोपगमं भवति। तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः।

तत्र चित्ते जायमानेः विक्षेपे ये ये विघ्नाः जायन्ते तस्मिन् विषये सूत्रमेकं निगदितमस्ति।

**"व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्ध-भूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः।"**[1]

एते नव रजस्तमोबलात् प्रवर्तमानाः चित्तस्य विक्षेपाः भवन्ति। तैः एकाग्रताविरोधिभिः चित्तं विक्षिप्यत इत्यर्थः, तत्र व्याधिर्नाम धातुवैषम्यनिमित्तो ज्वरादिः स्त्यानमकर्मण्यता चित्तस्य, उभयकोट्यालम्बनं ज्ञानं संशयो योगः साध्यो नैवं इति, प्रमादो अनवधानता समाधिसाधनेषु औदासीन्यं, आलस्यं कायाचित्तयोः गुरुत्वम् योगविषये प्रवृत्तेः अभावहेतुः। अविरतिः चित्तस्य विषयसम्प्रयोगात्मा गर्धः, भ्रान्तिदर्शनं शुक्तिकायां रजतविपर्ययज्ञानं, अलब्धभूमिकत्वं कुतश्चित् निमित्तात् समाधिभूमेरलाभः अनवस्थितत्त्वं लब्धायामपि भूमौ चित्तस्य तत्र अप्रतिष्ठा, ते एते समाधेः एकाग्रतायाः यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यन्ते।

व्यासभाष्येऽपि संशयस्वरूपं प्रतिपादितम्–**"संशय उभयकोटि-स्पृग्विज्ञानं स्यादिदमेवं नैवं स्यादिति।"**[2]

स्वामिनारायणभाष्ये–**"योगस्य मुक्तिफलजनकत्वं-तदजनक-त्वोभयप्रकारकज्ञानम् संशयः"**[3] इति प्रतिपादितम्।

योगसिद्धान्तचन्द्रिकायां संशय स्वरूपं इत्थं प्राप्यते–**"सिद्ध्येति न वेत्युभयकोटिको विपर्ययः संशयः।"**[4]

अनेन प्रकारेण धर्मविरोधज्ञानं इदं सम्भवमसंभवं वा इत्येवं प्रकारकं ज्ञानं संशयः। अर्थात् ज्ञानस्य मार्गे यो बोधः तेन एव तस्य निवारणं भवति। अर्थात् यदि कस्मिन्नपि वस्तुनि सम्यक् ज्ञानं भवति तदा सादृश्येऽपि संशयो नैव भवितुं शक्यते। वस्तुनः साधारणधर्मज्ञानमेव सादृश्यमेव भजते।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् योगदर्शने यद्यपि सूत्रे एव संशयः निगदितोऽस्ति परञ्च यदि तस्य गाम्भीर्येण चिन्तनं कुर्मश्चेत् तत्रापि संशयशब्दस्य भावः विशिष्टरूपेण भिन्नपर्यायेण प्राप्तुं शक्यते इति।

**सन्दर्भः–**

1. योगसूत्र-1/30
2. व्यासभाष्यः पृष्ठ संख्या-53
3. स्वामिनारायण भाष्यः पृ.संख्या-133
4. योग सिद्धान्त चन्द्रिका पृष्ठ संख्या-48

# औलूक्यनये संशयपदार्थविमर्शः

संदीपकुमारः

भारते ज्ञानविज्ञानस्य सर्वासु अपि शाखासु विकासस्य कारणत्वेन प्रत्यक्षमप्रत्यक्षं वा वैदिकानाम् ऋषीणाम् अमृतवाक् यथा प्रेरणास्रोतः अङ्गीक्रियते, तथैव अत्र लौकिकवाङ्मयस्य सर्वाः अपि संकल्पनाः न्यायस्य आधारेण परिभाषिताः भवन्ति। भारतस्य वाङ्मयं वेदैराधृतं भवति किन्तु तस्य व्याख्याकार्यं न्यायशास्त्रसंभवं भवति। व्यावहारिकदृष्ट्या न्यायस्य अर्थः भवति नियमनियन्त्रितो व्यवहारः।[1] याज्ञवल्क्यः स्वग्रन्थे चतुर्दशविद्यासु द्वितीयं न्यायशास्त्रं वदति–

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥**[2]


वात्स्यायनानुसारं किञ्चिद्विधानं येन न्यूनतमशब्दैः क्रियते सः शब्दसमूहः न्यायः उच्यते। इदं च स्पष्टमस्ति यत् तादृशः शब्दसमूहः पञ्चावयवोपेतं न्यायवाक्यमेव[3] भवति। न्यायलक्षणं क्रियते–"प्रमाणैरर्थपरीक्षणं न्यायः।"[4] अर्थपरीक्षणोत्सुकानि सर्वाण्यपि शास्त्राणि एनं न्यायालम्बितविधिं समाश्रयन्ति इति न्यायविद्या सर्वविद्यानां दीपकः उच्यते।[5]

न्यायशास्त्रस्य ज्ञानमीमांसायां यथार्थानुभवत्वेन प्रमायाः व्याख्यानं प्रस्तुतम् अस्ति तथैव अप्रमाभूततत्त्वानामपि गणना कृता अस्ति। तत्र

---

1. नियमेन ईयते, नी इ+घ
2. याज्ञ. स्मृति 1/3
3. साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते स पंचावयवोपेतवाक्यात्मको न्यायः, न्या. भा.।
4. प्रमाणैरर्थपरीक्षणं न्यायः।
5. प्रदीपः सर्वविद्यानाम्।

अन्यतमोऽस्ति षोडशपदार्थानां गणनाप्रसंगेऽपि संशयः गण्यते। अन्नंभट्टः सर्वव्यवहारहेतुत्वेन बुद्धिं निर्दिशति। तच्च ज्ञानं द्विविधं भवति– 1. स्मृतिः 2. अनुभवश्च।




**अयथार्थानुभवः त्रिविधः उच्यते तर्कसंग्रहे[2]–**

1. संशयः
2. विपर्ययः
3. तर्कश्चेति।

संशय– **"एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि-ज्ञानं संशयः।"**[1] यदत्र उच्यते एकस्मिन् धर्मिणि विरुद्धानां नानाधर्माणा-मस्तित्वमसंभवमस्ति। अतः तादृक् या प्रतीतिः भवति सा प्रातीतिक्येव भवतिं न तु वास्तविकी। प्रातीतिकसत्तायाः ज्ञानं तादृशं ज्ञानं भवति। यस्य विषयः सः धर्मः अस्ति यस्य अस्तित्वं धर्मिणि अविद्यमांनम् अस्ति। अनेन प्रकारेण इदं ज्ञानं "तदभाववति तत्प्रकारकोऽनुभवः" इति उच्यते।


संशयलक्षणं पदकृत्येन साधयन् अन्नम्भट्टः अत्र पदत्रयं विवृणोति– एकस्मिन् धर्मिणि, विरुद्धनाना इति च। एकस्मिन् धर्मिणि किम्? यतः घटपटयोः समूहालम्बनज्ञानं तादृशं ज्ञानमस्ति येन मिथः विरुद्धानि

1. अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात्, तर्कसंग्रहः, पृ.सं. 207

एकाधिकवस्तूनि ज्ञानस्य विषयाणि भवन्ति। असति एकस्मिन् धर्मिणीति अंशे संशयस्य लक्षणं मिथो विरुद्धधर्माणां ज्ञानं संशयः। इदं समूहालम्बन-ज्ञाने अतिव्याप्तं भवति यतः तत्र विरोधिनौ घटपटौ समूहालम्बनज्ञानविषयौ स्तः। अर्थात् घटः पटात् विशिष्टः अस्ति पटश्च घटात् विशिष्टः अस्ति। घटत्वं पटत्वं च मिथः विरुद्धधर्मौ स्तः।

द्वितीयं पदं विरुद्धम् अस्ति। असति विरुद्धपदे 'घटः द्रव्यम् अस्ति' इति ज्ञाने संशयलक्षणस्य अतिव्याप्तिः भवति। एतत् पदं विना संशयस्य लक्षणं भवति– एकस्मिन् धर्मिणि नानाधर्मज्ञानं संशयः भवति। घटः द्रव्यम् अस्ति अस्मिन् ज्ञाने घटो विशेष्यः अस्ति तस्य घटत्वं द्रव्यत्वञ्चेति विशेषणद्वयं भवति। एकस्मिन्नेव धर्मिणि घटत्वं द्रव्यत्वञ्चोभे विद्येते। एवं विरुद्धपदाभावे 'घटो द्रव्यम्' इति ज्ञाने संशयलक्षणमतिव्याप्तं भवति। विरुद्धपदे निवेशिते लक्षणस्यातिव्याप्तिर्न भवति। यतः घटे घटत्वं द्रव्यत्वञ्चोभे धर्मौ विद्यते परन्तु नैतौ विरोधिनौ। विरुद्धपदनिवेशेन घटो द्रव्यमितिज्ञाने संशयलक्षणस्यातिव्याप्तिर्वारिता भवति।[1]


तत्र तृतीयव्याख्येयपदं नाना इति अस्ति। नानापदं विना अस्य लक्षणस्याकारः स्यात् एकस्मिन् धर्मिणि विरुद्धधर्मज्ञानं संशयः। पटत्वविरुद्ध-घटत्ववान् अर्थात् अयं पटत्वविरोधी घटत्ववान् अस्ति। अत्र नानापदं विना संशयलक्षणे अतिव्याप्तिदोषः भवति। नानापदसन्निवेशेन चायं दूरीभवति। यतः धर्मिणि घटे पटत्वविरोधी घटत्वधर्मः भवति किन्तु नायं भिन्नः अपितु एकः भवति।[2] रेखामध्यमेन लक्षणस्य प्रस्तुतीकरणम्–




तर्कसंग्रहे संशयस्येदमुदाहरणं प्रस्तूयते– स्थाणुर्वा पुरुषो वेति।[2] सायंकाले दूरस्थं किमपि वस्तु जातम् अवलोक्य कश्चित् तं स्थाणुं

1. तर्कसंग्रहः पृ. सं. 207
2. तर्कसंग्रह-दीपिका, पृ. सं. 208

जानीयात् तमेव पुनः पुरुषं कल्पयेत्। इदमेव तस्य ज्ञानं संशयः भवति यतः एकस्मिन्नेव धर्मिणि स्थाणुत्वं पुरुषत्वञ्चेति विरुद्धधर्मयोः ज्ञानं भवति। इमौ विरुद्धधर्मौ स्तः यत इमौ व्यधिकरणौ अर्थात् भिन्नाधिकरणौ भवतः। स्थाणुत्वं स्थाणौ भवति पुरुषत्वञ्च पुरुषे। अस्मिन् ज्ञाने विषयभूतौ द्वौ विरुद्धधर्मौ कस्यचिद्वस्तुनः विशेषणे प्रतीयेते। एवमिदं ज्ञानं तदभाववति तत्प्रकारकोऽनुभवः इति अयथार्थज्ञाने अन्तर्भवति।




**तर्कभाषायां संशयपदार्थः–**

यथार्थानुभवः प्रमा भवति। यथार्थपदेन संशयविपर्ययतर्काणां निरासः क्रियते। तदुच्यते- "यथार्थानुभवः प्रमा। यथार्थ इत्ययथार्थानां संशयविपर्यय-तर्कज्ञानानां निरासः।"[1]

सर्वदर्शनसंग्रहे अनिश्चयात्मकं ज्ञानं संशयः उच्यते–

**"अनवधारणात्मकं ज्ञानं संशयः।"[2]**

न्यायसूत्रकारानुसारं समानधर्मोपलब्धिः, अनेक धर्मोपलब्धिः, विप्रतिपत्तिः, अव्यवस्थिता उपलब्धिः तथा अव्यस्थिता अनुपलब्धिः एभिः प्रभावितः विमर्शः संशयः इत्युच्यते।[3] संशयसूत्रे उद्दिष्टतत्त्वानां व्याख्यानमेवं क्रियते–

**समानधर्मोपपत्तिमूलकः संशयः–**

अस्मिन् आकारायतनादिभिः दूरस्थितेषु पदार्थेषु एवं शंका भवति यदयं स्थाणुर्वा पुरुषो वेति। प्रमाता उभयोरपि धर्मानत्र समानं प्राप्नोति। असौ उभयोरपि अन्यतमस्य विशेषधर्मं जिज्ञासमानोऽपि निर्धारणे असमर्थः भवति।

1. तर्कसंग्रह-दीपिका, पृ. सं. 208
2. तर्कसंग्रह-दीपिका, पृ. सं. 208

**अनेकधर्मोपपत्तिमूलकः संशयः–**

अस्मिन् समानजातीयानाम् असमानजातीयानाञ्च उभयधर्माणां प्रतीतिः भवति परन्तु कश्चिद्विशिष्टधर्मो न ज्ञायते। यथा– शब्दो नित्योऽनित्यो वेति। एतद्रूपसंशयस्य कारणं भवति यत् परमाण्वादिषु नित्यपदार्थेषु घटादिषु चानित्यपदार्थेषु कतरस्यापि शब्देन सह समानधर्मता न दृश्यते। एतदेव अन्यथाप्येवं वक्तुं शक्यते यत् कोऽयं शब्दो भवति? द्रव्यं वा गुणः वा कर्म वापि यतस्तस्य विभेदकधर्मः त्रिषु अपि समानरूपेण उपस्थितः भवति। अतः किं शब्दः द्रव्यं सद्गुणः गुणेतरः वा अस्ति। अयं सन्देहः अनिवारितस्तिष्ठति। यतः कस्यापि एकस्य विभेदकधर्मः अत्र अवधारितः नास्ति।

**विप्रतिपत्तिमूलकः संशयः–**

एकस्मिन् विषये एव परस्परविरोधिसिद्धान्तानामुपस्थितिकारणेन निष्कर्षे अनिश्चय इत्यस्याभिप्रेतम्। विरुद्धमेकार्थदर्शनं भवति विप्रतिपत्तिः। यथा एकस्मिन् सम्प्रदाये उच्यते आत्मा अस्ति इतरस्मिन् निराक्रियते–'आत्मा नास्तीति।' तदा कस्यापि साधकहेतोः अनुपलब्धत्वात् तत्त्वनिश्चये बाधः भवति।

**उपलब्ध्यव्यवस्थामूलकः संशयः–**

उपलब्धेरनवस्थाया विशेषापेक्षविमर्शोऽपि संशयः भवति। इन्द्रियैः सद्वस्तु दृश्यते यथा तडागे जलं दृश्यते तदुपलब्धमपि भवति आयासेन। तथैव मृगमरीचिकायां जलं न भवति किन्तु तत्र तस्य आभासः भवति। तत्र सतः प्राप्तिर्भवति किं वा असतोऽपि प्राप्तिर्जायते इति विमर्शोऽपि संशयः भवति।

**अनुपलब्ध्यव्यवस्थामूलकः संशयः–**

अनुपलब्धेरपि अव्यवस्थया विशेषापेक्षविमर्शः संशयः भवति।

---

1. तर्कभाषा पृ. सं. 15
2. सर्वदर्शनसंग्रहः पृ. सं. 397
3. समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः। न्या. सूत्र 1.1.23

असतः अनुपलब्धिः भवति! कदाचित् सतः अपि अनुपलब्धिर्जायते यथा मन्त्रादिभिः कीलितं जलम् अथवा वस्त्रादिभिराच्छादितं जलम्।

अनुपलब्धेरव्यवस्थायाः आशयः अस्ति यत् अनुपलभ्यमानं वस्तु सदा असत् भवति। यथा आकाशे तारकाणामदर्शनं भवति ते च सन्तः सन्ति न हि असन्तः। असत् द्विविधं भवति-अनुपपन्नं विरुद्धं च। तत्र संशयः भवति असतोऽनुपलब्धिर्भवति, किं वा सतोऽपि तथैव स्यात्।

उद्योतकराचार्यानुसारं संशयस्येमान् पञ्चभेदानपि समानधर्मोपपत्तिमूलक-संशये हि समावेष्टुं शक्नुवन्ति। वैशेषिकैरपि एतत् स्वीक्रियते। केशवमिश्रः अन्तिमौ भेदौ न उल्लेखयामास।

न्यायदर्शने सर्वस्यापि व्यवहारस्य कारणं बुद्धिः स्वीक्रियते। बुद्धेः भेदद्वयमस्ति। यथार्थानुभवेन सत्पदार्थानां ज्ञानं भवति। अयथार्थानुभवेन पदार्थानां वास्तविकं ज्ञानं न भवति। तत्र संशयः भवति। यत् स्थाणुर्वाऽसौ पुरुषो वेति। एकस्मिन् धर्मिणि यदाऽनेकधर्माः भवन्ति तदा संशयः भवति। वस्तुतः विरुद्धौ धर्मौ कदापि समानाधिकरण्येन न भवतः अतः एकधर्मिणं विरुध्य अपरस्य सामानाधिकरण्यं प्रातीतिकमेव भवितुम् अर्हति वास्तविकं न। अस्या प्रातीतिकसत्तायाः ज्ञानस्य विषयः सः धर्मः भवति यो हि तस्मिन् धर्मिणि अविद्यमानः भवति।

# संशयपरिशीलनम्

**अनिल कुमारः**

संसारः खलु दुःखस्य कारणं, तस्य निवारणार्थं प्रतिपादितानि विभिन्नैः शास्त्रकारैः स्वस्वमतान्युपायभूतानि, तथापि किं खलु तस्याज्ञानभूतस्य दुःखस्य निवारणं भवति? नैव, यतो हि वस्तुरूपब्रह्मज्ञानस्य यावत् पर्यन्तं स्वात्मनि साक्षात्कारो नैव भवति, न तावदज्ञानस्य निवृत्तिः। अर्थात् अज्ञानस्य निवारणे कारणं ज्ञानम्, परञ्च अज्ञानं किं? कथं च तेन दुखाधिगमः, अज्ञानं नाम संशय इति गीतायां प्रमाणम्–**'ज्ञानसञ्छिन्न संशयम्'**[1] इति। अपि च–**'अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति'**[2] इत्यत्रापि संशयात्मनस्तथैवाभिप्रायः। परं च–

**तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानसिनात्मनः।**
**छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥**[3]

अनेन ज्ञायते यदज्ञानेन जायते यः स संशयः। हितोपदेशे विषयेऽस्मिन्–

**न संशयमनारुह्य नरो भद्राणि पश्यति।**
**संशयं पुनरारुह्य यदि जीवति पश्यति॥**[4]

उक्तमस्ति। अत्र चिन्तयामश्चेत् कथं नरोऽज्ञानयुक्तो भूत्वैव कल्याणं द्रष्टुं शक्नोति तस्यामेवावस्थायां मूलभूततत्त्वं पश्यति, परं च नात्रायमभिप्रायो यतोहि यावत् पर्यन्तं कस्मिन् वस्तुनि जिज्ञासा नैव समुत्पद्यते तावद् वस्तुनो ज्ञानं नैव भवति अर्थात् संशयमारुह्य एव ज्ञानस्य प्राप्तिर्भवति। पद्येस्मिन् संशय शब्दो जिज्ञासारूपः, न त्वज्ञानरूपः। अज्ञानाज्जायमाना या जिज्ञासा सैवात्र संशयशब्देन निगदिता। गीतायाः–तस्मादज्ञानसम्भूतमित्यस्यापि अयमेवाशयः। किरातार्जुनीये–**'सकलःसंशयमारुरोह शैलः'**[5] अत्र संशयशब्दस्यार्थो जीवितसन्देहो वर्तते। वेणीसंहारे युधिष्ठिरो द्रौपदीम्प्रति

ब्रूते–'**सर्वे जीवितसंशयं वयममी वाचा समारोपिता**'[6] इत्यस्मिन् तथैवार्थः। कुमारसम्भवेऽपि–'**मनस्तु मे संशयमेव गाहते।**'[7] साम्यमेव भजते। परं च सर्वदर्शनसंग्रहकारेण यदुक्तम्–'**अनवधारणात्मकं ज्ञानं संशयः।**'[8] अर्थात् अनिश्चयात्मकं ज्ञानं संशयः, इत्यत्र ज्ञानाज्ञानयोः सम्मिश्रितं यज्ज्ञानं स संशयश्चेत्, कथमुच्यते भगवता ज्ञानसछिन्नसंशयमिति प्रश्नः समुदेति, यदि अनवधारणात्मकज्ञानमात्रं स्वीक्रियते तदा तस्मादज्ञानसम्भूतं....छित्वैनं संशयमिति कथं वक्तुं शक्यते। साधारणधर्मेऽपि उभयोः ज्ञानाज्ञानयोः स्थितिः तिष्ठति एव। यत्सादृश्यं तदज्ञानं यच्च नैव तज्ज्ञानम्। असाधारणधर्मे ज्ञानमेव तिष्ठति तत्राज्ञानस्य कथमवकाशः? विप्रतिपत्तौ तु प्रमाणेन यत्सिद्धं तदेव निश्चितम्, अन्यथा स्वमतेन किम्? तस्मादज्ञानेन जायमाना जिज्ञासा एव संशयरूपेण स्वीकार्या, न केवलमज्ञानञ्च।

प्रशस्तपादभाष्ये[9] यत्स्वरूपमुक्तम् अविद्यायाः प्रसङ्गे, तत्र विचारयामश्चेत् तथाभूतस्तु संशयः व्यवहारे समायात्येव यतोहि साधारणधर्मं विना सादृश्यस्य व्यवहारो न तिष्ठति अपि च यत्सादृश्यं तत्पूर्वदृष्टवस्तुना सम्प्रति वस्तुनि ज्ञानं सत्यम्, यदसादृश्यं तत्सम्प्रतिविद्यमानज्ञानं, तस्य निवारणेऽभिन्नं ज्ञानं कारणं तस्मात्तत्र ज्ञानाज्ञानयोरवस्था वर्तते। अतः सादृश्ये यथा उदाहरणमादेशिकस्य सम्यङ्मिथ्याकथनं प्रतिपादितं तत्रापि ज्ञानाज्ञानयोः स्थितिर्वर्तते परं च सा स्थितिर्न सादृश्यजन्यज्ञानेन युक्ता। अज्ञानेन यदुक्तं तत्र तेनैव संशयः समुत्पन्नः, अन्यथा ज्ञानं तु तत्र प्रमाणसिद्धम्। यो बहिर्भेदस्तत्र प्रत्यक्षविषये सादृश्यज्ञानम्, असादृश्ये च विद्यमानमज्ञानं कारणम्। अप्रत्यक्षं विषाणादीनामुदाहरणमपि सादृश्ययुक्तत्वात् कथं द्वौ भेदौ स्वीकार्यौ, स्थाणुः पुरुषो वा इत्यनयोः ज्ञानाज्ञानदशायामपि सादृश्यं वर्तते। तर्कभाषाकाराभिमतम्[10]–एकस्मिन् विरुद्धनानार्थावमर्श इत्यनेन ज्ञायते यत् यावत् पर्यन्तं कस्मिन् वस्तुनि विरुधर्मा अपि च साधारणधर्मा न तिष्ठति तावत् संशयस्य स्थितिरेव न भवितुं शक्नोति। तत्रापि विप्रतिपत्तौ शब्दस्य प्रसङ्गे, शब्दस्तु नित्य एव नहि किमपि वस्तु नश्यति न वा उत्पद्यते अपि तु स्वरूपं परिवर्तते। शब्दः श्रूयते तदन्तरं विस्तारकारणात् आकाशस्य व्यापकत्वाच्च तस्य शब्दस्य स्वरूपमाकाशे विलीयते न तु नश्यति।

मीमांसकानां मते यथा मतिर्द्विधा स्वीक्रियते तन्न वक्तुं शक्यते यतोऽहि सादृश्यज्ञानं यावत्तिष्ठति तावत् पूर्वज्ञानजन्या स्मृतिः, तदन्तरम् असादृश्ये वर्तमानज्ञानासादृश्यजन्याः स्मृतिः इति तु निश्चितम्, परञ्च सादृश्यासादृश्ययोर्मध्ये या स्थितिर्भवति सापि अवश्यमेव स्वीकार्या, असादृश्यज्ञानजन्यजिज्ञासा अनौचित्यप्रसङ्गात्। न संशय अध्यारोप इति एकस्मिन् वस्तुनि अपरस्य आरोपे सादृश्येऽपि असादृश्यज्ञानस्यानवस्थात्वात्, न च विपर्ययः तत्रैकस्य मिथ्याज्ञानस्य स्थितित्वात्। न चायं स्याद्वादो यतोऽहि इदं वस्तु एतादृशमपि वर्तते इति स्याद्वादसिद्धान्तः। अत्र उभयोः वस्तुनोः सम्यक् साधारणासाधारणधर्मज्ञानत्वान्न संशयः। 'स्यादस्ति नास्ति' 'स्यादस्ति नास्ति अव्यक्तं च'[11] इत्यनयोरपि पूर्वस्मिन् सूत्रे-'स्यादस्ति' इत्यत्र सम्यक्साधारणधर्मज्ञानं, नास्तीत्यत्र सम्यगसाधारणधर्मज्ञानं तिष्ठति एव। एवं च द्वितीये सूत्रे साधारणासाधारणधर्मज्ञानयोर्भेदस्य तु स्पष्टता वर्तते परं च वक्तुं न शक्यते इति।

भाषापरिच्छेदे उक्तमस्ति[12]–

**स संशयो मतिर्या स्यादेकत्राभावभावयोः।**
**साधारणादिधर्मस्य ज्ञानं संशयकारणम्।।**

वस्तुतस्तु एकस्मिन् वस्तुनि भावाभावयोः मिश्रितावस्थायां साधारणज्ञानस्य ये धर्मास्त एव संशयं जनयन्ति।

न्यायभाष्यस्य[13] टीकायां संशयस्य चत्वारि कारणानि निगदितानि सन्ति, तानि चेत्थं व्याख्यातानि समानसदृशा अनेके ये धर्मास्तेषामुपलब्ध्या संशयः परस्परविरुद्धसिद्धान्तज्ञानात् संशयः, उपलब्धेरव्यवस्थातः, अनुपलब्धेरव्यवस्थातः, समानानेकधर्मोपपत्त्यादिकारणैर्जायमानो विशेषो विमर्शश्च संशयः। तत्राद्यस्योदाहरणे स्थाणुपुरुषयोरनिश्चयात्मकं ज्ञानं संशयः अर्थात् स्थाणुत्वपुरुषत्वादिविशेषधर्मं किं वा पुरुषादिव्याप्यधर्मं करचरणादिमत्त्वं जिज्ञासमानोऽपि तादृशसमानधर्मज्ञानानन्तरं यत् किमुत विशेषरूपं न निश्चिनोति तदेवानिश्चयात्मकं ज्ञानं संशयः।

द्वितीये उदाहरणे पृथिव्या जलादिकं द्रव्यत्वेन समानजातीयं, गुणादिकं चाऽसमानजातीयं, द्रव्यत्वानाक्रान्तत्वात् समानजातीयाऽसमानजातीययोर्ये धर्माः

तेषामुपलब्धेः संशयो जायते। उपलब्धेरव्यवस्थातः किं सदुपलभ्यते उतासदुपलभ्यते इति संशयः। क्वचित् सदपि न प्रतीयते यथा मूलकीलकोदकादि तथा चाऽसत एवानुपलब्धिर्भवति इति नियमो नास्ति परं च सतोऽप्यावृतस्यानुपलब्धिर्भवति इत्येषाऽनुपलब्ध्यव्यवस्था ततश्च अप्रतीयमाने सत्त्वासत्त्वयोरन्यतरस्य व्यवस्थापकप्रमाणानुपलब्धौ सत्त्वासत्त्वयोरन्यतरस्य निश्चयाभावात् संशयो भवति। तादृश संशयानन्तरम् उपलब्धिप्रतिबन्धके निश्चिते सत्यसतोऽनुपलब्धिरिति एवमनुपलभ्यमानस्य सत्त्वसत्त्वयोः निश्चयो भवति तेन संशयो निवर्तते। वस्तुतस्तु उपलब्ध्य-व्यवस्थास्थले अनुपलब्ध्यव्यवस्थास्थले अपि च समानानेकधर्मोपपत्तेः विप्रतिपत्तेर्वा संशयो जायते यथा उपलब्धिः अनुपलब्धिश्च सदसतोः समानैवोपलभ्यते किं वा उपलब्ध्यव्यवस्थातः अनुपलब्ध्यव्यवस्थातः अपि च समानानेकधर्मोपपत्तेः विप्रतिपत्तेरेव संशयो जायते न तु साक्षादिति।

निष्कर्षरूपेणेदं वक्तुं शक्यते यन्न केवलं न्याये संशयनाम्नः पदार्थस्य विस्तरेणोल्लेखो दृश्यते, अपि तु सम्पूर्णदर्शनशास्त्रे विभिन्नैः पर्यायैर्विभिन्नैराचार्यैरस्य प्रतिपादनं कृतं, तथापि यावत्पर्यन्तं साधारणधर्मस्यासाधारणधर्मस्य च भेदो नैवावलोक्यते तावत्पर्यन्तं संशयस्य स्थितिः कस्मिन्नपि वस्तुनि संजायते एवेति।

**सन्दर्भितग्रन्थाः—**

1. श्रीमद्भगवद्गीता 4.41
2. तत्रैव 4.39
3. तत्रैव 4.42
4. हितोपदेशः 1.7
5. किरातार्जुनीयम् 13.16
6. वेणीसंहारनाटकम् 6.1
7. कुमारसम्भवम् 5.46
8. सर्वदर्शनसंग्रहः संशयप्रकरणम्
9. प्रशस्तपादभाष्यसंशयप्रकरणम्
10. तर्कभाषा संशयप्रकरणम्
11. स्याद्वाद एकपरिशीलनम्
12. वेदान्तपरिभाषा संशयप्रकरणम्
13. न्यायभाष्यम् संशयप्रकरणम्

# The Role of Doubt in Nyāya - a Perspective

Prasanta Kumar Sethi

In area of Indian philosophy right and wrong is indicated the term **jnana** or Knowledge. Former is directly related to the true knowledge whereas later in Mithyajnana. The Nyaya philosophy is primarily concerned with the condition of valid thought and the means of acquiring a true knowledge of objects. Nyaya as a science lays down the rules and methods that are essentially necessary for a clear and precise understanding of all the materials arround us knowledge as these are derived from observation and authority. The science of Nyaya deals with all the processes and methods that are involved, either directly or indirectly, The right and consistent knowledge of reality. The Nyaya teaches that the ultimate aim is attainable only through the perfect knowledge. But the paths or ways to ascertain true knowledge is always kindred by wrong or illusionary knowledge just like darkness covers light. One opposite characters but without first, the second is not is not realized. Since dark has negative role, it is the cause of obstruction and light has positive role it is the way of revelation. Similarly is the case of false and true knowledge. The knowledge justifies the existence of a true object where as false knowledge leads to nothing. Like darkness the doubt has negative role and is considered as an obstruction in philosophical understanding. It creates a sense of duality and tries to keep a seeker in confusion and suspicion. Therefore it is understood as kind of hinderaous which ultimately helps to manifest the ground truth. The true nature of an object which is covered by the influence of doubt will be removed by the means of valid knowledge. In this connection doubt in philosophical discourse plays negative but important role for the exposure of true knowledge. An effect has been made in this paper to sketch the methods of doubt adopted by Nyaya philosophy.

# भारतीय न्यायशास्त्र में संशय का विश्लेषण

**घनश्याम मिश्र**

भारतीय दर्शन की परम्परा में न्यायशास्त्र का महत्त्व सर्वथा अप्रतिम है। भारतीय दर्शन को प्रामाणिक, व्यवस्थित एवं तर्कसंगत स्वरूप प्रदान करने में जिस वादविद्या का अपूर्व योगदान रहा है वह न्यायशास्त्र की ही देन है। 'प्रमाणैरर्थपरीक्षणं न्यायः'[1] के अनुसार प्रमाणों के द्वारा वस्तुतत्त्व या प्रमेय का परीक्षण करना ही न्यायशास्त्र का मुख्य उद्देश्य है। गौतम ने सोलह पदार्थों में संशय की प्रमाण और प्रमेय के बाद तीसरे स्थान पर गणना करके इसे पर्याप्त प्रमुखता दी है। वात्स्यायन ने स्पष्ट ही कहा है कि यदि कोई विषय निर्णीत है या अस्तित्व में नहीं है तो न्याय की आवश्यकता नहीं पड़ती, जहाँ कहीं किसी बात या समस्या का अस्तित्व हो पर उसका निर्णय न हो रहा हो वहीं न्याय की सहायता अपेक्षित होती है। स्पष्ट है कि ऐसे अवसर आम लोगों के जीवन से लेकर महान् शास्त्रों के विश्लेषण तक सभी जगह उपस्थित होते हैं अतः न्यायशास्त्र न केवल शास्त्रीय दृष्टि से अपितु व्यावहारिक जीवन यापन के लिए भी अत्यधिक उपयोगी है।

न्याय का आधार संशय है। भारतीय नैयायिकों का यह मत देकार्त के सिद्धान्त– दर्शन का आरम्भ संशय से होता है, ये स्पष्टतः मिलता है। भारत में भी 'वादे वादे जायते तत्त्वबोधः' की जो धारणा प्रचलित है उसके मूल में संशय ही काम करता है। शुद्ध चिन्तन की दृष्टि से इसी को जिज्ञासा भी कहते हैं।

**संशय का लक्षण–** 'नानार्थावमर्शः संशयः'[2] अनेक विकल्पों में ऊहापोह संशय है। 'सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशयः'[3] वस्तुद्वय-साधारणधर्मयुक्त धर्मी के प्रत्यक्ष होने से पृथक्-पृथक् दोनों वस्तुओं के

विशेष धर्म के अप्रत्यक्ष होने से और साधारणधर्मयुक्त वस्तुद्वय के स्मरण (ज्ञान) से संशय का उदय होता है। 'दृष्टञ्च दृष्टवत्'[4] पूर्वदृष्ट (स्थाणु तथा पुरुष जैसे परस्पर विरुद्ध) पदार्थों के समान ही पूर्ववर्ती पदार्थों में वर्तमान ऊर्ध्वत्वादि साधारण धर्म संशय का हेतु होता है। 'यथादृष्टमयथादृष्टत्वाच्च'[5] एक ही धर्मी का कदाचित् एक विशेषणयुक्त दर्शन और कदाचित् अन्य विशेषणयुक्त दर्शन के बाद अन्य काल में विशेषण के अप्रत्यक्ष से एक धर्मी में वर्तमान धर्म ही संशय का हेतु होता है। 'विद्याऽविद्याश्च संशयः'[6] सामान्य रूप से ज्ञान और विशेषरूप से ज्ञान से भी संशय होता है।

तर्कसंग्रह के अनुसार– 'एकस्मिन् धर्मिणि विरुद्धनानाधर्म-वैशिष्ट्यावगाहिज्ञानं संशयः'7 माधुरी टीका के अनुसार– 'एकस्मिन् धर्मिणि विरुद्धनानाभावाभावप्रकारकज्ञानं संशयः' अर्थात् एक ही धर्मी में परस्पर विरुद्ध भावाभाव को विषय करने वाले ज्ञान को संशय कहते हैं। जैसे मन्द अन्धकार में स्थित दिखाई पड़ने वाले किसी स्थाणु के विषय में 'स्थाणुर्वा पुरुषो वा' इस प्रकार का जो ज्ञान होता है वह ज्ञान पुरोवर्ती स्थाणुरूप एक धर्मी में 'स्थाणुत्व को और स्थाणुत्व के अभाव को' तथा 'पुरुष को और पुरुषत्व के अभाव को' विषय कर रहा है। यहाँ स्थाणुत्व तथा स्थणुत्व का अभाव– ये दोनों, तथा पुरुष तथा पुरुषत्व का अभाव– ये दोनों परस्पर विरोधी हैं। अर्थात् दोनों एक ही अधिकरण में नहीं रह सकते। इसलिए एक धर्मी के विरुद्ध भावाभावप्रकारक ज्ञान होने से उसे संशय कहा जाता है। 'स च त्रिविधः। विशेषादर्शने सति समानधर्मदर्शनजः, विप्रतिपत्तिजः, असाधारणधर्मजश्चेति।[8] नव्यन्याय के अनुसार ज्ञान के दो भेद किये गये हैं– 'ज्ञानं द्विविधं-निश्चयः संशयश्चेति।'

'यस्मिंस्तु पुनः तद् तदभावश्च उभयमेव भाषते स संशयः। यथा– 'दीर्घोऽयं मानुषो न वा' इति संशयः[9] एक अधिष्ठान में जब एक ही धर्म होता है तो वह निश्चय ज्ञान होता है, किन्तु एक अधिष्ठान में जब दो धर्म हो जायें तो वह ज्ञान संशय कहलाता है। 'संशये हि एकस्मिन् विशेष्ये प्रतियोगी तदभावश्च परस्पर विरुद्धावपि उभौ प्रकारतया भासेते इति नियमः'[10] संशय में एक ही विशेष्य में प्रतियोगी और उस

प्रतियोगी का अभाव परस्पर विरुद्ध होने पर भी एक ही धर्मी में भाषित होता है।

निश्चय ज्ञान में एक ही मनुष्यत्व प्रकार होता है किन्तु संशय में मनुष्यत्व और उसका अभाव दोनों एक ही प्रकार में भाषित होता है। संशये प्रकारस्य कोटिरिति नाम। 'अयं स्थाणुर्वा पुरुषो वा' इत्यादौ संशये कोटिचतुष्टयमस्ति। स्थाणुत्वं स्थाणुत्वाभाव: पुरुषत्वं पुरुषत्वाभावश्चेति। अत एवायं संशय: चतुष्कोटिक इत्युच्यते। केचित्तु वदन्ति– अत्रापि कोटिद्वयमेवास्ति स्थाणुत्वं, स्थाणुत्वविरुद्ध पुरुषत्वञ्चेति।

'संशये च क्वचित् कोटिद्वयं समानं भवति क्वचिच्च काचिदेका कोटिरुत्कटा भवति। 'आश्विने मासि वृष्टिरधिका भवति न वा' इति संदेहे अधिकवृष्टे: तदभावस्य वा बोधकं किमपि चिन्हमधुना नास्तीति नैकापि कोटिरुत्कटा। परन्तु 'भाद्रे मासि वृष्टि: भवति न वा इति संशये भाद्रमासस्य वर्षाकालतया वृष्टिकोटिरुत्कटा इत्ययं संशय: उत्कटैककोटिक'[11] सर्वदर्शनसंग्रह में अनिश्चयात्मक ज्ञान को संशय कहा गया है– 'अनवधारणात्मकं ज्ञानं संशय:'[12]

यह आवश्यक नहीं है कि जिस वस्तु के बारे में हमें संशय हो वह परिणाम में भी संशयग्रस्त ही रह जाये। वस्तुत: संशय की सत्ता तभी तक रहती है जब तक कि 'विशेष' की उपलब्धि नहीं हो जाती। इस प्रकार संशय वस्तुत: अधिकतर मामलों में तो ज्ञान की पूर्वावस्था है। किन्तु फिर भी वह प्रमा की अपेक्षा अप्रमा का ही भेद माना जाता है, क्योंकि प्रमा यथार्थ अनुभव को कहते हैं और संशय दशा में यथार्थ न होने के कारण अयथार्थ कहलाता है, न कि अयथार्थता के चिन्हों के कारण। संक्षेप में अनिश्चय रूप ज्ञान संशय है। यद्यपि संशय में अनुभव तो होता है, किन्तु इसमें निश्चितता का अभाव होने के कारण इसको अप्रमा की श्रेणी में रखा गया है।

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्श: संशय:।[13]

गौतम के अनुसार समानधर्मोपलब्धि, अनेकधर्मोपलब्धि, विप्रतिपत्ति,

उपलब्धि की अव्यवस्था तथा अनुपलब्धि की अव्यवस्था से विशेष अपेक्षा रखने वाला विमर्श संशय कहलाता है। परिभाषा में ही परिगणित संशय के पाँच भेदों का स्वरूप वात्स्यायन ने निम्नलिखित रूप में बतलाया है–

1. **समानधर्मोपपत्तिमूलक संशय–** वह होता है, जिसमें आकार, आयतन आदि के कारण दूरस्थित पदार्थ के बारे में यह शंका उत्पन्न हो जाती है कि यह स्थाणु है अथवा कोई पुरुष। प्रमाता यहाँ दोनों वस्तुओं के धर्मों को तुल्यरूप से देखता है। उसे दोनों वस्तुओं में से किसी एक के विशेष धर्म को जानने की अपेक्षा होती है किन्तु वह किसी का निर्धारण नहीं कर पाता।

2. **अनेकधर्मोपपत्तिमूलक संशय–** उसे कहते हैं, जिसमें समानजातीय और असमानजातीय दोनों धर्मों की प्रतीति होती है, परन्तु कोई एक निश्चित विशिष्ट धर्म ज्ञात नहीं होता। जैसे कि शब्द नित्य है अथवा अनित्य? इस प्रकार का संशय उत्पन्न होता है। इसका कारण यह है कि परमाणु आदि नित्य पदार्थ और घट आदि अनित्य पदार्थों में एक की भी शब्द के साथ समानधर्मता नहीं देखी जाती है। इसी बात को एक अन्य रूप में इस प्रकार से भी कहा जा सकता है कि शब्द के बारे में यह शंका होती है कि यह द्रव्य है, गुण है अथवा कर्म हैं? क्योंकि उसका विभेदक धर्म तीनों में समानरूप से विद्यमान है। अतः क्या शब्द द्रव्य होता हुआ गुण, गुण से भिन्न हैं? इस सन्देह का निवारण नहीं हो पाता क्योंकि किसी एक निश्चित विभेदक धर्म का यहाँ अवधारण ही नहीं होता।

3. **विप्रतिपत्तिमूलक संशय–** इससे अभिप्राय है कि एक ही विषय या वस्तु के सम्बन्ध में परस्पर विरोधी सिद्धान्तों की उपलब्धि के कारण किसी एक निश्चय पर न पहुँचना। विरुद्धएकार्थदर्शन को विप्रतिपत्ति कहा गया है। एक दर्शन कहता है कि 'आत्मा है' दूसरा कहता है कि 'आत्मा नहीं है' ऐसी स्थिति में किसी भी पक्ष का साधक हेतु उपलब्ध न होने के कारण तत्त्व का निश्चय नहीं हो सकता।

**4. उपलब्ध्यव्यवस्थामूलक संशय–** उपलब्धि की अव्यवस्था से भी विशेषापेक्ष विमर्श को संशय कहते हैं। इन्द्रियों से सत् पदार्थ जैसे तालाब स्थित जल दिखाई देता है और मिल भी जाता है। इसी प्रकार मृगमरीचिका में जल नहीं है, पर भान होता है। क्या सत् ही मिलता है या असत् भी मिल जाता है– ऐसा विमर्श भी संशय कहलाता है।

**5. अनुपलब्ध्यव्यवस्थामूलक संशय–** अनुपलब्धि की व्यवस्था से भी विशेषापेक्ष विमर्श संशय कहलाता है। असत् तो मिलता ही नहीं है पर कभी कभी सत् भी नहीं मिलता। जैसे मन्त्र आदि से कीलित या वस्त्र आदि से आच्छादित जल।

अनुपलब्धि की अव्यवस्था का आशय है– इस नियम का अभाव कि 'अनुपलब्ध होने वाली वस्तु सदा असत् ही होती है।' उदाहरणतया मध्यान्ह में आकाश में तारे नहीं दिखाई देते। वे दिखाई नहीं देते पर असत् नहीं है। असत् दो प्रकार का होता है– अनुत्पन्न तथा निरूद्ध। ऐसी स्थिति में यह संशय होता है कि क्या असत् ही नहीं मिलता अपितु सत् भी नहीं मिलता। संशय के इन पाँचों में से अन्तिम भेदों को उद्योतकर के मतानुसार समानधर्मोपपत्तिमूलक संशय के अन्तर्गत ही समाविष्ट किया जा सकता है। वैशेषिकों के अनुसार समानधर्मोपपत्ति में ही बाकी सब भेदों का अन्तर्भाव हो जाता है। केशव मिश्र ने भी अन्तिम दो संशय-भेदों का उल्लेख नहीं किया है। तर्कभाषा में संशय (1) साधारणधर्म-ज्ञान जन्य, (2) असाधारणधर्म-ज्ञानजन्य और (3) विप्रतिपत्तिवाक्य-ज्ञान-जन्य- भेद से तीन प्रकार से होता है। उसमें से साधारणधर्म-ज्ञान जन्य संशय में 'स्थाणुर्वा पुरुषो वा'–यह ज्ञान तो 'स्थाणु' में तथा 'पुरुष' में रहने वाला जो 'उच्चैस्तरत्व' रूप साधारण धर्म है, उसके ज्ञान से जन्य होने के कारण, इस ज्ञान को 'साधारणधर्म-ज्ञान जन्य संशय' कहा गया है।

अब दूसरे प्रकार का संशय इस प्रकार का होता है–'शब्दत्व' धर्म, 'आकाशादिक' नित्य पदार्थों में भी नहीं रहता है तथा 'घटादिक' अनित्य पदार्थों में भी नहीं रहता है, वह तो केवल 'शब्द' में ही रहता है। इस प्रकार के ज्ञान के बाद पुरुष को 'शब्दः नित्यो न वा' इस प्रकार

का शब्द में 'नित्यत्व' तथा 'नित्यत्वाभाव' प्रकारक संशय होता है। यह संशय उस 'शब्दस्वरूप असाधारण धर्म' के ज्ञान से जन्य होता है। इसलिये इस 'संशय' को असाधारणधर्म-ज्ञान जन्य संशय कहा गया है।

अब विप्रत्ति-वाक्य-ज्ञान जन्य संशय तब होता है जब एक ही पदार्थ के विषय में विरुद्ध मत सामने आते हैं। जैसे- मीमांसक लोग 'प्रमात्व' को स्वतोग्राह्य कहते हैं और नैयायिक लोग 'प्रमात्व' को परतोग्राह्य बताते हैं। दोनों प्रकार के मतों को सुनकर पुरुष को 'प्रमात्वं स्वतोग्राह्यं परतो वा ग्राह्यम्'-इस प्रकार का जो संशय होता है, उसे 'विप्रतिपत्तिवाक्य-ज्ञानजन्य संशय' कहते हैं। यह विप्रतिपत्तिजन्य संशय ही 'कथा' (विचार) का प्रवर्तक होता है।

मानव जीवन के स्वरूप और लक्ष्य के सम्बन्ध में दो विचारधारायें देखने को मिलती हैं पहला- मनुष्य जीवन सीमित है अतः मानव जीवन का लक्ष्य मोक्ष प्राप्ति होना चाहिये भौतिक वस्तुओं के पीछे भागना व्यर्थ है। सांसारिक वस्तुओं से dittachment होना चाहिये। जबकि दूसरी विचारधारा उपभोगवादी दृष्टिकोण पर आधारित है। इसमें व्यक्ति "ऋणं कृत्वा घृतं पिबेत्" के अनुसार आजीवन भौतिक वस्तुओं की आधिकाधिक प्राप्ति के लिये ही प्रयत्न करता रहता है, किन्तु आधिकाधिक मनुष्य संशय की अवस्था में रहते हुए कार्य करते हैं। वे समयानुसार आध्यात्मिक चिन्तन, आराधना, धार्मिक कार्य और समयानुसार धनार्जन भी करते हैं। अतः सामान्य जीवन में दोनों विचारधाराओं का अपूर्व समन्वय है।

**तन्नानुपलब्धेऽर्थे न निर्णीते प्रवर्तते।**
**किन्तु संशयिते न्यायः तदङ्गं तेन संशयः।।**[14]

इस प्रकार जयन्तभट्ट के शब्दों में न्यायशास्त्र न तो अनुपलब्ध अर्थ के विषय में प्रवृत्त होता है और न ही असंदिग्ध अर्थ के विषय में, अपितु संशयित अर्थ के विषय में ही प्रवृत्त होता है, इसलिये संशय न्यायशास्त्र का अंग है।

**संदर्भः—**


1. न्याय भाष्य 1/1/1
2. न्यायमञ्जरी पृ. 24
3. वैशेषिक दर्शनम् 2/2/17
4. वही, 2/2/18
5. वही, 2/2/19
6. वही, 2/2/20
7. तर्कसंग्रह पृ. 108
8. तर्कभाषा पृ. 570
9. नव्यन्याय भाषा प्रदीप, पृ. 132
10. वहीं
11. नव्यन्यायभाषा प्रदीप, पृ. 134
12. सर्वदर्शन संग्रह, पृ. 393
13. न्या.सूत्र 1.1.23
14. न्यायमञ्जरी, पृ. 29

# वैशेषिकदर्शने संशयस्वरूपम्

**गौतमदेवी**

"'ऋते ज्ञानान्न मुक्तिः' इति श्रुतिवचनात् ज्ञायते यत् ज्ञानादेव मुक्तिः सम्भवति, तत्र कस्य ज्ञानमिति जिज्ञासायां दार्शनिकैः स्वसिद्धान्तनुसारं तत्स्वरूपं विचारितम्। पदार्थतत्त्वज्ञानादेव मुक्तिः सम्भवति न्यायमते– "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः।"[1]

षोडशपदार्थेषु तृतीयपदार्थः संशयो वर्तते संशयमिति अर्थे न्यायस्य प्रवृत्तिदर्शनात् संशयस्य पृथक् निवर्चनं सूत्रकारैः कृतं तथा च सूत्रं– "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय"[2] इति।

वैशेषिकास्तु स्मृतिरनुभवभेदेन बुद्धेः द्वैविध्यं स्वीकुर्वन्ति। अनुभवश्च यथार्थायथार्थभेदेन द्विविधः, अयथार्थानुभवस्तु संशय-विपर्यय-तर्कभेदात् त्रिप्रकारको भवति। भाष्यकारैस्तु "तत्राविद्या चतुर्विधा संशयविपर्ययान-ध्यवसायस्वप्नलक्षणम्"[3] इति। अविद्यायाः चातुर्विध्यं स्वीकृतम्। अत्र संशयस्य किं स्वरूपमिति जिज्ञासायां प्रशस्तपादाचार्यैः इत्थमुच्यते– "संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणाद-धर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशयः"[4] इति। लक्षणस्य अभिप्रायम् इत्थम्–प्रतिपादितं न्यायकन्दलीकारः "प्रसिद्धाः पूर्वं प्रतीता अनेकविशेषा असाधारणधर्मवक्रकोटरादयः शिरःपाण्यादयश्च ययोः स्थाणुपुरुषयोस्तयोः

---

1. न्या.द.-1
2. न्या.द.-23
3. प्र. पा. भा.–पृ.-137
4. प्र. पा. भा.–पृ.-140

सादृश्यमात्रस्य साधारणधर्ममात्रस्य क्वचिदेकत्र धर्मिणि दर्शनादुभयोः स्थाणुपुरुषयोर्विशेषाणां वक्रकोटरादीनां शिरःपाण्यादीनां च पूर्वं प्रतीतानां स्मरणादधर्माच्च किंस्विदिति उभयालम्बी विमर्शः संशयः। किं स्थाणुः? किं वा पुरुषः? इति अनवस्थितोभयरूपेणोभयविशेषसंस्पर्शी विमर्शो विरुद्धार्थावमर्शो ज्ञानविशेषः संशयः।"[1]

संशयलक्षणे मात्रपदस्वीकारे सति विशेषागम अनुपलब्धो भवति। दर्शनशब्दः उपलब्धिवचनो न प्रत्यक्षप्रतीतिवचनो अनुमेयस्यापि सामान्यस्य संशयस्य कारणत्वात् सादृश्यमात्रदर्शनात् इति भाष्यकारैः यत् प्रतिपादितं तत्र सादृश्यपदं साधारणधर्ममात्रबोधकं न तु अनेकार्थः समवेतसादृश्यं ग्राह्यम्। वस्तुतः अनवधारणात्मकं ज्ञानं संशयमिति। संशयलक्षणं पर्यवसितं भवति। अनवधारणज्ञानं संशयमिति मतं स्वीकृत्य कन्दलीकारैः इत्थमुच्यते–"यदयं प्रतिपत्तोभयसाधारणं धर्मं क्वचिदेकत्र धर्मिण्युपलभते, कुतश्चिन्निमित्तात् तस्य धर्मिणो विशेषं नोपलभते, पूर्वप्रतीतयोः स्मरति विरुद्धविशेषयोः, न चोभयोरेकत्र सम्भावयति सद्भावम्, विरुद्धत्वात्। नाप्यभावं तदविनाभूतस्य साधारणधर्मस्य दर्शनात्। तदास्य साधारणधर्मविषयत्वेनावधारिते धर्मिणि विशेषविषयत्वेनानवधारणात्मकः प्रत्ययः संशयो भवति।"[2]

स च संशयो द्विविधः अन्तर्बहिर्भेदात् उक्तं च भाष्यकारैः– अन्तस्तावत् आदेशिकस्य सम्यङ्मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति किन्तु सम्यङ्मिथ्या वेति।

बहिर्द्विविधः–प्रत्यक्षविषये चाप्रत्यक्षविषये च। तत्राप्रत्यक्षविषये तावत्–साधारणलिङ्गदर्शनादुभयविशेषाऽनुस्मरणादधर्माच्च संशयो भवति। यथाऽटव्यां विषाणमात्रदर्शनाद् गौर्गव्यो वेति। प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्व-तामात्रसादृश्यदर्शनाद् वक्रादिविशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषान-भिव्यक्तावुभयविशेषानुस्मरणादुभयत्राकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किं

1. न्या.क.–पृ.–419
2. न्या.क.–पृ.–420

नु खल्वयं स्थाणुः स्यात्पुरुषो"[1] वेति।

अन्तस्तावत् "आदेशिको ज्योतिर्वित्, तेनैकदा किञ्चिद् ग्रहसञ्चारादिनिमित्तमुपलभ्यादिष्टं किञ्चिदिष्टमनिष्टं वात्राभूद्वर्त्तते भविष्यति चेति। तत् तथैव तदा संवृत्तम्। अन्यदादिष्टं तद्वितथमभूत्। पुनरिदानीं तस्योत्पन्नं तथाभूतमेव निमित्तं दृष्ट्वादिशतोऽन्तः स्वज्ञाने संशयो भवति यदेतन्मम नैमित्तिकं ज्ञानमभूत् तत्किं सत्यमसत्यं वेति। बहिर्द्विविधः– प्रत्यक्षविषये अप्रत्यक्षविषये च। तत्र तयोर्मध्येऽप्रत्यक्षविषये तावत् साधारणलिङ्गदर्शनादुभयविशेषानुस्मरणादधर्माच्च संशयो भवति। यथाऽटव्यां विषाणमात्रदर्शनाद् गौर्गवयो भवति। वाटान्तरितस्य पिण्डस्याप्रत्यक्षस्य सामान्येन विषाणमात्रदर्शनानुमितस्य संशयविषयाणत्वादप्रत्यक्षविषयोऽयं संशयः।

प्रत्यक्षविषयेऽपि कथयति–स्थाणुपुरुषयोरित्यादिना। स्थाणुपुरुषयोः सम्बन्धिनी योर्ध्वता तन्मात्रस्य प्रत्यक्षविषये पुरोवर्तिनि धर्मिणि दर्शनात्। वक्रादिविशेषानुपलब्धित इत्यादिपदेन शिरःपाण्यादिपरिग्रहः। वक्रकोटरादेः। स्थाणुधर्मस्य शिरःपाण्यादेर्विशेषस्य पुरुषधर्मस्यानुपलब्धितः। स्थाणुत्वादि-सामान्यविशेषानभिव्यक्तावित्यादिपदेन पुरुषत्वावरोधः। वक्रकोटरादयः स्थाणुत्वाभिव्यक्तिहेतवः, शिरःपाण्यादयः पुरुषत्वाभिव्यक्तिहेतवः, तेषामनुपलम्भात्। स्थाणुत्वपुरुषत्वयोरनभिव्यक्तौ सत्यामुभयोः स्थाणुपुरुषयोः प्रत्येकमुपलब्धानां विशेषाणामनुस्मरणादुभयत्राकृष्यमाणस्य उभयत्र स्थाणौ पुरुषे वाकृष्यमाणस्य प्रतिपत्तुर्यदोर्ध्वतादर्शनात् स्थाणुरयमिति निश्चेतुमिच्छति, तदा पुरुषविशेषानुस्मरणेन पुरुषे समाकृष्यत इत्युभयत्राकृष्यमाणः, अत एवास्य प्रत्ययो दोलायते, नैकत्र नियमेनावतिष्ठते। साधर्म्यमनवस्थितरूपत्वमेव प्रत्ययस्य दर्शयति– किन्तु खल्वयं स्थाणुः स्यात् पुरुषो वेति।"[2]

---

1. प्र. पा. भा.–पृ.-141-142
2. न्या.क.–पृ.-421-423

# Jayanta's characterization of doubt about validity*

Jaspal Peter Sahota

## 1. Introduction

As well as ordinary doubt about the nature of an object (artha-samshya), illustrated by the familiar example 'Is it a post or is it a person?' (sthþnur vþ purusho vþ), we can also talk about higher-order doubt about whether a cognition is valid or not (pramþnya-samshaya). This paper will examine Jayanta's characterization of the latter notion, based on his discussion of this in the prþmþnya-vþda section of the Nyþya-mąjaŕ[1].

## 2. The possibility of the inquiry

We may initially be sceptical about whether deliberation about the validity of a cognition really is distinct from deliberation about what the object is. Surely, as Shah and Velleman explain, doxastic deliberation is transparent to factual inquiry in the sense that "[the] deliberative question whether to believe that p inevitably gives way to the factual question whether p, because the answer to the latter question will determine the answer to the former."[2] Thus it seems that asking whether the cognition of a post is valid reduces to the question of whether the object is actually a post.

However, if validity (prþmþnyam) is characterized as a real, albeit abstract, property that is separately generated within each valid cognition, in the way that Jayanta suggests when he writes, 'For validity exists and it is real, and not eternal, so it is just an effect, and an effect,

just because it is an effect, cannot arise from itself,"[3] then this offers an alternative light by which to understand deliberation about validity. Specifically, Jayanta's idea is that validity is generated by causal factors over and above the factors of the cognition itself. If the former causal factors can be identified by the deliberator, then we would have an alternative way of moving from the possession of what is a cognitive attitude of indeterminate status to the possession of knowledge. Thus Jayanta writes, "for the ascertainment of validity has two tracks É either [such ascertainment] does not exist or [such ascertainment] depends on causal factors."[4]

It is precisely this suggestion that is disputed by Kumþrila, who states, "It should be understood that the validity of every valid cognition is from itself. For it is impossible for something else to produce [in it] a capacity that is not innately existent."[5] Kumþrila's idea here is that there is nothing over and above formation of the cognition which constitutes formation of its validity, and thus no process of deliberation about the validity of the proposition p separate from deliberation about whether p. Kumþrila's style of argument here has an important affinity with the notion of transparency described above.

Jayanta further explains that the importance of the deliberation about validity lies in its implications for the unseen ends of metaphysical speculation (ad[cme vicaye) rather than for the familiar objects of everyday activity, and that this validity is to be ascertained by reference to other cognitions which are already validated. Jayanta's denial that this would result in an infinite regress is based on the idea that everyday objects are validated through everyday activity, and unseen ends are validated by other validated cognitions, presumably those validated through everyday activity. However, Jayanta's discussion in this section does leave some ambiguity about how precisely the distinction between doubt about validity and doubt *simpliciter* is to be understood. His view can perhaps be

understood further through a consideration of how Jayanta's characterization of doubt differs from that of Kumþrila by the fact of possessing a propositional attitude status sufficient for it to play a role in practical reasoning.

### 3. Doubt and practical reasoning

In our everyday activities, we strive to acquire things motivated by our cognitions of them. However, in some cases, we are mistaken about the true nature of an object, and our actions are frustrated. So any characterization of our epistemic status in different cases needs to allow for this possibility of mistake. One strategy could be to take a disjunctive approach, such that in the cases where our cognitions are in fact valid, the fact of having a cognition of an object (artha-bodhah) provides automatic warrant for that cognition to constitute knowledge, whereas in the cases where our cognitions are in fact invalid, although we have some kind of cognition, this is muddied by a defect (**dosha-kalusham**), so by virtue of that, transmission of warrant fails.

Roughly speaking, this is the strategy of Kumþrila. Jayanta provides a typical formulation of the generic Bhþmmah svatahprþmþnyam doctrine as follows: "as the validity of that [*scil.* testimony] is innate, because it produces cognition of objects, [there is] failure in some cases, created by the entrance of human faults [into testimony]."[6] On this view, the link between apprehension of validity (prþmþnya-nishcayah) and successful action is preserved: the fact that validity has been correctly apprehended enables successful action, and the fact that action can be succeed on the basis of that cognition demonstrates that validity was indeed correctly apprehended.

On this Bhþmmah view, mistaken cognitions occur through a failure to grasp some fault that is present in the cognition, but one way in which Jayanta challenges the Bhþmmah view is by alleging that automatic warrant of valid cognitions would leave no room for this possibility of

mistake. As Jayanta explains, "If we were to ascertain the validity of a cognition just at the moment of origination, then, taking action on the basis of that cognition, we would never be deceived, but we are deceived [in some cases]."[7] Jayanta's point seems to be that failure to apprehend validity should signal that an invalid cognition is invalid. In other words, if there were to exist such a thing as automatic warrant, it would have to be something whose absence could not go unnoticed. Of course, Kumþrila's account in the Shloka-vþrttika does provide a kind of explanation of how the absence of automatic warrant could go unnoticed, but only Jayanta's discussion will be considered in this paper.

The conclusion that Jayanta draws is that "validity [of a cognition] is not ascertained at that time [when the cognition is formed]; we take action on the basis of doubt alone."[8] In other words, even a hypothesis that lacks certainty is sufficient to motivate activity, which may subsequently turn out to be successful or not. However, it may be objected, psychologically speaking, purposeful activity is generally motivated by confident belief, and not by a feeling of doubt about its validity. Of course, Jayanta does not deny that we experience no subjective feeling of doubt. Nevertheless, he says, given that any given cognition may turn out to be valid or invalid, from an objective perspective, or, in the real state of things (vastu-v[ttena), at the initial stage there must always be doubt about its validity. Jayanta writes, "Although not being experienced, with regard to the repeated object, when remembering the invariable concomitance, [doubt] should be postulated logically, because the cause of ascertainment is not present at that time, and because the [causal] aggregate which is the cause of production of doubt is present."[9]

Of the two possibilities, that any given cognition is valid or that it is invalid, in cases of confident belief, our subjective experience only grasps one possibility, *viz.* that it is valid. This directly parallels the case of doubt about

the nature of an object (artha-samshayah), where seeing a common property of a person and a post, such as being upright, without seeing any characteristic that would distinguish one from the other, leads to doubt about which item the object is. Likewise, "the property common to correct and incorrect [cognitions], [which is] being a cognition, certainly manifests itself at that time, like being upright, etc. And no distinguishing characteristic having invariable concomitance with validity appears at that time ä "[10]

## 4. Doubt and error

One important objection raised is that "doubt too at that time [when the cognition originates] is certainly not experienced [in the form] 'Is this silver or is this not silver?' But rather [we] just [directly experience] the cognition 'silver'."[11] That is, when we falsely believe a cognition to be valid, our subjective experience only grasps the (incorrect) idea of validity, and so this case should be subsumed into the category of error, being similar to cases such as perceiving silver where there is actually mother-of-pearl.

However, Jayanta insists not only that falsely believing a cognition to be valid constitutes doubt, but also holds that even cases of subjective error, such as false cognition of silver, constitute doubt from an objective perspective. He writes, "This cognition [of silver], despite only grasping one of the two options [i.e. it only grasps silver, out of the two options, silver and mother-of-pearl], because it lacks the means for ascertaining that [*scil.* its true object], is necessarily just on the side of doubt [rather than error]."[12]

Jayanta provides a truly fascinating example to illustrate his point: "Just as 'The Buddhist monks think that there is water in the well' [is classed as doubt], likewise, 'This is silver', grasping one part at that moment, the phenomenal appearance, objectively just is doubt."[13] Aside

from making a sly joke at the expense of the Buddhists, the power of this example lies in its suggestion that our knowledge of our own first-person mental content is in itself epistemically no more secure that our knowledge of third-person mental content. That is, my possession of a confident belief that p provides no stronger warrant for p than someone else's possession of a confident belief that p possessed by someone else. In both cases, the epistemic security of the belief needs to be founded on the objective evidence that obtains in the world. The example thus hints at a way of thinking about first-person mental experience that does not privilege such experience merely by virtue of its being first-person.

## 5. Conclusion

Based on the above discussion, Jayanta's characterization of doubt about validity can be summarized as follows -

| kāraam | kāryam | anubhūyamāna | Action? |
|---|---|---|---|
| viśeaḥ | artha-niścaya | artha-niścaya | Y |
| prāmāyâvinābhāvī viśeṣaḥ | prāmāya-niścayaḥ | prāmāya-niścayaḥ | Y |
| sādhārao dharmaḥ | saṃśaya | saśayaḥ – in some cases only | Y |
| ūrdhvatā | 'sthāur vā puruṣo vā' | 'sthāur vā puruṣo vā' | Y |
| bhāsvara-rūpatvam | 'rajata vā śuktikā vā' | 'rajatam' iti (ekatara-paka-grāhi) | Y |
| bodha-rūpatvam (=yathārthtara-sādhārao dharmaḥ) | 'prāmāyaṃ vā aprāmāṇyaṃ vā' | 'prāmāyam' iti (ekatara-paka-grāhi) | Y |

*In fine,* Jayanta's use of the term 'doubt' (samshayah) provides a characterization of a doxastic state which is a function of properties external to the mental content of the believer. As Jayanta himself says to conclude the wider section, "Rather, at the moment of arising of cognition, validity cannot be grasped É this is our view. Here, we will denote just the non-grasping of validity, which has the nature of [objective] non-determination, by the word 'doubt'."[14] This provides a uniquely interesting

and insightful conception of the nature of doubt, which is in certain respects more radical than that of other Naiyþyikas.

## 6. Bibliography

NM *Nyþyamąjaṙ of Jayantabhamma with lippaGi É Nyþyasaurabha by the Editor.* Ed. K.S. Varadþcþrya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983: Vol.1

Kataoka, K. (2011) *Kumarila on Truth, Omniscience, and Killing, Part 1: A Critical Edition of Mimamsa-Slokavarttika ad 1.1.2 (Codanasutra). Part 2: An Annotated Translation of Mimamsa-Slokavarttika ad 1.1.2 (Codanasutra),* Verlag der Osterreichischen Akademie der Wissenschaften, 97 + 627 pages: Part 2

Shah, N. and J. David Velleman (2005) 'Doxastic Deliberation' in *The Philosophical Review,* Vol.114 No.4 (Oct. 2005), 497-534

---

* I would like to thank Prof. Kei Kataoka (Kyushu University) for guidance on this topic and for comments on an earlier version of this paper. I have also benefited from the use of Prof. Kataoka's c ritical edition of this section, from which all quotes are taken (although page and line references are to the equivalent portions in the Mysore edition). I would like to thank Prof. Jonardon Ganeri (University of Sussex) for comments on an earlier version of this paper.

1 See NM 439-440 on prþmþnya-samshayah; see NM 419-451 for the entire prþmþnya-vþdah discussion.

2 See Shah, N. and J. David Velleman (2005) 499

3 NM 442 lines 15-16: asti hi prþmþnyam, vastu ca tat, na ca nityam iti kþryam eva tat kþryam ca kþryatvþd eva na svato bhavitum arhatti.

4 NM 444 lines 17-18 : prþmþGya-nīcayasya hi dvaỳ gati% É nþstitvam vþ kþraGþpekcitþ vþ.

5 See ēloka-vþrttika 2.47: svata% sarva-prampþGþnaC prþmþGyam iti gamyatþm | na hi svato 'sat¯akti% kartum anyena pþryate | | In this instance, I have taken the translation from Kataoka, K. (2011) 246-2496 NM 434 lines 10-12: artha-bodha-janakatvþt tasya naisargike

prþmþGye sati puruca-docþnupraveīa-k[ta% kvacid viplava%.

7 NM 439 lines 6-7: yadi prasava-samaya eva .jþnasya prþmþGyaC nīcinuyþma tarhi tata% pravartamþnþ na kvacid api vipralabhyemahi, vipralabhyþmahe tu.

8 NM 439 line 8: tena manyþmahe É na nīcitaC tadþ prþmþGyam, saCayþd eva vyavaharþma iti.

9 NM 439 lines 7-10: ananubhÕyamþno 'py nyþyþd abhyaste vicaye 'vinþbhþva-smaraGavat parikalpyeta, nīcaya-nimittasya tadþnm avidyamþnatvþt, saCaya-janana-hetō ca sþmagryþ% sannihitatvþt.

10 NM 440 lines 10-12: tathþ hi yathþrthtara-sþdhþraGo dharmo bodha-rÕpatvam Õrdhvatvþdivat tadþ prakþata eva. na ca prþmþGyþvinþbhþv vīeca% kācana tadþnm avabhþti.

11 NM 439 lines 10-11: nanu saCayo 'pi tadþ nþnubhÕyata eva ėkim idaC rajatam uta na rajatamë iti. api tu rajatam ity eva pratti%.

12 NM 439 lines 14-15: ekatara-pakca-grþhy apy ayaC pratyaya% tan-niīcaypþya-virahþt saCīaya-komi-patita eva balþd bhavati.

13 NM 439 line 15 É 440 line 2: yathþ asti kÕpe jalam iti bhikcavo manyante evaC rajatam idam iti eka-pakca-grþhy api tadþnC pratibhþsa% vastu-v[ttena saCīaya eva

14 NM 442 lines 7-8: prþmþGyaC tu .jþntpatti-kþle g[htum āakyam iti na% pakca%. prþmþGyþgrahaGam evþnadhyavasþya-svabhþvaC saCīaya-īabdenha vyapadekcyþma%

# द्वितीयः

## मूलग्रन्थस्तबकः

# न्यायवार्त्तिके संशयः

**प्रमेयानन्तरं प्राप्तिः संशयस्य स्थानवतो लक्षणवचनमिति या प्रमेयानन्तरं क्रमप्राप्तिः साऽभिधीयते॥**

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।

समानानेकधर्मोपपत्तेरिति सूत्रम्। तत्र समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्वि-प्रतिपत्तेश्च त्रिविध एव संशय इतरपदविशेषणाद् भवतीति सूत्रार्थः। तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशयः समानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं नावधारयति यः स संशय इत्युच्यते। प्रत्ययोऽनवधारणात्मकश्चेति व्याहतं? प्रत्ययस्यैतत् प्रत्ययत्वं यद्विषयावधारणात्मकत्वं, न चेदयं विषयस्वरूपमवधारयति प्रत्ययत्वं तर्हि व्याहतं भवति। न। स्वरूपप्रत्यायनात् स्वरूपमस्य प्रतीयते, न पुनरयं विषयस्वरूपमवधारयति अतश्च संशयः प्रतीयत इति प्रत्यय इति उच्यते।

समानशब्दः साधारणार्थः समानस्य धर्मस्योपपत्तेरिति साधारणस्येति यावत्। किं पुनरत्र साधारणं किं गुण आहो सामान्यमिति? यदि गुणः स न साधारणः। कस्मात्? एकद्रव्यवृत्तित्वात् परिमाणस्य, एकद्रव्यवृत्ति परिमाणं तत् कथं साधारणं भविष्यतीति। सामान्यमपि न युक्तम् द्रव्यावृत्तित्वात् न ह्यूर्ध्वत्वं द्रव्ये वर्त्तते, किन्तु गुणे परिमाणे। न ह्यूर्ध्वत्वं परिमाणं वर्त्तमानं सामान्यं द्रव्ये संशयं कर्तुमुत्सहते। कस्मात्? गुणस्यावधारितत्वात् यद्वृत्ति सामान्यं सोर्थोऽवधारित इति। न। साधारणार्थस्यान्यथा व्याख्यानात्। न ब्रूमो गुणः साधारण इति। नापि सामान्यमपि तु सादृश्यार्थः यावहमर्थौ पूर्वमद्राक्षं तयोर्थो धर्मः ऊर्ध्वत्वलक्षणो वर्तते तेन धर्मेण सदृशोऽयं धर्म उपलभ्यत इति। तस्योपपत्तिरध्यवसायः। यदुक्तं भवति सदृशस्य धर्मस्योपलब्धेस्तदुक्तं भवति समानस्य धर्मस्योपपत्तेरिति। कस्मात् पुनरेवं नोच्यते

समानधर्मोपलब्धेरिति? अनुक्तमपि यस्माद् गम्यते गम्यमानस्याभिधानं व्यर्थम्। केन पुनरेतद् गम्यते? इति विशेषापेक्ष इति वचनेन। कथं? विशेषस्यापेक्षा आकाङ्क्षा सा चानुपलभ्यमानविशेषे युक्ता। यदि चायं विशेषं न पश्यति विशेषानुपलब्धेर्गम्यत एव सामान्यं पश्यतीति। अथ पुनरयं न सामान्यं न विशेषं पश्येत्तदा विशेषापेक्ष इति व्यर्थं वचनं स्यात् एतेन सामर्थ्येन गम्यते सामान्यमुपलभत इति। अथ वोपलब्धिपर्याय एवोपपत्तिशब्द इति। उपपत्तिः प्रमाणगम्यता सा चोपलब्धिः। यः पुनरनुपलभ्यमानसद्भावो धर्मः सोऽविद्यमानवद्भवतीति। का पुनर्विद्यमानस्याविद्यमानेन समानता? प्रमाणानालम्बनत्वम्। अविद्यमानमपि प्रमाणस्यालम्बनं स्वतन्त्रं न भवति तदप्यनुपलब्धिलक्षणं प्राप्तमिति। विषयशब्देन वा विषयिणं प्रत्याह—समानधर्मोपपत्तिशब्देन वा विषयी प्रत्ययो विधीयते। लौकिकं वा न्यायमनेन वाक्येनावरुणद्धीति यथा लोके वक्तारो भवन्ति धूमेनाग्निरनुमीयत इति। न च वाक्ये दर्शनशब्दः श्रूयते। अर्थप्रत्यायकत्वात् वाक्ये दर्शनशब्दमनुजानाति धूमं दृष्ट्वाऽथाग्निरनुमीयते इति।

अव्यवच्छेदहेतोरिति वक्तव्यम्—यदिदं समानधर्मोपपत्तेरिति पदमेतस्मिन्नव्यवच्छेदहेतोः समानस्य धर्मस्योपपत्तेरिति वक्तव्यम्। न हि केवला समानधर्मोपपत्तिः संशयकारणमन्यथा कृतकत्वादिनाऽपि संशयः स्यात् समानं हि कृतकत्वं सर्वानित्यानामिति, व्यवच्छेदहेतुत्वान्न भवति। न। समानार्थापरिज्ञानात्। व्यवच्छेदहेतुश्च भवति समानश्च धर्म इति न युज्यते, व्यवच्छेदहेतुर्नाम विवक्षिततज्जातीयवृत्तित्वे सति यो विजातीयावृत्तिः स व्यवच्छेदहेतुः तस्य च समानार्थता नास्ति। समानो हि धर्मो यो विवक्षिततज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिः। तस्मादव्यवच्छेदहेतोरिति न वक्तव्यम्।

सोऽयं साधारणो धर्म उपलभ्यमानः संशयहेतुः। किं केवल इति? न केवलः। किं तर्हि? उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च। यदि चोपलब्ध्यव्यवस्थातश्च। यदि चोपलब्ध्यनुपलब्धी न व्यवस्थिते भवत इति। किमेतावन्मात्रं साधनमिति? नेत्युच्यते। यदि विशेषाकाङ्क्षा भवति समानधर्ममुपलभते। उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया वाऽनिदन्तया वा। विशेषाकाङ्क्षायां च सत्यामर्थसन्देहो भवतीति।

किमिदं समस्तं कारणमसमस्तं वा? समस्तमिति ब्रूमः। यदि समानधर्मोपपत्तेरिति केवलमुच्येत उपलब्धविशेषस्यापि सामान्यत उपलब्धिरस्तीति तस्याऽपि संशयः स्यादिति। यदि पुनरुपलब्ध्यनुपलब्ध्य-व्यवस्थातश्च संशय इत्येतावदुच्येत अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्य-नुपलब्ध्यव्यवस्थाऽस्तीति संशयः स्यात् इति। विशेषापेक्ष इत्येतावति चोच्यमाने-ऽनुपलब्धसामान्यस्यापि क्वचिद्विशेषस्मृतिरस्तीति संशयः स्यात्। एवं समान-धर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति पदद्वयेऽपि नौयानप्रेङ्खादिगतस्य न भवति संशयः। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति पदद्वये-ऽभिधीयमानेऽत्यन्तानुपलब्धेऽर्थे संशयः स्यात्। समानधर्मोपपत्तेर्विशेषापेक्ष इति चोच्यमाने सामान्यधर्मदर्शने सत्यपि विशेषाकाङ्क्षायां च सत्यामुपलब्ध्यनुपलब्ध्योर्व्यवस्थानान्न भवति संशयः। एवं च यदाऽयं द्रष्टा दृष्टपूर्वं सामान्यविशेषवन्तमर्थमुपलभते तत्र चोपलब्ध्यनुपलब्धी व्यवस्थिते भवतः। सोऽयं द्रष्टा तस्मात् स्थानात् यदाऽपैति, ततोऽस्यापगमाद्विषय-विप्रकर्षान्निमित्तादल्पविषया विशेषा नाभासन्ते, महाविषयं सामान्यमवभासते, उपलब्ध्यनुपलब्धी पुनर्व्यवतिष्ठेते, विशेषार्थस्मृतिश्च नास्ति, न च सन्दिह्यते तस्मादेकद्विपदपर्युदासेन समस्तं लक्षणमुच्यत इति। समानधर्मोपपत्तेरुपलब्ध्यनु-पलब्ध्यव्यवस्थातश्च विशेषापेक्ष इति चैकपदपर्युदासः कृतः। समानधर्मोपपत्तेरुप-लब्ध्यनुपलब्ध्यव्यवस्थातश्च समानधर्मोपपत्तेर्विशेषापेक्ष इति च उपलब्ध्यनु-पलब्ध्यव्यवस्थातो विशेषापेक्ष इति च द्विपदपर्युदासः कृतः समस्तपदपरिग्रहेण। यस्मात् समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्षः संशय इत्याह। तेन ज्ञापयति समस्तमेतल्लक्षणमिति। विमर्ष इति नानार्थविमर्षणं विमर्षः। उभावर्थौ मृशतीव संशीतिः संशय इति भावसाधनम्। करणसाधनं वा संशेतेऽनेनात्मा सुप्त इव भवति। क उपमार्थः? अर्थानवधारणमुपमानार्थः, एतेनानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति व्याख्यातम्। कोऽतिदेशार्थः यथाऽऽद्यपक्षे त्रिपदपरिग्रहेण एकद्विपदपर्युदासः कृतः तथानन्तरयोरपि द्रष्टव्यमिति।

अनेकधर्मोपपत्तेः संशय इति–अनेकस्यानेकश्च धर्म इति केचित्–अनेकस्य धर्मोऽनेकधर्मः अनेकस्य द्रव्यगुणकर्मलक्षणस्य संयोगजत्वं धर्मः अनेकश्च धर्मः संयोगजत्वनिर्गुणत्वनिष्क्रियत्वक्षणिकत्वानि शब्दे, तदेवमनेकधर्मोपपत्तेः संशय इति केचित्। तदयुक्तम्। समानधर्मोपपत्तेरित्यत्र चरितार्थत्वात्। समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिः यश्चानेक एकवृत्तिः

स लभ्यत इति चरितार्थत्वात् न पुनरनेकधर्माभिधानेन प्रयोजनमस्तीति। अथानेकधर्मशब्दस्य कोऽर्थः? असाधारणो धर्मः। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते? समानासमानजातीयविशेषकत्वात् समानजातीयमसमानजातीयं चानेकं तस्माद्विशेषो-विशेषको धर्मः अनेकस्माद्विशेषोऽनेकधर्म इति तस्य चानेकस्य धर्मो यथास्वं सोऽयमनेकधर्म इति। एकानेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्मः यत एष प्रत्ययो भवतीदमेक-मिदमनेकमिति। तत्रैकप्रत्ययहेतुरभेदः अनेकप्रत्ययहेतुर्वा धर्मो विशेषः यथा शब्दस्य विभागजत्वम्। सामान्यविशेषसमवायेभ्यः शब्दस्य सदादिना विशेषेण निर्भक्तस्य तस्मिंस्तु द्रव्यं गुणः कर्म वेति विभागजत्वात् संशयः। न हि किञ्चित् द्रव्यगुणकर्मणामन्यतमं विभागाज्जायमानं दृष्टं सर्वत्रासम्भवात् विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति। ननु च विभागजो विभागो विद्यते गुणः। सत्यम् अनभ्युपगतविभागजविभागस्यैतदेवं भवति। यः पुनरभ्युपगतविभागजविभागः तस्यायं निर्णयहेतुः गुणः शब्दो विभागजत्वात् विभागजविभागवदिति। अस्तु वा तस्यापि विभागजविभागासमवायिकारणकत्वात् विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति। तदेवं विभागजत्वं विभागजविभागासमवायिकारणत्वं नर्ते शब्दाद्भवतीति सर्वतो व्यावृत्तः संशयहेतुः। तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति। समानधर्मोपयोगाद्वाऽसमानानेकधर्मो भवति। यद्वा द्वयस्यापि संशयकारणत्वेनोपनीतस्य समानधर्मस्यासमानस्य च समानस्य धर्मस्योपयोगादनुपयुक्तोऽसमानः सोऽनेकशब्दस्य विषयविशेष इति।

कस्मात् पुनरेवमेव नोच्यते समानासमानधर्मोपपत्तेरिति? नैवं शक्यमभिधातुम् अनेकस्माद्व्यावृत्तो धर्म इति अयं विग्रहो न लभ्यते लाघवं वा प्रयोजनमेकाक्षरापचयात् लाघवं प्रयोजनमाश्रित्यैवमभिधानं वा। यद्यनेकधर्मार्थोऽसाधारणार्थः असाधारणश्च धर्मः संशयकारणमिति, नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादित्ययमप्यसाधारणत्वात् संशयहेतुः प्राप्तः। नैष दोषः यथैव साधारणो धर्मः संशयहेतुरिति नान्वयिनः साधारणत्वे सति संशयहेतुत्वं भवति अन्वयव्यभिचारात्। एवं व्यतिरेकिणोऽपि सत्यसाधारणत्वे विपर्ययसम्बन्धस्याव्यभिचाराद्धेतुभाव इति। तस्मान्नैकवृत्तित्वमनेकवृत्तित्वं संशयकारणत्वे निर्णयहेतुत्वे वा हेतुः। किं तर्हि? साधारणासाधारणत्वे सति व्यभिचाराव्यभिचारौ संशयनिर्णयहेतू। यो

व्यभिचारी स संशयहेतुः योऽव्यभिचारी स निर्णयहेतुरिति। यदि तर्ह्युभयोर्व्यभिचारित्वात् संशयहेतुत्वं ननु समानधर्मोपपत्तेरित्यनेनैव गतमेतत् गतार्थत्वात् न॰ संशयहेतुत्वेन पृथक् उपादेयमिति। सत्यम्। न व्यभिचारितामन्तरेणान्यत् संशयकारणमपि तु व्यभिचारितायां सत्यां विधीयमानव्यभिचारः प्रतिषिध्यमानव्यभिचारश्चेति भेदः समानधर्मोपपत्तेरित्यनेन विधीयमानव्यभिचार उपदिश्यते विभागजत्वादित्यनेन प्रतिषिध्यमानव्यभिचार इति। एतावता पृथगभिधानम्।

नञः पर्युदासविषयत्वादव्यभिचारिधर्मद्वयोपनिपातोऽनेकधर्म इति केचित्- एके त्वनेकधर्म इत्यन्यथा व्याचक्षते एकस्मादन्योऽनेकधर्म इति। एवं च विरुद्धाव्यभिचारिधर्मद्वयोपनिपातो लभ्यते यं प्रति तर्कमाहुः स च संशयहेतुः यथा श्रावणत्वकृतकत्वे शब्दस्येति। तदयुक्तम्। असम्भवात्। न ह्यव्यभिचारिणौ विरुद्धावेकस्मिन्नर्थे धर्मा सम्भवतः वस्तुनो द्वैरूप्यासम्भवात् यद्युभावच्यभिचारिणौ स्याताम् एकं वस्तु द्व्यात्मकं भवेत्। न चैतदस्ति तस्मान्नोभावव्यभिचारिणाविति। न चायं प्रयोगो युक्तः। कथमिति? यदि तावदेवं प्रयुङ्क्ते यथा प्राक्तनो हेतुः तथाऽयमपीति। प्रसिद्धेन व्यपदेशा भवन्तीति सिद्धं पूर्वस्य हेतुत्वम्। विरुद्धार्थप्रतिपत्तिबाधितत्वादुत्तरस्यानभिधानम्। अथैवं क्रियते यथेदं द्वितीयमनुमानं न भवति तथा प्राक्तनमपीति। एवमपि प्रतिपन्नद्वितीयानुमानस्यासाधकत्वम्। अथ विरुद्धधर्मावेकत्र सम्भवत इति सम्भवान्न विरुद्धौ। कश्च विरुद्धार्थः किं सहासम्भवः आहोविरुद्धार्थसाधकत्वम् अथ स्वरूपमिति। यदि सहासम्भवः स नास्ति दर्शनात्। अथ विरुद्धार्थसाधकत्वं विरोधः तदपि न युक्तम् वस्तुनो द्व्यात्मकत्वासम्भवात्। यदि विरुद्धार्थसाधककत्वमनयोधर्मयोर्भवेत् एकं वस्तु द्व्यात्मकमापद्येत। अथ स्वरूपमनयोर्विरुद्धमिति न किञ्चिद्बाधितं भवति यस्मात् कृतकत्वं न श्रावणत्वं श्रावणत्वं वा न कृतकत्वं तस्मान्न संशय इति। उपेत्य वा विरोधं यदि विरुद्धाभ्यां कृतकत्वश्रावणत्वाभ्यां शब्दे संशयः क्रियते स विशेषादर्शनादुपजातः कस्य दर्शनान्निवर्तते। न हि विशेषदर्शने सति विशेषाकाङ्क्षा भवति यथोपलब्धसामान्यस्य विशेषाकाङ्क्षा भवति। प्रत्यक्षतो निवर्तिष्यत इति चेत्। न। योऽनुमानाभ्यां सन्निपतिताभ्यामर्थे संशयः स प्रत्यक्षान्निवर्तिष्यत इति। तन्न युक्तम्। प्रत्यक्षाविषयत्वात्–नायमर्थः प्रत्यक्षस्य विषय इति किं शब्दो नित्योऽनित्यो वेति। आगमान्निवर्तिष्यत इति चेत्। न। आगमस्य च

विचार्यमाणत्वात्—आगम एवायं विचार्यते किं शब्दो नित्योऽथानित्य इति। न चायं प्रत्यक्षविषयो नागमविषयः अनुमानोपमानाभ्यां च नायं परिच्छेत्तुं शक्यते सोऽयमनिवर्त्यः संशयः प्राप्तः। भवतु किं नो बाध्यते? कथं न बाध्यते। यदा वस्त्वन्तरपरिच्छेदकमनुमानं न भवति यथाऽनित्या बुद्धिः कृतकत्वादिति इदं खलु कृतकत्वं शब्दे दृष्टं स चानवधारितस्वभावो नित्योऽनित्य इति। तत्र चोपलभ्यमानं कृतकत्वमन्यत्र बुद्ध्यादौ संशयहेतुरिति सर्वमनुमानमनित्यत्वसाधकं न स्यात्। सर्वं चानुमानमयं न्यायो बाधत इति। यश्च न्यायोनुमानमूलमुच्छिनत्ति नासौ न्यायविदा युक्तोऽभिधातुम्। नित्यासम्भवात् नायमस्मान्न्यायो बाधते यस्य नित्यं किञ्चिदस्ति तस्य विरुद्धाव्यभिचारी भवति। अस्माकं तु पक्षे नित्यं किञ्चिन्नाऽस्तीति। न। बाधापरिज्ञानात्–न भवता बाधविषयोऽवलोकितः किन्तु नित्यमस्माकं नास्तीति एतावन्मात्रमवलोक्य परपक्षे दोषो ऽभिधीयते इति भवतामपि पक्षे विरुद्धाव्यभिचारी कृतावकाशः। कथम्? सप्रतिघं विज्ञानं सत्त्वाद्रूपवदित्येकः, अप्रतिघं विज्ञानं नीरूपत्वाद्वेदनावदित्यपरः। तदेवमव्यभिचारिधर्मद्वयोपनिपातान्न सप्रतिघं नाप्रतिघं सिद्ध्येत् तस्मादपन्यायोऽयं विरुद्धयोश्च धर्मयोः सन्निपाताच्छब्दे संशय इति। धर्मयोः सातत्यादभिलापानुपपत्तिः नायमतद्धर्मा कदाचिदपि शब्द उपलभ्यते सततं तु तद्धर्मैव भवति श्रावणः कृतकश्चेति अभिलापो न स्यात् नित्योऽनित्यो वेति। न हि कदाचिदयं द्रष्टा एकस्मिन् वस्तुनि स्थाणुपुरुषधर्मावुपलभमानः शक्नुयाद्वक्तुं स्थाणुर्वा पुरुषो वेति। नैवं भविष्यतीति। व्याहतमुच्यते। ननु च भवताभिधीयते नित्य इति मयाप्यभिधीयते अनित्य इति कथं नाभिलप्यते सोऽयं विरुद्धाव्यभिचारीन्यायो विचार्यमाणः सर्वथाऽनुमानं बाधत इति अलमनेन। अथ कृतकत्वश्रावणत्वे सहिते सम्भूय हेतू भवत इति? तथापि कृतकत्वश्रावणत्वे सहिते न विभागजत्वादन्यत्रासम्भवाच्च संशयहेतू भवतः सोयमस्माद्भिद्यते यथैव विभागजत्वमन्यावृत्तित्वादसाधारणं शब्दे संशयं करोति तथा कृतकत्वश्रावणत्वे अपि शब्दवृत्तित्वादन्यत्रासम्भवाच्च संशयहेतू भवतः सोऽयसाधारण एव न धर्मान्तरमतः तद्ग्रहणेनैवायं सङ्गृहीत इति तस्मादेकस्मादन्यो धर्मोऽनेकधर्म इति न वक्तव्यमिति। यदा पुनरेवम्भूतौ धर्मावेकस्य वस्तुनो भवतः तदोपलब्धा तस्य वस्तुनः किं प्रतिपत्तव्यमिति तदा तयोरेव धर्मयोः सामर्थ्याधिगतौ यत्नः कर्तव्यः नोभावेतौ साधने, कतरोऽत्र साधनं कतरश्च न साधनमिति सामार्थ्याधिगमे यत्नः करणीय

इति। यत्नश्च क्रियमाणोऽनित्यत्वसाधनेष्वेवावतिष्ठत इति कुतः? नित्यत्वस्य प्रमाणबाधितत्वात् तच्चोपरिष्टाद्वक्ष्यामः। तदेवं व्यवस्थितमेतत् अनेकधर्मोपपत्तेरसाधारणात् धर्मात् संशय इति।

विप्रतिपत्तेः संशय इति व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थप्रवादविषयत्वमुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति। तत्र समानोऽनेकश्च धर्मो ज्ञेयस्थ उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे इति भाष्यम्। तत्रोपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भवतीति चर्च्चितमेतत्। समानोऽनेकश्च धर्मो ज्ञेयस्थ इत्येतदपि न बुद्ध्यामहे। किमत्र धर्मः संशयकारणमथ ज्ञानमिति। न धर्मः संशयकारणमित्यनेकधा समर्थितम्। समानानेकधर्मज्ञानं तु संशय कारणं तच्च ज्ञातरि वर्तत इति नास्ति भेदः। समानानेकधर्मयोस्तु पृथगभिधाने उक्तं प्रयोजनम् विधीयमानप्रतिषिध्यमानधर्मभेदादिति। विप्रतिपत्तेरित्ययं वक्तृगतः संशयहेतुः। केऽत्र सम्यक्प्रतिपन्नाः के मिथ्येति श्रोतुः सन्देहो भवति एतावता भेदेन पृथगभिधानम्। समानधर्मः सर्व एवायमिति चेत् समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति सर्व एवायं समानधर्मएवा-ऽभिधीयते तस्माद्वैयर्थ्यात् पृथगनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च इति न प्रयोजनमस्ति। अत एवं कर्तव्यम्। समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति। न। सूत्रार्थापरिज्ञानात् सूत्रार्थमपरिज्ञायैवैतच्चोद्यते। यथा च भेदः समानानेकधर्मोपपत्तोर्विप्रतिपत्तेश्चेति तथा वर्णितम्। अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पृथक् पञ्चविधं संशयं वर्णयन्ति। समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति एवं शेषेषु पदेषु। तन्न युक्तम्। उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात् समानधर्मोपपत्तौ सत्यामुपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्शः संशय इति सूत्रार्थः। एवमनेकधर्मोपत्तो विप्रतिपत्तेश्चेति वाच्यम्। तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्था पृथक् संशयकारणमिति। उपलब्ध्यनुपलब्ध्योर्द्वैविध्यात् संशयो न युक्तः, कुतः? लोकविरोधात्–उपलब्ध्योर्द्वैविध्यात् संशयो भवतीति ब्रुवाणो लोकं बाधते। कथमिति? यत्किञ्चिदयमुपलभते सर्वत्रास्य संशयेन भवितव्यम्। किं कारणम्? उपलभ्यमानं द्वेधा भवति। उपलब्ध्योर्द्वैविध्यात्तु यः संशयो भवति तस्य कुतो निवृत्तिः? विशेषादर्शनान्निवर्त्तते इति चेत् विशेषेष्वप्येवं–य

एते विशेषा उपलभ्यन्ते किमेते सन्त आहोऽसन्त इति यावद्यावदुपलभ्यते सर्वत्रोपलब्धिद्वैविध्यात् संशय इत्यनिवर्त्यः संशयः। एवमनुपलब्धिद्वैविध्येऽपि वक्तव्यम्। न चास्य क्वचित् समाश्वासः स्यात्। यदाऽयमपवरकादौ सर्पादीनुपलभते तदा सर्पवत् तद्वेश्म उतासर्पवदिति संशयः अयमपि संशयोऽनिवर्त्त्य एवेति सर्वत्राश्वासो न स्यात्। येषां च पञ्चविधः संशय इति सूत्रार्थः तैरप्यस्य कारणकृतो भेदो वक्तव्यः स्वभावकृतो वा। तद्यदि कारणकृतो? न पञ्चविधोऽनेकरूपः संशय इति प्राप्तम्। अथ स्वभावभेदात्? न, स्वभावभेदस्यासम्भवादेकरूपः संशयः संशीतिः संशय इति। तस्मात् पञ्चविधः संशय इति न सूत्रार्थः।

समानधर्मग्रहणान्न संशयो धर्मिविषयत्वात्—यदिदमुच्यते समानधर्मोपपत्तेः संशय इति। तदयुक्तम्। धर्मिविषयत्वात्। न हि समाने धर्म उपलब्धे धर्मिणि संशयो (न) युक्तः धर्मधर्मिणोर्भेदात्। न हि गवि दृष्टे अश्वे संशयः (धर्मिणश्चादृष्टत्वात् नानुपलब्धे न निर्णीतेऽर्थे संशयो भवतीति च व्याघातः। धर्मधर्मिभावात् संशय इत्येके तावत् परिहारं ब्रुवते—धर्मे दृष्टे धर्मिणि संशयः धर्मधर्मिभावात्। न पुनर्गवि दृष्टे अश्वे संशयो भवति) धर्मधर्मिभावानुपपत्तेः। न। नानात्वानिवृत्तेः, न हि धर्मधर्मिभावेन नानात्वं निवर्तते। अथ धर्मधर्मिभावो नियामकः? इच्छादिसूत्रं तर्हि व्याहन्यते। कथमिति? इच्छादयः प्रतिसन्धानादात्मानं गमयन्तीति सूत्रार्थः। अत्र परः प्रत्यवस्थितः कार्यकारणभावात् प्रतिसन्धानमिति नानात्वस्याबाधनादित्यनेन निवर्तेत। इह पुनर्भवता धर्मधर्मिभावादिति पुनर्ब्रुवता नानात्वमेव धर्मधर्मिभावनियामकमुच्यत इति शक्नुयात् परोऽपि वक्तुं कार्यकारणभावो नियामक इति। तस्मादपव्याख्यानमेतत् धर्मधर्मिभावात् संशय इति। अथ समानधर्मोपलब्धेरन्यस्मिन्ननुपलब्धे धर्मिणि संशयो भवतीति कः परिहारः?। अयं परिहारः बहुव्रीहिः समासोऽतो धर्मिणोऽभिधानं—समानधर्मोपपत्तेरित्यनेन पदेन बहुव्रीहिसमासे धर्म्येव व्यपदिश्यते। कथं? समानो धर्मो यस्य स भवति समानधर्मा समानधर्मण उपपत्तिः समानधर्मोपपत्तिः। किमुक्तम्भवति? समानधर्मवतो धर्मिणो दर्शनादिति।

विशेषापेक्षो विमर्षः संशय इति विशेषापेक्षो विशेषस्मृत्यपेक्ष इति। अथ सा विशेषस्मृतिः किंविशेषविषया किं संशयविषयविशेषविषया उतान्यविषयेति? योसौ संशयस्य विषयः तं समानधर्माणमुपलभते तस्यायं विशेषाननुस्मरति उतान्यस्येति। यदि तावत् तस्य? तन्न युक्तं तद्विशेषाणां क्वचिदननुभूतत्वात् योऽर्थः पूर्वमुपलब्धविशेषः तद्गतान् विशेषाननुस्मरतीति युक्तम् तद्विशेषाणामनुभूतत्वात्, यदा। पुनरयमनुपलब्धपूर्वविशेषः सामान्यत उपलभ्यमानः सन्दिह्यते तत्र विशेषानुस्मृतिः कथम्? तद्विशेषाणामननुभूतत्वा-दिति। न। सामान्यवचनत्वात्। विशेषापेक्ष इति सामान्यवचनं पुनरनेनावधार्यते तस्य वान्यस्य वेति। यदा तद्गता विशेषाः सुस्मूर्षिता भवन्ति तदाऽनुभूतेषु विशेषविषया स्मृतिः, यदा त्वनुपलब्धपूर्वेऽर्थे संशयः तदा सादृश्यादन्यगतान् विशेषान् सुस्मूर्षत इति। एवं तावद्व्यवस्थितं त्रिविधः संशय इति।

अनेन च संशयलक्षणेन यान्यविरुद्धानि संशयलक्षणानि तान्यपि संगृहीतानि। यथा काश्यपीयम् "सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय" इति। अस्यार्थः सामान्यप्रत्यक्षादिति सामान्यवतः प्रत्यक्षाद्धर्मिण इति, न पुनरयं पदार्थः सामान्यस्य प्रत्यक्षादिति। विशेषाप्रत्यक्षत्वम-व्यवस्थितविशेषत्वं नास्मिन् विशेषा व्यवस्थिता इति, विशेषस्मृतेश्च संशय समानम्। कथं पुनरनेन सूत्रेणासाधारणोऽपि लभ्यत इति? लभ्यते व्यभिचारितत्वात् व्यभिचारिसाधारणं तच्चासाधारणेऽपि व्यभिचारित्वमस्तीति लभ्यते। अनेकधर्मोपपत्तिस्तर्हि पृथङ्न पठितव्या अन्वयव्यतिरेकभेदविवक्षायां पृथगभिधानं पुनः संशयकारणभेदविवक्षयेति। ये त्वत्र विशेषाप्रत्यक्षाद्विशेष-स्मृतेश्चेतिपदयोः पौनरुक्त्यं वर्णयन्ति—सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशय इत्यभिधीयमाने किल गम्यत एतद्विशेषाप्रत्यक्षादिति, न हि कश्चिद्विशेषान् प्रत्यक्षान् स्मरति। तन्न। सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः विशेषाणामप्रत्यक्षत्वमिति। अपि त्वव्यवस्थितविशेषवत्त्वं—नास्मिन् विशेषा व्यवस्थिता इत्यतो नायं दोषः इति।

अन्ये तु संशयलक्षणमन्यथा व्याचक्षते—साधर्म्यदर्शनाद्विशेषोप-लिप्सोर्विमर्षः संशय इति। तैरपि साधर्म्यस्यावधारितत्वात् संशयस्य विषयो वक्तव्यः। धर्मीति चेत् ननूक्तः संशयस्य विषयो धर्मी?। सत्यमुक्तो न पुनर्युक्तः। कथं न युक्तः? यदि तावद्धर्मव्यतिरिक्तं धर्मिणमभ्युपैति व्याहतं

भवति। धर्मधर्मिणोश्च नानात्वाभ्युपगमे धर्मस्यावधृतत्वात् धर्मिणश्चदृष्टत्वात् न संशयः। न ह्यन्यस्मिन् दृष्टेऽन्यत्र संशयो भवति। अथाप्यस्माद्दिशा साधर्म्याभिधानेन धर्म्येवोच्येत? तन्न युक्तं सधर्मणो भावः साधर्म्यं, साधर्म्यमिति च भावाभिधानेन धर्मोऽभिधीयते न धर्मी, न च युक्तोऽन्यस्य दर्शनादन्यत्र संशय इति। अथार्थान्तरभावं नाभ्युपैति? तथापि साधर्म्यस्यावधृतत्वात् क्व संशय? इति। यदि चायं धर्मिणं नोपलभते कस्यायं विशेषमुपलिप्सेत। न हि साधर्म्यस्य विशेषाः सम्भवन्तीति। अथ सामान्यवतो विशेषा? तन्न, तस्यादृष्टत्वादित्युक्तम्। न सामान्यस्य विशेषाः सन्तीति सामान्यवतो विशेषा भवन्तीत्येवं ब्रुवता सामान्यविशेषतद्वतां भेदोऽनुज्ञातो भवति। व्यर्थञ्चाभिधानं न सामान्यस्य विशेषास्तद्वतो विशेषा इति। उपलब्ध्यनुपलब्धिव्यवस्थाने च साधर्म्यदर्शने सत्यपि विशेषोपलिप्सायां च न संशयो भवतीति उपलब्ध्यनुपलब्ध्यव्यवस्थात इति वक्तव्यम् अनेकधर्मदर्शनादिति च।

समानानेकधर्मोपपत्तेरित्येवमादिवाक्यं संशयलक्षणं तद्विचार्यते किन्तावदयं कारणोपदेश आहो संशयस्वरूपावधारणमिति?। यदि कारणनिर्देशो ऽत्यल्पमिदमुच्यते समानानेकधर्मादिभ्य इति, अन्यान्यपि संशयकारणानि, तान्युपसंख्येयानि। यथाऽऽत्ममनःसंयोग-आन्तरस्य आत्ममनःसन्निकर्ष, इन्द्रियार्थसन्निकर्षो बाह्यस्येति। अथ स्वरूपावधारणं? कारणनिर्देशोऽनर्थकः संशीतिः संशय इति वक्तव्यम्। अस्तु तावत् कारणावधारणम्। ननूक्तं कारणान्तरमप्युपसंख्येयमिति? न, भेदं कारणावधारणार्थमपि त्वसाधारणकारण-निर्देशोऽयम्। तस्मादिन्द्रियार्थसन्निकर्षादीनामप्रसङ्गः। कुतः। प्रत्यक्षसाधारणत्वात्। स्वरूपनिर्देशो वा भवतु—इदमेवास्य स्वरूपं समानधर्मादिभ्यो जन्मेति। सोऽयमेवम्भूतः संशयो विचाराङ्गतयोपादीयते। संशयवद्विपर्ययोऽपि विचाराङ्गम् सोऽपि पदार्थत्वेन वक्तव्यः? सत्यमसौ पदार्थो न तु विचाराङ्गमित्यतो नाभिधेयः। कथं न विचाराङ्गं? यथा सन्दिग्धस्तद्विशेषप्रतिपत्तये यतते नैवं विपर्यस्त इति इत्यतो न्यायविद्यानङ्गत्वात् नाभिधीयते।।

# न्यायवार्त्तिके संशयपरीक्षा

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेत्युक्तम्। तत्रोद्देशलक्षणे पूर्वाध्याय एव व्याख्यायते परीक्षा वर्तिष्यत इति। तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमिति। पूर्वं प्रमाणमुद्दिष्टं लक्षितं च पूर्वमेव तत्परीक्ष्यत इत्यवसरप्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते। किमर्थं क्रमभेदः? परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते तथा चोक्तम्–"विमृष्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः"। ननु चोक्तं नायं निर्णये नियमो विमृष्य पक्षप्रतिपक्षाभ्यां सर्वत्र निर्णय इति, वादे पक्षप्रतिपक्षाभ्यामेव, शास्त्रे च विमर्षवर्जमिति। शास्त्रे चायं विचारः तस्मान्न संशयपूर्वक इति, संशयपूर्वको हि विचारस्तर्कविषय एव, नायं तर्कविषय इति। सत्यम् न निर्णये नियमो, विचारे(तु) हि नियमो, निर्णय एवं चान्यथा च, विचारः संशयपूर्वक एव। यदप्युक्तम् वादे शास्त्रे च विमर्षवर्जमिति, वादिप्रतिवादिनावधिकृत्य तदुक्तम्। शास्त्राभ्युपगमे च वादिप्रतिवादिनोर्न संशयः उभयोर्निश्चितत्वात्। शास्त्रे च न संशयः। निश्चितस्य वस्तुनः शास्त्राभ्युपगमेनाभ्युपगमात्। तत्र वादिप्रतिवादिनौ तावद्विचारयतः किं नित्यसाधनं बलीयः आहोऽनित्यसाधनमिति। शास्त्रेऽपि च विचारः साधनसामर्थ्यासामर्थ्यपरिज्ञानार्थम्। तत्र संशय इति। तस्मात् संशयपूर्वक एव विचारस्तन्मूलकत्वात् परीक्षाविधेः संशयः पूर्वं परीक्ष्यत इति। तत्र संशयो वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। निरुक्तिव्याघात इति चेत्–अनवधारणात्मकश्च प्रत्ययश्चेति व्याहतम्। न। प्रत्ययस्य स्वरूपानवधारणादव्यवच्छेदात्मकत्वं स्वरूपमस्य (व्यव)परिच्छिद्यते। न पुनरनेन विषयस्वरूपमवधार्यत इति सोऽयं संशयः। समानधर्मोपपत्तेरित्येवमादिभ्यस्तस्याक्षेपः॥

**समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः॥1॥**

समानानेकधर्माध्यवसायादित्येवमादि सूत्रम्। तस्य यथाश्रुत्युत्थानमिति। समानस्य धर्मस्याध्यवसायात् संशयो न समानधर्ममात्रादुपलभ्यमानो धर्मः संशयहेतुरिति धर्मधर्मिग्रहणे वा संशयाभाव इति। समानमनयोर्धर्ममुपलभ इति धर्मधर्मिग्रहणे क संशय इति। धर्मिणोऽर्थान्तरभावाद्वा न संशयः न ह्यन्यस्मिन्नुपलब्धेऽन्यत्र संशय इति। अथवा न समानधर्माध्यवसायः संशयस्य कारणं व्यवच्छेदात्मकत्वात् संशये च तदभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अधिगतानधिगतयोर्न संशयः अधिगते वस्तुनि संशयो न युक्तः निर्णीतत्वात् नानधिगते अदृष्टत्वात्। न समानधर्माध्यवसायात् एव संशयः सत्यप्यभावात्–सत्यपि समानधर्माध्यवसाये न दृष्टः संशयः यथा कृतकत्वाच्छब्दे। न। समानधर्माध्यवसायादेव संशयोऽन्यथापि भावात्–अन्यथापि दृष्टः संशयः यथा विरुद्धाव्यभिचारिधर्मद्वयसन्निपाते। तत्त्वानुपलब्धेश्च संशयः यथा प्रकरणसमे। एकवृत्तित्वाच्च न समान–एकवृत्तिरयं धर्मो न चैकवृत्तिः समानो भवितुमर्हतीति॥

**विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च॥2॥**

एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम्। विप्रतिपत्त्यव्यवस्थाध्यवसायात् संशयो न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा॥

**विप्रतिपत्तौ च सम्प्रतिपत्तेः॥3॥**

विप्रतिपत्तौ च सम्प्रतिपत्तेः न विप्रतिपत्तिरस्तीति सूत्रार्थः॥

**अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः॥4**

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया नाव्यवस्था विद्यत इति सूत्रार्थः॥

**तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः॥5॥**

तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः समानधर्मादीनां सातत्यान्नित्यः संशयो इति सूत्रार्थः॥

**यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा॥6॥**

## न्यायवार्त्तिकतात्पर्य्यटीकायां संशयः

संशयलक्षणावतारपरं भाष्यम्, स्थानवत एतर्हीति। तस्यार्थः, स्थानं क्रमः, तद्वतः एतर्हि इदानीमिति। क्वचित्पाठः स्थानवत एव तर्हीति, तर्हि तदानीमुद्देशसमये क्रमवतः संशयस्य प्रमेयानन्तरमुद्दिष्टस्य प्रमेयलक्षणानन्तरं स्थानं क्रमो लक्षणस्येत्यर्थः। तदेतद्वार्त्तिककारो व्याचष्टे। प्रमेयेति। एतदेव स्फुटयति। येति। स्थानं क्रमग्रहणेन व्याख्यातं, मत्वर्थश्च प्राप्तिग्रहणेन।

समा यः (सू. 23)।। अत्र च विमर्षः संशय इति संशयसामान्यलक्षणम्। तत्र च संशय इति लक्ष्यनिर्द्देशो विमर्श इति लक्षणपदम्। एकस्मिन् धर्मिणि विरोधिनानार्थावमर्षो विमर्षः किंस्विदिति ज्ञानम्। तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्य्ययादिभ्यः संशयो निवर्त्तितो भवति। समानेत्यादीनि तु त्रीणि विशेषलक्षणानि। तेषु विमर्षः संशय इत्यनुवर्त्तनीयम्। अत्र विशिष्टोऽवमर्षः विशिष्टः संशयो लक्ष्यपदं, समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति। तदेतदाह वार्त्तिककारः। तत्र समानेति। त्रिविध एवेति ये पञ्चविधमाचक्षते ते निराकृताः। तदनवधारणं ज्ञानं संशय इति संशयसामान्यलक्षणपरं भाष्यं व्याचष्टे। तत्र विषयस्वरूपेति। प्रत्ययोऽनवधारणात्मकश्चेति। आक्षेपपरिहारौ प्रथमसूत्र एव व्याख्यातौ। प्रत्ययशब्दस्य निश्चयवचनत्वमभ्युपेत्य व्याख्यानं प्रतीयते इति, परमार्थतस्तु प्रत्ययशब्दो ज्ञानपर्य्यायः। ज्ञानत्वं तु सामान्यं संशयादिष्वप्यस्तीति न विरोध इति। समानधर्मोपपत्तेरिति व्याचष्टे। समानेति विकल्प्याक्षिपति। किं पुनरिति। कस्मादिति। मा कार्षीद् द्रव्ये संशयं गुण एव कस्मान्न करोतीति प्रश्नार्थः। समाधत्ते। न साधारणेति। यादृशं सङ्ख्या-परिमाणप्रचयभेदयोनि परिमाणं स्थाणुपुरुषयोस्तादृशमस्यापि पुरोवर्त्तिनो द्रव्यस्य परिमाणं, तस्मात्सदृशपरिमाणधर्मस्य धर्मिण उपपत्तिरित्यर्थः, महत्त्वदीर्घत्वसामान्यवद्धर्म-योगस्तु सन्नपि न संशयकारणम्, असादृश्ये तद्योगेऽपि संशयाभावादिति

उपलब्ध्य (नुपलब्ध्य) व्यवस्थायाः पूर्वपदविशेषणत्वात् पूर्वपदविशेषमुपलब्ध्यनुपलब्धी न स्वतन्त्रे संशयकारणम्। तच्च सूत्र एवोक्तमिति। यत्पुनरेतत् "विप्रतिपत्तौ च सम्प्रतिपत्ते" रिति? न, संज्ञान्यथात्वादर्थस्यान्यथात्वम्–यस्माद्विप्रतिपत्तिशब्दार्थस्य निमित्तान्तरसन्निपाते सम्प्रतिपत्तिरिति नाम कृतम्, न तावता विप्रतिपत्तिर्नास्ति। विप्रतिपत्तेस्तु तथाभावात् संशयहेतुत्वमिति। यत्पुनरेतत् "अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया।" नाव्यवस्थास्तीति? तदपि न, व्याघातात् अव्यवस्था नास्त्यव्यवस्थात्मनि च व्यवस्थितेति (त्वाच्च) व्याघातः। न च निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणमर्थतथाभावं बाधते यथाभूत एवार्थः संज्ञान्तरकरणे तथाभूत एवाकरणेऽपीति।

यत्पुनरेतत् "तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्ते" रिति! तदपि न, सूत्रार्थापरिज्ञानादित्युक्तम्। नायं समानधर्मादिभ्य एव संशयः, किं तु तद्विषयाध्यवसायादुपलब्ध्यनुपलब्ध्यव्यवस्थापने च सति विशेषस्मृतिसहितादेवं च सति नासंशयोपि नात्यन्तसंशयः। अन्यतरधर्माध्यवसायादिति न युक्तम् नैतस्मान् संशय इति–न हि कदाचिदन्यतरधर्माध्यवसाये सति संशयः अन्यतरधर्माध्यवसायस्य निर्णयहेतुत्वादिति।।

**यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः।।7।।**

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः। कोऽस्य सूत्रस्यार्थः? स्वयं न संशयः प्रतिषेद्धव्यः परेण तु संशये प्रतिषिद्धे एवमुत्तरं वाच्यमिति शिष्यं शिक्षयति।।

**(इति संशयपरीक्षा।)**

## न्यायवार्त्तिकतात्पर्य्यटीकायां संशयः

संशयलक्षणावतारपरं भाष्यम्, स्थानवत एतर्हीति। तस्यार्थः, स्थानं क्रमः, तद्वतः एतर्हि इदानीमिति। क्वचित्पाठः स्थानवत एव तर्हीति, तर्हि तदानीमुद्देशसमये क्रमवतः संशयस्य प्रमेयानन्तरमुद्दिष्टस्य प्रमेयलक्षणानन्तरं स्थानं क्रमो लक्षणस्येत्यर्थः। तदेतद्वार्त्तिककारो व्याचष्टे। प्रमेयेति। एतदेव स्फुटयति। येति। स्थानं क्रमग्रहणेन व्याख्यातं, मत्वर्थश्च प्राप्तिग्रहणेन।

समा यः (सू. 23)।। अत्र च विमर्षः संशय इति संशयसामान्यलक्षणम्। तत्र च संशय इति लक्ष्यनिर्द्देशो विमर्श इति लक्षणपदम्। एकस्मिन् धर्मिणि विरोधिनानार्थावमर्षो विमर्षः किंस्विदिति ज्ञानम्। तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्य्ययादिभ्यः संशयो निवर्त्तितो भवति। समानेत्यादीनि तु त्रीणि विशेषलक्षणानि। तेषु विमर्षः संशय इत्यनुवर्त्तनीयम्। अत्र विशिष्टोऽवमर्षः विशिष्टः संशयो लक्ष्यपदं, समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति। तदेतदाह वार्त्तिककारः। तत्र समानेति। त्रिविध एवेति ये पञ्चविधमाचक्षते ते निराकृताः। तदनवधारणं ज्ञानं संशय इति संशयसामान्यलक्षणपरं भाष्यं व्याचष्टे। तत्र विषयस्वरूपेति। प्रत्ययोऽनवधारणात्मकश्चेति। आक्षेपपरिहारौ प्रथमसूत्र एव व्याख्यातौ। प्रत्ययशब्दस्य निश्चयवचनत्वमभ्युपेत्य व्याख्यानं प्रतीयते इति, परमार्थतस्तु प्रत्ययशब्दो ज्ञानपर्य्यायः। ज्ञानत्वं तु सामान्यं संशयादिष्वप्यस्तीति न विरोध इति। समानधर्मोपपत्तेरिति व्याचष्टे। समानेति विकल्प्याक्षिपति। किं पुनरिति। कस्मादिति। मा कार्षीद् द्रव्ये संशयं गुण एव कस्मान्न करोतीति प्रश्नार्थः। समाधत्ते। न साधारणेति। यादृशं सङ्ख्या-परिमाणप्रचयभेदयोनि परिमाणं स्थाणुपुरुषयोस्तादृशमस्यापि पुरोवर्त्तिनो द्रव्यस्य परिमाणं, तस्मात्सदृशपरिमाणधर्मस्य धर्मिण उपपत्तिरित्यर्थः, महत्त्वदीर्घत्वसामान्यवद्धर्म-योगस्तु सन्नपि न संशयकारणम्, असादृश्ये तद्योगेऽपि संशयाभावादिति

भावः। स्यादेतत्। उपपत्तिः सत्ताः, न च सदृशो धर्मः सत्तामात्रेण संशये हेतुः, अपि तूपलब्धः, न चोपलब्धेर्वाचकमत्रास्ति पदमित्यत आह। तस्योपपत्तिरध्यवसाय इति। यद्यप्ययमुपपत्तिशब्दः सत्तावचनस्तत्परश्च, तथाऽपि पदान्तरसमभिव्याहारादवगम्यते सत्ता मात्राभिधानेऽपि तदुपलब्धिर्विवक्षितेति। विषयविषयिणोरभेदविवक्षया सामानाधिकरण्यमुपपत्तिरुपलब्धिरिति। पृच्छति। कस्मादिति। अस्मादायत्ते हि शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह इत्यर्थः। उत्तरम्। अनुक्तमपीति। विशेषापेक्ष इति विशेषस्यापेक्षोच्यते, अपेक्षाशब्दश्च यद्यपीच्छायां वर्तते, तथापीह जिघृक्षायां, वाक्यसामार्थ्यात्। न च सा संशयस्य हेतुः, तस्याः संशये सति भावात्। तस्माद्विशेषापेक्षया जिघृक्षालक्षणयेह विशेषयोः पुरोवर्तिनोस्तु सादृश्यात्स्मरणे सत्यग्रहणं लक्षणीयं यथा गङ्गाशब्दस्तीरं स्वसम्बद्धमेव लक्षयति, न तु तीरमात्रम्, एवं बुभुत्सया स्मर्यमाणमेवागृह्यमाणं सम्बद्धम्, न त्वगृह्यमाणमात्रम्। अनेनैवाभिप्रायेण वक्ष्यति भाष्यकारः, विशेषस्मृत्यपेक्ष इति। तस्माद्विशेषग्रहणप्रतिषेधात् सामान्यज्ञानमभ्यनुज्ञातं भवतीति भावः। परिहारान्तरमाह। अथ वेति। स्यादेतत्। उपपत्तिशब्दः सत्तावचनश्चोपलब्धिवचनश्च, तथा च विनिगमनायां को हेतुरित्यत आह। यः पुनरिति। नन्वभावः प्रमाणालम्बन उक्तस्तत्कथं न विरोध इत्यत उक्तं स्वतन्त्रमिति। अथ वा सत्तावाचकोऽप्ययमुपपत्तिशब्दः स्वाभिधेयविषयामुपलब्धिं लक्षयतीत्याह। विषयशब्देनेति। न चेयमलौकिकी लक्षणेत्याह। लौकिकमिति। यथा धूमो न सत्तामात्रेण हेतुस्तथोक्तं प्रागिति।

एकदेशिनामुपसङ्ख्यानमुपन्यस्यति। अव्यवच्छेदेति। ते हि मन्यन्ते व्यवच्छेदहेतुरपि धर्मः समानो भवति, यथा कृतकत्वं साध्यधर्मिणि शब्दे दृष्टान्तधर्मिणि च घटादौ समानमिति, न चासौ नित्यत्वसंशयहेतुरपि त्वनित्यत्वस्यायोगं साध्यधर्मिणि व्यवच्छिनत्ति, तस्मादव्यवच्छेदहेतोरिति वक्तव्यमित्यर्थः। तदेतद् वक्तव्यं दूषयति। न समानेति। समानो हि धर्मः प्रतिसम्बन्धिनमपेक्षते, केनेति, संशयपदेन च स्वविषयोपस्थापकेन परस्परविरोधिनावुपस्थितौ, तेन ताभ्यां समान इति गम्यते। तेन विवक्षित-तज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिरेव गम्यते, न चैवं कृतकत्वं, तस्मान्न वक्तव्यमव्यवच्छेदहेतोरिति। समानशब्दार्थः सादृश्यं तत्र नास्तीत्यर्थः।

अत्रैवोपलब्धीत्यादिपदद्वयं शङ्कापूर्वकं योजयति। सोऽयं साधारण इति। उपलब्ध्यनुलब्धी न व्यवतिष्ठेते इति। शिरःपाण्यादीनामुपलब्धिर्वक्रकोटरादेरनुपलब्धिः पुरुषस्य बाधकं प्रमाणं, तद्विरुद्धवक्रकोटरादेरुपलब्धिः शिरः पाण्यादेरनुपलब्धिः पुरुषस्य बाधकं प्रमाणं, तद्धि पुरुष एवायमिति वा इदंतया व्यवतिष्ठते, इदंतानिषेधेन वा नायं पुरुष इत्यनिदंतया व्यवतिष्ठते, तदभावोऽव्यवस्था। तदनेन साधकबाधकप्रमाणाभावो दर्शितः। विशेषाकाङ्क्षायां चेति विशेषस्मृतिर्दर्शिता।

विमर्षपूर्वकं समस्तमित्यवधारयति। किमिदमिति। तत्रैकपदपरिग्रहे दोषमाह। यदि समानेति। विशेषः शिरःपाण्यादिः, विशिष्यते ह्यनेन पुरुषः स्थाणोरिति। अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्थास्तीति। यथा सप्तमे रसे दशमे द्रव्ये, न हि तत्र साधकं बाधकं वाऽस्ति प्रमाणम्, न च संशयः। विशेषापेक्ष इत्येतावतीति। तद्यथा हस्तिनं दृष्ट्वा तत्सम्बन्धिनौ स्थूणाहस्तिपकौ स्मरति, न च तत्र सन्दिग्धे। द्विपदपरिग्रहे दोषमाह। एवं समानेति। नौदोलाद्यारूढो हि गच्छन् विदूर आरोपहरिणाहवद्वस्तुदर्शने सत्यपि च साधकबाधकप्रमाणाभावे विशेषस्मृत्यभावान्नग इति वा नाग इति वा न सन्दिग्धे। एवमुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति च पदद्वयेऽभिधीयमानेऽन्यतः स्मर्यमाणाद्विशेषात्सदृशधर्मवति धर्मिण्यनुपलभ्यमाने संशयः स्यात्, अस्ति हि तदा विशेषस्मृतिः साधकबाधकप्रमाणाभावश्च, न खल्वनुपलभ्यमाने समानधर्म्मे धर्म्मिणि तद्गता वक्रकोटारादयो वा शिरःपाण्यादयो वा शक्यग्रहा इति। यदाऽयं द्रष्टेति। यदा खल्वयं द्रष्टा प्रतिपरुरङ्कुरोद्भेदपुलकिताभिर्मन्दमलयमारुतजान्दोलनललितलास्यशालिनीभिः शाखाभिर्मधुमदमुदितमधुपमालागुञ्जित वल्लकीवाद्यमनोहराभिर्मत्तपुंस्कोकिलकुलविपञ्च्यमानपञ्चमाभिरारब्धसङ्गीतकं सहकारतरुमालोक्याथ विदूरवर्त्ती कुञ्जरसदृशधर्मवन्तमनुभवति, तदाऽस्यास्ति समानधर्मोपलब्धिरस्ति च करितरुरूपविशेषस्मृतिर्न तु साधकबाधप्रमाणाभाव इति न संशेते। कतिपयव्यक्त्याश्रयत्वं सहकारत्वादेर्विशेषस्याल्पविषयत्वम्, आरोहपरिणाहादेस्तु बहुव्यापित्वं महाविषयत्वं नानार्थाविमर्षणं च विरुद्धार्थाविमर्षणम्। तदनेन स्थाणुपुरुषयोरित्यादि भाष्यं व्याख्यातम्। पश्यन्नित्युपपत्तिविवरणम्। विशेषं बुभुत्समान इति विशेषापेक्ष इत्यस्य विवरणम्। किंस्विदिति विमर्षविवरणम्। स्यादेतत्। संशयोत्तरकाला बुभुत्सेति कथं बुभुत्समानः संशेत इत्यत उक्तं भाष्यकृता समानमनयोरिति।

विशेषापेक्षाशब्देनेच्छावाचिनाऽगृह्यमाणविशेषस्मरणं लक्षितमिति भाव:। सेयं साधकबाधकप्रमाणानुपपत्तौ सत्यां समानधर्मोपलब्धिर्विनश्यदवस्था विशेषस्मृत्या सहाविनश्यदवस्थयैकस्मिन् क्षणे सती संशयज्ञानस्य हेतुरिति सिद्धम्। द्विपदपरिग्रहमनेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यत्रापि योजयति। एतेनेति। द्वे द्वित्वे नैकीकृत्याद्यानन्तरयोरिति द्रष्टव्यम् अनेकधर्मोपपत्तेरित्यत्र भाष्यकृतो व्याख्यां ग्रहीतुमेकदेशिव्याख्यानमुपन्यस्य दूषयति। अनेकेति। शब्दो हि संयोगज:, संयोजत्वं हि कार्य्ये द्रव्ये गुणे च रूपादौ शरीरादिक्रियायां चास्तीति द्रव्यगुणकर्मणां समानम्, तस्मादनेकस्य धर्मश्चरितार्थ:। एवं शब्दगतोऽनेकाऽपि धर्म: समानतयैव द्रव्यत्वादिसन्देहहेतु:, त्रिषु संयोगजत्वं साधारणं, सत्त्वादिना निर्विभक्तस्य निर्गुणत्वं गुणकर्मणो:, एवं क्षणिकत्वं द्रव्यगुणकर्म्मणामिति समानधर्मोपपत्त्या गतार्थमित्यर्थ:। पृच्छति। अथेति। भाष्यकृद्व्याख्यायोत्तरम्। असाधारण इति। पुन: पृच्छति। कथमिति। समासपदशब्देन तदेकदेशोऽनेकशब्दो लक्ष्यते, समासगतेनानेकशब्देनेत्यर्थ:। उत्तरम्। समानेति। एतदुक्तं भवति, यतोऽनेकस्मात्समानासमानजातीयादेष स्वाश्रयं व्यावर्त्तयति, अतोऽनेकापादानकव्यावृत्तिहेतुत्वाल्लक्षणयाऽनेक इत्युच्यते। तदनेन समानजातीयमसमानजातीयं चानेकमिति भाष्यं तस्माद्विशेष इत्यध्याहृत्य व्याख्यातम्। अध्याहृतविशेषपदविवरणं विशेषको धर्म इति। सम्बन्धसामान्यविवक्षया षष्ठी तस्यानेकस्येति। लक्षणाबीजान्तरमाह। तस्य चानेकस्येति। निवर्त्त्यनिवर्त्तक-सम्बन्धेनानेकशब्देन धर्मो लक्ष्यते इत्यर्थ:। तदनेन विनैवाध्याहारं समानजातीयमसमानजातीयं चानेकं तस्य धर्म्मो निवर्त्तकतयेति व्याख्यातम्। न त्वत्र समासभ्रान्ति: कर्त्तव्या, दर्शयिष्यति हि बहुव्रीहिमिहैव वार्त्तिककार:। तदनेन लक्षणाबीजद्वयोपन्यासेनासाधारणो धर्म इति ग्रहणकवाक्यं व्याख्या-तम्। प्रकारान्तरेणानेकधर्मपदं व्याचष्टे। एकानेकेति। एकं चानेकं च तदुभयमनेकं, तदेतस्यानेकस्य प्रत्ययहेतुर्धर्मोऽनेकधर्म:, भेदाभेदप्रत्यय-हेतुरित्यर्थ:। विभागजत्वं विभागजानां च शब्दानामन्योन्यस्याभेदप्रत्ययहेतु:, तदितरेभ्यो भेदप्रत्ययहेतुरिति, तदिदमाह। यतो विभागजन्यत्वादेष प्रत्ययो श्रवतीदं विभागजं शब्दजातमेकम्, इदं च ततोऽन्यदनेकं भिन्नं, तत्र य एवैकप्रत्ययहेतुर्धर्मोऽभेदप्रत्ययहेतु: स एवानेकप्रत्ययहेतुर्धर्मोऽनेकधर्मो भेदप्रत्ययहेतुर्विशेष:। जात्यभिप्रायं चैकवचनम्। सदादिर्हि धर्मो द्रव्यगुणकर्मणामभेदप्रत्ययहेतु: सामान्यादिभ्य: शब्दं निर्विभजति। तदिदमाह।

यतः सदादेरेष प्रत्ययो भवतीदमेकं यतश्च विभागजत्वादेष प्रत्ययो भवतीदमनेकमिति, तस्मात्सिद्धमेकं चानेकमिति तत्प्रत्ययाहेतुरुपचारेणानेक इति। तदिदमुद्भाव्यं व्याख्यातम्। अत्रोदाहरणमाह। यथेति। द्रव्यादिकोटित्रयविशेषे संशयप्रदर्शनार्थमुक्तं सामान्यविशेषसमवायेभ्य इति। सदनित्यं द्रव्यवत्कार्य्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः, तेनानेन सदादिना निर्विभक्तस्य पृथक्कृतस्येत्यर्थः।

स्यादेतत्। यद्येनं सहचरितं दृष्टं तत्क्वचिद्दृश्यमानं तत् स्मारयत्तद्विरुद्धेनापि सम्बन्धादनिश्चाययत्संशयहेतुर्भवति, यथा समानो धर्मः, असाधारणस्तु धर्मो विभाजत्वं नर्ते शब्दात् क्वचित्पृथिव्यादौ वा उत्क्षेपणादौ गन्धादौ वा दृष्ट इति कथं स्मारयेत्, अस्मारयन् वा कथं संशयं जनयेत्। तस्मात्कोऽयं भवेदियतो धर्मादिति। जिज्ञासामात्रमुत्पादयेत्, न त्वयं वायं वेति संशयमित्यत आह। न हीति। कस्मान्न दृष्टमित्यत आह। सर्वत्रासम्भवात्। न हि द्रव्यादेर्विभागतो जन्म सम्भवति, तदन्वयव्यतिरेकाननुविधानादित्यर्थः। नन्वत एवोक्तं न संशयहेतुरित्यत आह। विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति। अयमर्थः। यद्यपि विभागजत्वं न द्रव्यादौ क्वचिद्दृष्टं, तथाऽपि तद्व्यतिरेकः प्रत्येकं द्रव्यादौ दृष्ट इति विभागजत्वेन सदाद्यविशेषवान् शब्दो द्रव्यकर्मभ्यां व्यावर्तमानः किं गुणः, गुणकर्मभ्यां वा व्यावर्तमानः किं द्रव्यं, गुणद्रव्याभ्यां व्यावर्तमानः किं कर्मेति व्यतिरेकमुखेन तत्तत् स्मारयन् असाधारणो धर्मो भवति संशयकारणमिति। देशयति। ननु चेति। अयमभिसन्धिः। वंशे पाट्यमाने वंशदलयोः क्रिया, ततस्तयोर्मिथो विभागः, ततो वंशदलावरुद्धनभोभागविभागः, सोऽयं विभागजो विभागो न वंशदलकर्म्मजः, अवयवक्रिया हि तदवरुद्धनभोभागविभागजनिका द्रव्यारम्भकसंयोगाप्रतिद्वन्दि-विभागजनकत्वेन व्याप्ता विकसत्कमलकुड्मले दृष्टा। न हि तत्र मुकुलिताद्विकासि कमलमन्यत्, आकुञ्चितप्रसारिताङ्गुलिकरतलवत्तत्त्वेन प्रत्यभिज्ञायमानत्वात्। वंशदलक्रियाऽपि चेत्तादृशी, नूनमनयाऽपि द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनिकया भवितव्यं, तथा च द्रव्यं कार्य्यमपि न नश्येत्, तस्मान्नानया वंशदलाकाशविभागो जनयितव्यः। न चान्यदस्य कारणं सम्भवति, तस्माद्वंशलक्रियाजनितो दलयोर्विभागः कार्य्यैकार्थसमवेतः तदवरुद्धाकाशप्रदेशविभागस्यासमवायिकारणमेषितव्यः, एवं च गुणः शब्दो विभागजत्वाद् विभागजविभागवदिति विभागजत्वं गुणत्वनिश्चयहेतुरिति सिद्धं

भवति। परिहरति। अनभ्युपगतविभागजविभागस्य एतद्विभागजत्वमेवं संशयकारणं भवति। अनभ्युपगमबीजं च कुतः पुनरेतदेवमवगतं पद्मपत्रावयवक्रिया न विभागद्वयजनिकेति। विभागद्वयक्रमकल्पनायां प्रमाणाभावादिति चेद् हन्त वंशदलयोरपि तुल्यम्। ननूक्तं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकं स्यात् कर्म ततश्च द्रव्यनाशो न स्यादिति। अथ विपर्य्ययः कस्मान्नभवतीति, वंशदलद्वयक्रियैव विभागद्वयजनिका, पद्मपत्रावयवक्रिया त्ववयवविभागजनिका तदवयवाकाशविभागस्त्ववयवविभाग जन्या, यदि च पद्मपत्रावयवक्रिया उभयजनिका भवेद् वंशदलक्रियेव द्रव्यारम्भकसंयोगप्रतिद्वन्द्विनं विभागं जनयेदिति। न चान्यतरत्र विभागविषययौगपद्यनिश्चयः क्रमप्रमाणाभावश्च तुल्यः, तस्मात्पद्मपत्रावयवक्रियाया विभागद्वयजनकत्वसन्देहादशक्यनिश्चयो व्याप्यव्यापकभावः। क्रियावैलक्षण्यात्तु स्वहेतुवैलक्षण्यजन्मनः कार्यस्य विभागस्य वैलक्षण्यं स्यात्। यदेको द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी, अप्रतिद्वन्द्वी चेतरः, त्वयापि चैतद्वैलक्षण्यं क्रियाया अभ्युपगन्तव्यं, यदेका विभागमेकं जनयति, अन्या तु विभागद्वयमिति। तस्मादेतदुदाहरणबलेन न विभागजविभागसिद्धिः। यस्त्वङ्गुलिकर्मानन्तरमङ्गुलितरुविभागो हस्ततरुविभागः शरीरतरुविभागश्च दृश्यते तत्राङ्गुलितरुविभागमङ्गुल्याश्रया क्रिया करोतु, हस्ततरुविभागन्तु न शक्ता जनयितुमं तस्याः स्वाश्रयासमवायात्, स्वाश्रयसमवेतकार्य्यजनने च क्रियायाः सामर्थ्यावधारणात्, तस्माद्धस्तादितरुविभागः क्रियातोऽसम्भवन्नङ्गुलितरुविभागमेव कार्य्यैकार्थसमवायलक्षणप्रत्यासत्त्या निमित्तीकरोतीति विभागजविभागसिद्धिं मन्यते, तं प्रत्याह। यः पुनरिति। अस्तु वा विभागजो विभागः, तथाऽपि विभागजत्वमीदृशमसाधारणमेवेत्याह। अस्तु वेति। अस्तु तस्याभ्युपगतविभागजविभागस्यापि विभागजत्वमसाधारणं विशिष्टम्, तदेव दर्शयति। विभागजेति। पाट्यमाने हि वंशे शब्दोत्पत्तौ वंशदलयोर्विभागो निमित्तकारणं, वंशदलावरुद्धाकाशविभागस्त्वस्यासमवायिकारणं, न तु भेर्य्याकाशसंयोगवद् वंशदलाकाशसंयोगोऽसमवायिकारणं भवितुमर्हति। तथा हि प्रयोगः, योऽयं वंशदलविभागनिमित्तः शब्दः स निमित्तसमानजातीयासमवायिकारणजन्यः, तदसाधारणनिमित्तजन्यशब्दत्वात्, यो यः शब्दो यदसाधारणनिमित्तजन्मा स सर्वस्तज्जातीयासमवायिकारणजन्यः, यथा भेरीदण्डसंयोगानिमित्तः शब्दो भेर्य्याकाशसंयोगसमवायिकारणकः, तथा चायं तस्मात्तथा। तदेवं

वंशदलविभागलब्धजन्मना वंशदलाकाशविभागेनासमवायिकारणेन जनितः शब्दः। तदेवं विभागजविभागासमवायिकारणकत्वं शब्दस्य। तदपि यद्यप्यङ्गुल्याकाशविभागजहस्ताकाशविभागासमवायिकारणे कायाकाश-विभागेऽस्ति, तथाऽपि कारणमात्रविभागजविभागासमवायिकारणकत्वादिति हेतुर्भाष्यकारेण विभागजत्वादित्यनेन सूचितः। न चाङ्गुल्याकाशविभागपूर्वकः कायाकाशविभागः एवं, स हि कारणाकारणविभागपूर्वको न तु कारणमात्रविभागपूर्वकः, तदिदमुक्तं विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति। ननु सहचरितो दृष्टः स्मारयन् विशेषसंशयहेतुर्भवति, न तु यो व्यावृत्तः, तेनासाहचर्य्यादिति शङ्कामपनेतुं भाष्यकारीयमुत्तरमाह। तुल्यजातीयेष्विति। यद्यपि व्यतिरेकमुखेनासाधारणः शाक्तः स्मारयितुं, तथाऽपि भाष्योक्तमप्युक्तं यत्खलु सदादिरूपसम्पन्नं विशेषवत्तत्समानजातीये-भ्योऽसमानजातीयेभ्यश्च व्यावृत्तं, यथा पृथिवीद्रव्यम् अबादिभ्यश्च द्रव्यान्तरेभ्यो गुणकर्म्मभ्यश्च विजातीयेभ्यो गन्धवत्त्वेन व्यावृत्तं द्रव्यजातीयमेवं रूपत्वेन रूपं गुणः उत्क्षेपणत्वेनोत्क्षेपणं कर्म, तथाविधः शब्दः सदादिरूपसम्पन्नो विभाजत्वेन समानासमानजातीयेभ्यो विशिष्यते, तस्माद्भवति द्रव्यं गुणः कर्म्म वेति संशय इति। पूर्वव्याख्यानतोऽनेकशब्देनासाधारणो धर्मो लक्ष्यत इत्युक्तं, सम्प्रति समानशब्दपर्य्यालोचनयाऽप्यनेकशब्दोऽसाधारणे वर्त्तते लक्षणयैवेत्याह। समानधर्मस्य संशयकारणत्वेनोपयोगाद्वेति। समानं हि प्रतियोगितयाऽसमानं बुद्धौ सन्निधापयति, तत्र द्वयस्यापि समानशब्देन श्रुत्यर्थाभ्यामुपात्तस्य समानधर्मस्यासमानस्य च समानस्य संशयकारणत्वेनोपयोगादिति योजना। पृच्छति। कस्मादिति। अस्मादायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह इति भावः। उत्तरम्। नैवमिति। असाधारणो हि धर्मो व्यतिरेकमुखेन संशयहेतुः, स चानेकस्माद्व्यावृत्त्या सिध्यति, सा च लाक्षणिकानेकापदाधीना नासमानपदाल्लभ्यत इति प्रयोजनवल्लाक्षणिकपदोपादानम्। लक्षणैव चेयमनेकस्माद्व्यावृत्तोऽनेकधर्म इति विग्रहेण निर्वर्ण्यत इति। अभ्युच्च-यमात्रमाह। लाघवं वेति। असाधारणस्य संशयकारणत्वे व्यावृत्तिः प्रयोजिकेति मन्वानश्चोदयति। यद्यनेकेति। परिहरति। नैष दोष इति। व्यभिचाराव्यभिचारौ हि संशयनिर्णययोः प्रयोजकौ नान्वयव्यतिरेकमात्रमित्यर्थः। चोदयति। यदि तर्हीति। सपक्षासपक्षसाधारण्यं हि हेतोर्व्यभिचारः, स चेत्संशयस्य कारणं हन्त समानधर्मोपपत्तिरेव सर्वत्र संशयकारणमिति कृतमनेकग्रहणेनेत्यर्थः।

परिहरति। सत्यमिति। सत्यं सपक्षासपक्षासाधारण्यं हि हेतोर्व्यभिचारः, स च संशयस्य प्रयोजकः, तथाऽप्येकस्यान्वयः साधारणोऽपरस्य व्यतिरेक इत्येतावतोभयोपादानमित्यर्थः।

एवमनेकधर्मोपपत्तेरिति स्वमतेन व्याख्याय परमतव्याख्यानं दूषयितुमुपन्यस्यति। नञ इति। नित्यः शब्दः श्रावणत्वात् शब्दत्ववदित्येकः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुः, अनित्यः शब्दः कृतकत्वाद् घटवदित्यपरः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुरिति। तद्दूषयति। तदयुक्तमिति। न ह्यव्यभिचारिणौ पञ्चरूपोपपन्नावित्यर्थः। न चायं प्रतिवादिनः प्रयोगोऽपि युक्तः। विरुद्धशब्दस्यार्थो विरुद्धार्थः स्वरूपमनयोर्विरुद्धं परस्पराभाववदित्यर्थः। विशेषादर्शनादुपजात इति। संशयस्य हि विशेषादर्शनं जनकं, विशेषदर्शनं च निवर्तकमिति, स चेत् त्वन्मते निवर्तकादुत्पद्येताऽव्यभिचारिहेतुजनिताद्विशेषदर्शनान्नास्य निवृत्तिः स्यादित्यर्थः। न च यदा निवर्तकमस्यास्ति, तदा जनकमपीत्याह। न हि विशेषदर्शने सतीति।

स्यादेतत्। प्रत्यक्षमेव स एवायं गकार इत्याकारं प्रत्यभिज्ञासमाज्ञातं शब्दस्य स्थेयमानमाकलयेत्।

'तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति।'

इति नित्यत्वं परिच्छेत्स्यतीत्यत आह। नायमर्थः प्रत्यक्षस्य विषयः। तदेव हि प्रत्यक्षं संशयस्य निवर्तकं यदनन्यथासिद्धं, यथौष्ण्यग्राहि वह्नेः। इदं तु सादृश्येनापि सम्भवात्स्वयं सन्दिग्धं सन्न संशयोच्छेदायालमित्यर्थः। मा भूत्प्रत्यक्षस्य विषयो भवति त्वागमस्य, नो खलु क्षणिकः शब्दोऽर्थप्रत्यायने समर्थः, तस्यान्वयव्यतिरेककालानवस्थायिनोऽशक्यसमयत्वेनार्थप्रतिपत्तेरनुपपत्तेः। तस्माद्यद्यपि साक्षान्नित्योऽयमित्यागमो नाभिधत्ते, तथाऽपि विदितसङ्केतेरर्थप्रत्ययं कुर्वन्नात्मनो नित्यतामाक्षिपन्नित्यताविषयो भवति, यथाऽऽहुः "नित्यस्तु स्याद्दर्शनस्य परार्थत्वा" दित्यत आह। नागमविषयः। यद्यपि वर्णव्यक्तयः क्षणिकाः, तथाऽपि स्वस्वसामान्यविशेषगत्वाद्युपहिता गवादिव्यक्तय इव गोत्वाद्युपधानाः शक्यसङ्केता इति न नित्यतामाक्षिपत्यागम इत्यर्थः। भवतु किं नो बाध्यत इति। न खलु चन्द्रमसः परभागे हरिणसद्भावसन्देहः शक्यः कदाचिदप्युच्छेत्तुमस्मदादीनामित्यर्थः। कथं न बाध्यत इति।

सन्दिग्धनित्यानित्यभावे शब्दे कृतकत्वं दृष्टमिति नानित्यत्वेन स्वभावतः प्रतिबद्धं, तथा च न बुद्ध्यादीनामनित्यत्वं साधयितुमर्हतीत्यर्थः। सर्वमिति। कृतकत्वप्रयत्ननान्तरीयकत्वप्रत्ययभेदभेदित्वादित्यर्थः। सर्वं चानुमानमिति। यदि च पञ्चरूपोऽपि हेतुः संशयकारणं सर्वमनुमानमेवमिति सर्वमप्रमाणं स्यादित्यर्थः। वैनाशिकः प्राहुः। नित्यासम्भवादिति। न बाधापरिज्ञानादिति। बाधविषयापरिज्ञानादित्यर्थः। स्वदेशे परोत्पत्तिप्रतिबन्धकत्वं सप्रतिघत्वं, सौत्रान्तिकमते हि रूपं सप्रतिघमिष्यते मूर्तं च। नित्य एवेति अनित्य एवेति वाऽभिलापो नोपपद्यते, स्थाणुरेवेति वा पुरुष एवेति वाऽभिलापः। चोदयति। नैवं भविष्यतीति। मा भूदभिलाप इत्यर्थः। परिहरति। व्याहतमिति। स एवैकग्रन्थेनाह। ननु चेति। तदेवं पञ्चरूपोपपन्नयोर्हेत्वोरेकत्र समावेशाभाव उक्तः। यदि पुनरसत्प्रतिपक्षत्वरूपरहितयोरेकत्र सम्भवोऽङ्गीक्रियते तथा च संशयहेतुत्वमित्यभिप्रायेण शङ्कते। अथ कृतकत्वेति। निराकरोति। तथाऽपीति। प्रत्येकं सत्प्रतिपक्षत्वं मिलितयोस्त्वसाधारणत्वं, तादृशोऽन्यत्रादर्शनादित्यर्थः। तत्किमिदानीं सत्प्रतिपक्षतया कृतकत्वमसाधनमेव शब्दानित्यत्वे, तथा च बहु व्याहतं स्यादित्याशयवान् पृच्छति। यद पुनरेवम्भूताविति। उत्तरम्। तदा तयोरिति। ननु कृतकत्वस्य साध्यत्वात् श्रावणत्वस्य च सिद्धत्वात् प्रथमभाविना नित्यानुमानेन सिद्धाङ्गकेनापहृतविषयं चरमभाविसाध्याङ्गकमनित्यानुमानमेव बाध्यतामित्यत आह। यत्नश्च क्रियमाण इति। सिद्धमपि श्रावणत्वमनुनासिकत्वाद्यनित्यधर्मसाधारणतया सव्यभिचारं सन्नित्यत्वस्य साधनं न भवितुमर्हतीति। कृतकत्वस्य तु पाञ्चरूप्यं नित्यस्य च प्रमाणबाधनमुपपादयिष्यत इत्यर्थः।

विप्रतिपत्तेरित्यस्य व्याख्यानम्, विप्रतिपत्तेरिति। यद्यपि विरुद्धा प्रतिपत्तिर्ज्ञानं विप्रतिपत्तिः, तथाऽपि तस्या वादिप्रतिवादिगताया अत्यन्तपरोक्षत्वात्संशयकारणत्वानुपपत्तेः स्वकार्य्यं प्रवादं लक्षयतीत्यर्थः। अत्र भाष्यकार उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च पृथक् संशयकारणत्वं मत्वा समानधर्म्मोपपत्तेरित्यनेन गतार्थतां परिहरन्नाह स्म, पूर्वः समानोऽनेकश्चेत्यादि। तदुपन्यस्य वार्तिककारो दूषयति। तत्रेति। नो खलु समानानेकधर्म्मोपलब्धौ सत्यां सत्यां च विशेषस्मृतौ साधकबाधकप्रमाणसद्भावे संशयो भवतीत्युक्तं, तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्थे पृथक् संशयकारणे इति। विशेषमपि दूषयति। समान इति। ननु यदि नास्ति भेदः, तत्किमिदानीं सर्वेषां ज्ञातृस्थत्वाविशेषेण त्रयाणामपि संशयकारणानां समानानेक-

विप्रतिपत्तीनामभेदस्तथा च पृथगुपादानवैयर्थ्यमित्यत आह। समानानेकधर्मयोरिति। पुनश्चोदयति। समानधर्मः सर्व एवायमिति। अयमभिसन्धिः, असाधारणो ह्यदृष्टपूर्वः क्वचिदपि न संशयं कर्त्तुमुत्सहते, यत्पुनरसाधारणवत्त्वं संशयहेतुत्वेनोपवर्णितं भाष्यकृता, तत्समानमेव, न त्वसाधारणम्, यथाऽऽहुः,

''अन्योऽसाधारणो धर्म्मस्तद्वत्ताऽन्या च दृश्यते।

सर्वसाधारणी सा चेद्दिष्टा संशयकारणम्।

ततः साधारणस्यैव सिद्धा संशयहेतुता।।'

यच्च वार्तिककारेण सर्वव्यावृत्त्याऽसाधारणस्य संशयकारणत्वमुक्तं, तत्रापि तदभावस्य साधारणस्य संशहेतुत्वं, किमायातमसाधारणस्य। यथाऽऽहुः,

''सर्वतोऽस्य निवृत्तत्वादभावात्संशयो यदि।

अनन्यवृत्तिरूपस्य ततोऽसाधारणस्य किम्।'' इति।

विप्रतिपत्तिरपि विरुद्धहेतुद्वयसमुत्था एकस्मिन् संशयकारणम्। विरुद्धहेतुद्वयसमावेशश्चासाधारण एव, स च साधारणे निविशत इति सूक्तं सर्व एवायं समानधर्म एवाभिधीयत इति। परिहरति। न सूत्रार्थापरिज्ञानादिति। न वयं सर्वत्र साधारणमपजानीमहे, अन्वयव्यतिरेकव्यभिचारवक्तृगतत्वभेदमात्र-मादि्रयमाणाः कारणभेदेन त्रिविधं संशयमाचक्ष्मह इत्यर्थः। वार्त्तिककारो भाष्यकारमतमुपन्यस्य दूषयति। अपरे पुनरिति साधकबाधकप्रमाणाभावरहितं त्रयमपि न संशयकारणमुक्तमित्यर्थः। अपि चैतयोः पृथक् संशय-कारणत्वेऽतिप्रसङ्गान्निश्चयपूर्वं न प्रवर्त्तेत लोकः, तथा च लोकविरोध इति दर्शयति। उपलब्ध्यनुपलब्ध्योर्द्वैविध्याच्चेति। न चास्य क्वचिदाश्वासा निःशङ्कता। न चानभ्यासदशापन्ने उपलब्ध्यनुपलब्ध्यव्यवस्थायाः संशय इति वाच्यम्। अनभ्यासदशापन्ने हि दूराद्वह्निज्ञाने उपलब्ध्व्यवस्थाया अपि न नागो नगो वेति संशयः, किं तु किंशुककुसुमनिचयो वा उपर्बुधो वेति, अत्र समानधर्मोपपत्तिरेव कारणमितरसहिता, एवमयोग्यानुपलब्धिमात्रादपि न संशयो विना समानधर्मादिदर्शनमित्युक्तम्। विकल्प्य दूषणान्तरमाह। येषां चेति। सामग्रीभेदेन त्रैविध्यं संशयस्य, सामग्रीनिवेशिकारणभेदेन तु न पञ्चविधोऽपि त्वनेकविध इत्यर्थः।

समानानेकधर्म्मोपपत्तेरित्यत्र षष्ठीतत्पुरुषं मत्वाऽऽक्षिपति। समान-धर्मग्रहणादिति। बहुव्रीहिं मत्त्वा समाधत्ते। अयं परिहार इति। अथेति। कश्चासौ विशेषश्चेति किंविशेषः, अनुपलब्धपूर्वो विशेषो यस्य इत्यर्थः। उपलब्धपूर्वायां व्यक्तौ संशये तद्गता विशेषाः सुस्मूर्षिताः तज्जातीय-व्यक्त्यन्तरसंशये त्वन्यगतास्ते सामान्यद्वारेणोपलब्धा एवेति। सामान्यप्रत्यक्षादिति। सामान्यमेव सामान्यः, यथा सामान्योऽयं धर्मसेतुर्नृपाणामिति। सामान्यश्चासौ प्रत्यक्षश्चेति धर्मी तथोक्तः, अव्यवस्थितविशेषत्वं साधकबाधकप्रमाणाभाव इत्यर्थः।

बौद्धाभिमतं संशयलक्षणमुपन्यस्यति। अन्ये त्विति। गूढाभिप्रायो दूषयति। तैरपीति। अविदिताभिप्रायः शङ्कते। धर्मी चेदिति। दूषणवादी स्वाभिप्रायमुद्घाटयति। यदि तावदिति। बौद्धानां हि राद्धान्ते न रूपादिधर्म्माश्रयः कश्चिदस्ति धर्मी, ततश्च सिद्धान्तव्याकोपः। यदि त्वाह, भवतु राद्धान्तव्याकोपो न हि शास्त्राश्रयो वाद इति, तत्रापि दोषान्तरमाह। धर्मधर्म्मिणोश्चेति। अथाप्यस्मद्दिशेति। समानानेकधर्मपदवद्बहुव्रीहिरित्यर्थः। सामान्यशब्दो हि भवितरि दृष्टो यथा।

''सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः''।

इति भावः। व्यर्थं चाभिधानमिति। सामान्यविशेषतद्वदभ्युपगमेऽपि तद्वतोऽश्रवणात् साधर्म्यस्य सामान्यस्य विशेषा इति गम्येत, न च सामान्यस्य विशेषा इति विरुद्धार्थमभिधानं स्यादित्यर्थः। वैशेषिकलक्षणे हि विशेषाप्रत्यक्षादित्यनेन साधकबाधकप्रमाणाभावो दर्शितः, इह त्वसौ वक्तव्यः, तस्या न्यूनं बौद्धलक्षणमित्याह। उपलब्धीत्यादि। यदि च साधर्म्यदर्शना-दित्यनेनान्वयमात्रव्यभिचारोऽभिमतो बौद्धेन ततोऽनेकधर्मदर्शनादिति वक्तव्यमिति।

तदेवं सामान्यलक्षणमेकं त्रीणि च विशेषलक्षणानीति स्थितम्। तदेतानि चत्वारि लक्षणानि पुञ्जीकृत्य विचारयति। समानेति। यदि तावत्संशयसामान्य- लक्षणे स्थिते त्रीणि विशेषलक्षणानि, ततः संशयत्वेनोपगृहीतानां त्रयाणां परस्परव्यवच्छेदकमात्रं लक्षणं वक्तव्यं, ततः सामानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्येतावन्मात्रं वक्तव्यं, कृतमत्र शेषेण, तन्मात्रादेव

परस्परव्यवच्छेदसिद्धेः। तस्मात्परस्परव्यवच्छेदमनपेक्ष्य संशयकारणकथन-परमेतत्सूत्रं, तथा चान्यान्यपि संशयकारणानि सन्तीति तान्यपि वक्तव्यानि, यदा खल्वयमात्मनः शमादौ संशेते किमहं चन्दनवनितादिसन्निधाने रज्ये विरज्ये वेति सोऽयमस्यात्मनः सन्निकर्षजन्मा संशयः आन्तरस्य शमादेर्विषयस्येति। समाधत्ते। अस्तु तावदिति। यद्यपि तावन्मात्रेण समानजातीयव्यवच्छेदसिद्धिः, तथाऽपि विजातीयव्यावर्तनाय सामान्यलक्षण-मनुवर्त्तनीयं, तथा च प्रतिपत्तिगौरवं स्यादिति तल्लाघवाय शेषापेक्षा युक्ता। आत्मनः सन्निकर्षादयस्त्वत्यन्तसाधारणा विजातीयव्यवच्छेदायापि नालमिति नोपात्ता इति भावः। एवं संशयकारणावधारणादर्थात्संशयभेदा- वधारणमित्युक्तं, सम्प्रति कारणविशेषेण संशयस्वरूपमेवोच्यत इत्याह। स्वरूपनिर्देशो वेति। विप्रतिपन्नोऽपि पुरुषः सन्दिग्धवत्प्रतिपाद्य एवेति। मन्वानश्चोदयति। संशयवदिति। विप्रतिपन्नो न शिष्यः, किं तु जल्पवितण्डाभ्यां शिष्यतां नीत्वा सन्दिग्ध एव प्रतिपाद्यत इत्यभिप्रायेण परिहरति। सत्यमिति।।23।।

# न्यायवार्त्तिकतात्पर्यटीकायां संशयः

अत ऊर्ध्वं प्रमाणादिपरीक्षेत्यादिभाष्यनिराकरणीयामाशङ्कामाह वार्तिककारः त्रिविधा चास्येति। (18/1/4) स्थानवतां क्रमवतां परीक्षावचनमिति प्रमाणमेव परीक्ष्यत इति युक्तमिति। किमत्रादौ प्रमाणं न परीक्षितं, किं तु संशय एव परीक्ष्यत इत्याह। तानि विलङ्घ्यति, सोऽयं क्रमभेदः कुत इति भाष्यार्थमाह। परीक्षाङ्गत्वादिति। उद्देशक्रमानुरोधेन हि प्रमाणं पूर्वलक्षितं न तु लक्षणे संशयस्यास्ति कश्चिदुपयोगः। परीक्षा तु सर्वा विमर्षकरणिकेति परीक्षापर्वणि सर्वथाऽऽर्थक्रमेण संशयस्य पूर्वभावः। यथाऽग्निहोत्रं जुहोति, यवागूं पचतीत्यत्राग्निहोत्रात्प्राग्भावो यवागूपाकस्य, तस्याग्निहोत्रसाधनत्वात्। संशयलक्षणं चात्र परीक्ष्यते न संशय इति नानवस्थाऽपि। देशयति। ननु चोक्तमिति। शास्त्रगता त्वियं परीक्षा, सा च न विमर्शपूर्वेत्यार्थक्रमाभावान्नोद्देशक्रमो बाधनीय इत्यर्थः। परिहरति सत्यं न निर्णये नियम इति। न निर्णयः सर्वः संशयपूर्वः, विचारः सर्व एव संशयपूर्वः, शास्त्रवादयोश्चास्ति विचार इति तेनापि संशयपूर्वेण भवितव्यम्। शिष्ट्योश्च वादिप्रतिवादिनोः शास्त्रे विमर्शाभावो न शिष्यमाणयोः, तस्मादस्ति। शास्त्रेऽपि विमर्शपूर्वो विचार इति सिद्धम्। संशीतिरिति संशयस्य निरुक्तम्। (182/2) नावधारयतीत्यर्थः। ननु यथा लक्षणार्थः पूर्वनिरूपितस्तथा निर्बीजः पूर्वपक्ष इत्यत आह। तस्य यथाश्रुतीति। परीक्षासाध्यो ह्यर्थस्तत्र व्याख्यानेन लक्षणपदेभ्यः साक्षादेव गम्यत इत्यर्थः। समानमनयोरिति साक्षात्कारं दर्शयति। न हि साक्षात् स्थाणुपुरुषावुपलभमानः समानं चानयोर्धर्मं कश्चित्सन्दिग्ध इत्यर्थः। व्यवच्छेदात्मकत्वादिति। न निश्चयोऽनिश्चयस्य जनकः, कारणानुरूपत्वात्कार्यस्येर्थः। न समानधर्माध्यव-सायादेवेति संशयलक्षणोक्तकारणमात्रोपलक्षणपरम्। एकवृत्तित्वाच्चेति। न हि यावेवारोहपरिणाहौ स्थाणोस्तावेव पुरुषस्येत्यर्थः।। 1।। 2।।

विप्रतिपत्तौ च समप्रतिपत्तेरिति न स्वरूपविरोधाद्विप्रतिपत्तिरस्तीत्यर्थः। ।।3।।4।।

तथाऽत्यन्तसंशय इति तत्पदान्तरेण समानधर्मोपपत्त्यादेर्विशेषणमपश्यतः पूर्वपक्षः। 5।।

सिद्धान्तमाह अस्योत्तरमिति।

यथो वा (सू. 6)।। यदि निर्विशेषणं समानधर्मोपपत्त्यादि संशयकारणमुच्येत ततः पश्चादकरणात्पूर्वमपि न कुर्यादित्यसंशयः पूर्वं वा करणात्पश्चादित्यन्तसंशयः, न त्वसौ निर्विशेषणः संशयकारणमिति नासंशयो नात्यन्तसंशय इत्यर्थः। एतेनेति समानपदप्रयोगेण। सदृशार्थो हि समानशब्द इति पूर्वं व्याख्यातम्। यदप्येतत् सारूप्याभावादध्यवसायसंशययोः कार्यकारणयोरिति। विशेषानवधारणमुभयोः समानमित्यर्थः। भाष्यकारणेन तु यत्सारूप्यमुक्तं तत्तथा न बोद्धव्यम्। यदि हि कार्यकारणयोरुत्पत्तिः सारूप्यं तदतिव्यापकं चाव्यापकं च। नित्यानामपि कारणत्वात्। तस्मात्सारूप्यशब्दो न सारूप्यस्य निर्देशः। अपि तु कार्यकारणधर्मान्वयव्यतिरेकपर इत्याह। कारणसद्भावादिति। अनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम्। सत्प्रतिपक्षयोरपि मिलितयोरन्यत्रादर्शनेनासाधारण एवान्तर्भावात्, एकैकविवक्षया तु हेत्वाभासान्तरत्वमिति भावः। न चाव्यवस्थातः संशय इति। नासौ पृथक्कारणमपि तु समानधर्मोपपत्त्यादिपरिकरतयेत्यर्थः। यत्पुनरेतद्विप्रतिपत्ताविति। विषयापेक्षया विप्रतिपत्तिः स्वरूपापेक्षया सम्प्रतिपत्तिरित्ति। एवमव्यवस्थायामपि द्रष्टव्यम्।।6।।

कोऽस्य सूत्रस्येति तात्पर्यप्रश्नः। उत्तरं स्वयमिति। संशयपूर्वकत्वात्स-र्वपरीक्षाणां परिचिक्षिषमाणे संशयाक्षेपहेतुभिर्न प्रतिषेद्धव्योऽपि तु परैरेवमाक्षिप्तः संशय उक्तैः समाधानहेतुभिः समाधेयः। यथोहित्वेति भाष्ये यदप्युक्तमित्यर्थः शास्त्रकथायां वादलक्षणायामित्यर्थः।।7।।

# न्यायसारे संशयः

तत्रानवधारणज्ञानं संशयः। स च समानधर्माऽनेकधर्मविप्रतिपत्त्युपलब्ध्यनुपलब्धिकारणभेदात् पञ्चधा भिद्यते-तद्यथा-समानधर्मात् किमयं स्थाणुःस्यात् पुरुषो वेति?, अनेकधर्मादाकाशविशेषगुणत्वात्किमयं शब्दो नित्यः स्यादनित्यो वेति?, विप्रतिपत्तेः एके भौतिकानीन्द्रियाण्याहुः, अन्ये त्वभौतिकानीति, उपलब्धेः- किं सदुदकमुपलभ्यते? उतासदिति?, अनुपलब्धेः- किं विद्यमानः पिशाचो नोपलभ्यते, उताविद्यमान इति?

# न्यायभूषणे संशयः

## संशयलक्षणम्

तच्च संशयविपर्यययोरस्ति लोकशास्त्रयोस्तथाव्यवहारदर्शनादिति। नाज्ञातस्वरूपं हातुमुपादातुं वा शक्यमित्यतस्तयोः स्वरूपं वक्तव्यमिति । अथेदमुच्यते—"तत्रानवधारणज्ञानं संशयः"। अनवधारणं च तज्ज्ञानं चेति। व्याघातान्न युक्तमिति चेत् न; गोशब्दादिवज्जातिनिमित्तत्वाज्ज्ञानशब्दस्य। यथा गोपङ्कजादिशब्दा न व्युत्पत्तिवशेन स्वार्थेषु रूढाः, किं तर्हि? जातिनिमित्तत्वेन तथा ज्ञानशब्दोऽपि ज्ञानत्वजातिनिमित्तः स्वार्थे निरूढः। सा च ज्ञानत्वादि-जातिर्निश्चयानिश्चयस्वभावासु व्यक्तिषु वर्तते। अनिश्चयज्ञानं चानवधारणमित्युक्तम्। अत एव निर्विकल्पकप्रत्यक्षस्य संशयत्वं न प्रसज्यते, तस्यापि निश्चयात्मकत्वात्। निश्चयात्मकत्वं च तत्प्रभवस्मृत्यनुमेयम्। तथाहि—इदं वस्तु तत्र नास्त्येव, अनेन सदृशमेव तद्वस्तु, एतस्मादधिकं न्यूनं चेत्येवमात्मिका स्मृतिः पूर्वानुभवं निश्चयात्मकं सूचयति। यतश्चानुभवाद-निश्चयात्मिका स्मृतिरुत्पद्यते स संशय एवानिश्चयात्मकत्वात्। अनुभवाकारानुकारिणी हि स्मृतिः, सा कथमन्यथा भवेदिति? प्रथमाक्षदर्शनजं ज्ञानं विशेषदर्शनादिनिमित्तमन्तरेणोपजायमानं निश्चयात्मकं संशयात्मकं वा कथं भवितुमर्हतीति चेत्, न; अदृष्टादिसामग्रीवशात् तथोत्पत्तेः। अन्यथाऽनवस्थाभयाद् विशेषदर्शनमन्तरेणोपजातं विशेषदर्शनमनिश्चयात्मकं स्यात्। तस्य च अनिश्चयात्मकत्वे विशेषवतोऽप्यनिश्चय इत्यनिश्चयात्मकं जगत् स्यात्। न हि शिरः पाण्यादिविशेषानिश्चयज्ञानात् पुरुषेऽनिश्चयो दृष्टः। अदृष्टादेश्च सामर्थ्याभ्युपगमे ततः एव निश्चयो भवतु, किमनिश्चयात्मकेन विशेषदर्शनेनानुपपन्नप्रमाणके नेति? तदेवं विशेषदर्शनादिनिमित्तमन्तरेणापि क्वचिन्निश्चयात्मकमनिश्चयात्मकं च ज्ञानमस्तीत्यतो निरवद्यं लक्षणम्—"अनवधारणज्ञानं संशयः" इति। मात्रादसंभवी संशय इति चेत्, न; अनवधारणात्। न ह्येवमवधार्यते समानधर्मादेव संशय

इति किं तर्हि? इन्द्रियार्थसन्निकर्षवदसाधारणकारणवचनं समानजातीयव्यवच्छेदार्थम्, विजातीयव्यवच्छेदस्तु सामान्यलक्षणेनैव कृतत्वान्नानुक्रियते, सामान्यलक्षणानुवादेन हि विशेषलक्षणं द्रष्टव्यम्। तेनायमर्थः सिद्ध्यति-समानधर्मात् सामग्र्यन्तःपतितादनवधारणज्ञानं भवति, तदनेकधर्माद्युपलक्षितसाभग्रीजनितेभ्यः संशयेभ्योऽर्थान्तरमिति। एवमन्यत्रापि व्याख्यातव्यमित्यतो नातिव्याप्तिदोषोऽप्यस्ति।

सूत्रकारेण तूपलब्ध्यनुपलब्ध्यव्यवस्थादिग्रहणं कुचोद्यपरिहारार्थं सहकार्युदाहरणार्थे च कृतं, न त्वनेनैव सम्पूर्णा सामग्री प्रतिपाद्यते अदृष्टान्तःकरणादेरनभिधानात्। कुचोद्यं पुनरत्रैवं भवति समानधर्मोपलम्भोपि न संशय कारणं, सत्यपि तस्मिन् गच्छतस्तृणादिषु संशयानुपलब्धेरिति। तत्रोत्तरम्- विशेषापेक्षा इति, विशेषेष्वपेक्षा आकांक्षा स्मृतिरूपा यस्य संशयस्य कारणत्वेन स तथोक्तः। किमुक्तं भवति? विशेषाकांक्षा च यतः संशयकारणम्, अतः तामन्तरेणापि संशयो न भवति। न च यस्य सद्भावेऽपि सहकारिकारणाभावात्कार्यं नोत्पद्यते तस्याकारणत्वमेव, सर्वस्याप्यकारणत्वप्रसंगादिति।

नन्वेवपि दूरस्थायां प्रियतमायामुभयसद्भावेऽपि संशयो न भवति, अतोऽकारणं विशेषाकांक्षासहितोऽपि समानो धर्म इति। अस्योत्तरम्- उपलब्ध्यनुपलब्ध्यव्यवस्थात इति। विधिप्रतिषेधत्वेन निश्चयकारणाभावादित्यर्थः। एतदुक्तं भवति न विशेषाकांक्षैव सहकारिकारणं किन्तूपलब्ध्यनुपलब्ध्यवस्थापीत्यतस्तदभावेपि संशयो न भवति। तथा वेगेन गच्छतःपनसादिषु वृक्षसमानधर्मोपलम्भेऽप्युपलब्ध्यनुपलब्ध्यव्यवस्थायामपि विशेषाकांक्षाभावान्न संशयो भवतीत्यतः सकलसहकार्युपेतस्यैव समानधर्मस्य संशयहेतुत्वमभ्युपगम्यत इति। अदृष्टादेश्च कार्यान्तरेष्वपि साधारणत्वादनभिधानेऽपि सहकारित्वं लभ्यते इत्यभिप्रायवताऽत्र नोक्तम्। समानधर्मवदनेकधर्मादेरप्यशेषसहकार्युपेतस्य संशयहेतुत्वं व्याख्येयमिति। अस्यैवार्थः परीक्षायां प्रपञ्चित इत्यपौनरुक्त्यम्। समानधर्म इत्यत्र समासद्वयं विकल्पेन द्रष्टव्यम्-कर्मधारयः षष्ठीतत्पुरुषश्चेति। यदा कर्मधारयस्तदा समानः = सदृशः परिमाणादिलक्षणो धर्मः प्रत्याश्रयं भिन्नो लभ्यते। यदा तत्पुरुषः तदा प्रत्याश्रयमभिन्नो धर्मः सामान्यावयवसंयोगादिलक्षणो लभ्यते इति। अत्रोदाहरणम्-तद्यथेति। ऊर्ध्वत्वं च दिग्विशेषावस्थिते दीर्घद्रव्ये

ऊर्ध्वप्रत्ययनिमित्तम्। तच्च परिमाणं वा भवतु सामान्यं वा षट्पदार्थव्यतिरिक्त-धर्मसंज्ञकं वा नास्य विचारः क्रियते अनुपयोगित्वादिति।

अनेकधर्मादिति। विवक्षितजातीयं तद्विपरीतं चानेकम्। अनेकस्माद् व्यावर्त्तको धर्मोऽनेकस्यासंबन्धी वाऽनेकस्मिन्प्रतिषिद्धो वाऽनेकप्रत्ययहेतुर्वा भेदसाधकत्वेनेत्यतोऽनेक धर्म इति सर्वत्र मध्यमपदलोपेन समासः, सर्वथाऽप्य-साधारणधर्मोऽभिप्रेतः। तथा चाकाशादिविशेषगुणत्वात् किमयं शब्दो नित्यः स्यादनित्यो वेत्युदाहरणम्। कथं पुनरसाधारणो धर्मः संशयं करोति? नह्ययं विरुद्धविशेषैः सह कदाचिदुपलब्धोऽपि येनास्योपलम्भः तत्स्मृतिहेतुः स्यात्। न चाप्रतिबद्धार्थदर्शने स्मृतिर्युक्ता, सर्वदा सर्वानुभूतार्थस्मृतिप्रसंगात्। नच विरुद्धविशेषानुस्मृतिमन्तरेण संशयो भवति, अदृष्टत्वात्। अपि चायमसाधारणो धर्मः स्वधर्मिणां विशेष एव, विशेषदर्शनाच्चान्योऽपि संशयो निवर्त्तते, कथं ततः संशयो भवतीति? नहि गोत्वदर्शनाद् गवि संशयः प्रादुर्भवन्नुपलभ्यते, अनुच्छेदप्रसंगाच्च। यस्तावत्समानधर्मदर्शनोत्पन्नः संशयः स विशेषदर्शनान्निवर्त्तते, यस्तु विशेषदर्शनादुत्पन्नः, स कुतः प्रध्वंसमासादयिष्यतीति? तस्मान्नासाधारणो धर्मः संशयहेतुरिति।

अत्रैके प्रतिसमाधानं कुर्वन्ति—तुल्यजातीयेष्वर्थान्तरभूतेषु च विशेषस्यो-भयथा दृष्टत्वान्न विरुद्धविशेषैः सहादर्शनमसाधारणस्येति। एतदुक्तं भवति यदा तुल्यजातीयत्वेनानित्याः पदार्था विवक्षितास्तदार्थान्तरभूता नित्या उक्ताः तेषु = तुल्यजातीयेषु घटादिषु अर्थान्तरभूतेषु चात्मादिषु विशेषस्य घटत्वा-देरात्मत्वादेश्च उभयथा = प्रकारद्वयेन नित्यत्वानित्यत्वसहचरितत्वेन दृष्टत्वात्= प्रमाणेनोपलब्धत्वादित्यर्थः। अस्ति च शब्दे विशेषः श्रावण-त्वमाकाशविशेषगुणत्वं च। तन्न विद्मः, किं नित्यस्य सतः शब्दस्यायं विशेष? उतानित्यस्येति? नेदं संशयकारणं समानधर्मादर्थान्तरं, कथम्? विशेषवत्त्वं हि विरुद्धविशेषस्मृतिहेतुत्वेन संशयनिमित्तं, तच्च सामान्यवत्त्वा-दिवन्नित्यानित्ययोः समानमिति कथमर्थान्तरं भवेत्? पूर्वं साधारणधर्मवत्त्वमुक्त-मिदानीं त्वसाधारणधर्मवत्त्वमित्येतावतैव विशेषेण पृथग्वचनमित्येके। वयन्त्वसाधारणेनैव रूपेणास्य संशयहेतुत्वं वर्णयामः। कथमिति? नित्येभ्यो व्यावृत्तत्वम्, अनित्येष्वेव दृष्टम् अनित्येभ्यो व्यावृत्तत्वं च नित्येष्वेव दृष्टम्, अयन्तु शब्दः श्रावणत्वादिविशेषेण नित्येभ्योऽनित्येभ्यश्च व्यावृत्तः,

तन्न जानीमहे किं नित्येभ्यो व्यावृत्तत्वादात्मादिवन्नित्य इति? न च नित्यत्वानित्वयोरेकत्र संभवोऽस्ति परस्परपरिहारस्थितिधर्मत्वात्। न चात्यन्तसंशयप्रसंगः, सहकारिकारणस्योपलब्ध्यनुपलब्ध्यव्यवस्थादेः सातत्येनासंभवात्। नाप्यनिवृत्तिप्रसंगः, कृतकत्वादिविशेषदर्शनान्निवृत्तेः। न च विशेषत्वसामान्याच्छ्रावणात्वादिवत्कृतकत्वादितोपि संशयप्रसंगः, कृतकत्वादेरनित्यत्वाविनाभावित्वेनान्यत्रोपलब्धत्वादिति। तस्मादसाधारणोऽपि धर्मः संशयहेतुरिति स्थितम्।

अथवाऽनेकश्चासौ धर्मश्चेति कर्मधारयस्तेन विरुद्धानेकधर्मस्यैकत्रोपलभ्यमानस्य संशयहेतुत्वं लभ्यते, यथा किं नु क्रियावत्त्वात् शरवन्मूर्तं मनः स्यादुतास्पर्शत्वादाकाशवदमूर्तमिति? न च मूर्तत्वामूर्तत्वयोरेकत्र सम्भवः, परस्परपरिहारस्थितिधर्मत्वात्। उपलब्ध्यनुपलब्ध्यव्यवस्थादेश्चात्रापि सहकारित्वमतो न सर्वदा सर्वत्र वा संशयप्रसंग इति। तुल्यबलत्वे तयोर्विरोधान्निर्णयानुत्पादकत्वं स्यान्न संशयोत्पादकत्वमिति चेत्, न; अत एव तत्सिद्धेः। नह्ययं निर्णयानुत्पत्तावचेतनकुड्यादिवदास्ते विपर्येति वा, किं तर्हि? पर्यालोचयन् प्रश्नं वा कुर्वन्नुपलभ्यते न च संशयमन्तरेण पर्यालोचनं प्रश्नकरणं वा युज्यते। अनध्यवसाय इति चेत्-

अथ मन्यसे निर्णयानुत्पत्तावनध्यवसायोऽस्य न तु संशय इति, तदयुक्तं, विप्रतिपत्तितोऽपि अनध्यवसायप्रसंगात्। न हि विप्रतिपत्त्या सहास्यानेकधर्मस्य विशेषः कश्चिदस्ति। किं चानध्यवसायस्यापि संशयेऽन्तर्भावप्रतिपादनात्। प्रदेशान्तरे च विरुद्धधर्मद्वयस्य संशयहेतुत्वेन स्वयमुक्तत्वात्। तथा ''गमनत्वं किं कर्मत्वपर्याय आहोस्विदपरं सामान्यमिति? प्रश्नं कुर्वतः कुतस्ते संशय इत्यनुयोगं च कृत्वा सर्वेषूत्क्षेपणादिषु कर्मत्ववदनुगतप्रत्ययहेतुत्वमुत्क्षेपणादिवत्पृथगभिहितत्वं च धर्मद्वयं संशयहेतुत्वेनोक्तमिति''। तस्मादनेकोऽपि धर्मः संशयहेतुरिति।

विप्रतिपत्तिरिति, व्याहतः प्रवादो विप्रतिपत्तिः। तांश्शृण्वतः पूर्वोक्तसहकारिसद्भावे सति संशयो भवति—किं भौतिकानीन्द्रियाण्युताभौतिकानीति? किं शरीरादिव्यतिरिक्त आत्मास्त्युत नास्ति? नित्योऽनित्यो वेत्यादिविप्रतिपत्तयो द्रष्टव्या इति। विधिमुखेन प्रवृत्तं ज्ञानम् उपलब्धिः। प्रतिषेधमुखेन प्रवृत्तं ज्ञानं ज्ञानानुत्पादश्च अनुपलब्धिः, तयोः पृथक् संशयहेतुत्वमव्यवस्थाविशेष-

णत्वं च तेनात्र पञ्चसूत्री द्रष्टव्या-उपलब्ध्युपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः, अनुलब्ध्युपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति, एवं समानधर्मोपपत्तेरित्यादिष्वपि योज्यम्। एवं च सर्वत्राप्युपलब्धिविषयेऽनुपलब्धिविषये च संशयप्रसंग इत्यनुपपन्नं चोद्यम्, न ह्यत्रोपलब्धिमात्रमनुपलब्धिमात्रं वा संशयकारणमिष्टमिति भवतु नामैवं तथाप्यनयोः समानधर्मादर्थान्तरत्वं नास्ति। कथं? यदि तावदुपलब्ध्यनुपलब्धिविषय एव सत्यासत्यत्वेन संशयस्तदोपलब्धित्वमनुपलब्धित्वं च सामान्यम्। अथोपलभ्यमानानुपलभ्यमानेषु जलपिशाचादिषु विद्यमानाविद्यमानत्वेन संशयः, तथापि ज्ञानावभासित्वमनवभासित्वं च सामान्यमिति। अत्रैके परिहरन्ति समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे, एतावता विशेषेण पृथग्वचनमिति। वयं तु ब्रूमः-प्रयोजनवशात्पृथगभिधानम्। कथम्? अनुपलब्धिमात्रेण वादिनः स्वर्गापूर्वदेवतादेरसत्त्वमिच्छन्ति, उपलब्धिमात्रेण शब्दे स्थायित्वं शरीरे चैतन्यादिकं सामान्यादेः स्वाश्रयेणाभेदं चेच्छन्ति। तन्निराकरणार्थमुपलब्ध्यनुपलब्धिमात्रस्य संदेहनिमित्तमुक्तमिति।

# तर्कभाषायां संशयः

एकस्मिन् धर्मिणि विरुद्धनानार्थावमर्शः संशयः। स च त्रिविधः विशेषादर्शने सति समानधर्मदर्शनजः, विप्रतिपत्तिजः, असाधारणधर्मजश्चेति। तत्रैको विशेषादर्शने सति समानधर्मदर्शनजः। यथा 'स्थाणुर्वा पुरुषो वेति'। एकस्मिन्नेव हि पुरोवर्तिनि द्रव्ये स्थाणुत्वनिश्चायके वक्रकोटरादिकं पुरुषत्वनिश्चायकं च शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्म-मूर्ध्वत्वादिकं च पश्यतः पुरुषस्य भवति संशयः 'किमयं स्थाणुर्वा पुरुषो वा' इति।

द्वितीयस्तु संशयो विशेषादर्शने सति विप्रतिपत्तिजः। स यथा 'शब्दो नित्यः उत अनित्यः' इति, तथा ह्येको ब्रूते 'शब्दो नित्य' इति। अपरो ब्रूते 'शब्दोऽनित्य' इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुंसो विशेषमपश्यतो भवति संशयः 'किमयं शब्दो नित्य उतानित्य' इति।

तृतीयोऽसाधारणधर्मजस्तु संशयः। यथा नित्यादनित्याच्च व्यावृत्तेन भूमात्रासाधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यत्वाऽनित्यत्वसंशयः। तथा हि सकलनित्यव्यावृत्तेन गन्धवत्त्वे योगाद् 'भूः किमनित्या उत सकलानित्यव्यावृत्तेन तेनैव योगान्नित्या' इति संशयः।

**संशय**-प्रमाण आदि सोलह पदार्थो में 'प्रमेय' दूसरा पदार्थ है, उसके बारह भेदों में 'अपवर्ग' अन्तिम भेद है। उसका निरूपण कर देने से प्रमेय का निरूपण पूर्ण हो जाता है। इस प्रकार अब तक प्रमाण और प्रमेय इन दो पदार्थों का निरूपण सम्पन्न हुआ। अब तीसरे पदार्थ 'संशय- के निरूपण का अवसर है। इसलिए अब उसका उपक्रम किया जा रहा है।

**लक्षण और विभाग**-एक धर्मी में परस्पर विरुद्ध अनेक धर्मो के अवमर्श—बोध का नाम है 'संशय'। उसके तीन भेद हैं–साधारणधर्मज,

विप्रतिपत्तिज और असाधारणधर्मज। 'साधारणधर्मज' का अर्थ है 'साधारणधर्मयुक्त'। 'साधारण धर्म का अर्थ है परस्पर विरुद्ध दो धर्मों के साथ रहने वाला धर्म। किसी एक धर्मी में इस धर्म का ज्ञान होने पर विशेषादर्शन दशा में धर्मी में किसी एक कोटि में इस धर्म का निर्णय न होने की स्थिति में जो संशय उत्पन्न होता है, वह 'साधारणधर्मज' संशय कहा जाता है जैसे 'अयं स्थाणुर्वा पुरुषो वा-यह स्थाणु-ठूठा वृक्ष है अथवा पुरुष है'। इस ज्ञान में अयं सामने दीखने वाले पदार्थ में स्थाणुत्व और पुरुषत्व का भान होता है। स्थाणुत्व और पुरुषत्व यह दोनों परस्पर विरुद्ध धर्म हैं, क्योंकि यह दोनों एक दूसरे के साथ नहीं रहते। इन दोनों के साथ रहने वाला धर्म है ऊर्ध्वता-ऊँचाई इस उँचाई का, सामने दीखने वाले किसी एक धर्मी में जब इस प्रकार ज्ञान होता है यह (सामने दीख पड़ने वाला पदार्थ) परस्परविरोधी स्थाणुत्व और पुरुषत्व के साथ रहने वाला धर्म ऊर्ध्वता का आश्रय है' तब यदि उस पदार्थ में विशेष दर्शन नहीं रहता अर्थात् स्थाणुत्व का निश्चय कराने वाले उसके व्याप्त धर्म कुटिल कोटर टेढ़े मेढ़े पोल आदि का अथवा पुरुषत्व का निश्चय कराने वाले उसके निश्चय नहीं रहता, तब उस धर्मी के सम्बन्ध में इस प्रकार का ज्ञान उत्पन्न होता है कि यह स्थाणु है अथवा पुरुष है। यह इसी कारण उत्पन्न होता है कि इसमें वह ऊँचाई है जो स्थाणु में होती है और पुरुष में भी होती है और उन दोनों में किसी एक का कोई चिह्न उपलब्ध नहीं है। इस प्रकार परस्परविरुद्ध दो धर्मों के समानाधिकरण धर्म से एक धर्मी में उन धर्मो का जो ज्ञान उत्पन्न होता है समानधर्मज समानाधिकरणधर्मवद्धर्मिज्ञानजन्य' संशय कहा जाता है।

यह संशय परस्परविरोधी दो भावात्मक धर्मों का है। इस संशय के उदय के लिए उन दोनों धर्मों के स्वरूपज्ञान और दोनों में विरोधज्ञान की अपेक्षा होती है जबकि इन दोनों में किसी एक के ज्ञान से दूसरे के ज्ञान में न कोई सहायता मिलती है और न दोनों का विरोध ही त्वरित प्रतीत होता है। अतः परस्परविरोधी भावात्मक धर्मो के ऐसे संशय कम ही होते हैं। अधिकतर संशय ऐसे होते हैं जिनमें एक धर्मी में परस्पविरुद्ध दो भावाभावात्मक धर्मों का भान होता है, जैसे अयं स्थाणुर्न वा यह स्थाणु है अथवा स्थाणु नहीं है। इस ज्ञान में 'अयं' में स्थाणुत्व

और स्थाणुत्वाभाव का भान होता है। इन दोनों में स्थाणुत्व के भाव में स्थाणुत्वाभाव के ज्ञान में सहायता मिलती है। क्योंकि स्थाणुत्व स्थाणुत्वाभाव का प्रतियोगी है और प्रतियोगी का ज्ञान अभावज्ञान में कारण होता है। उन दोनों का विरोध भी सुस्पष्ट और सुगम होता है क्योंकि भावाभाव की परस्परविरोधिता आपारमर प्रसिद्ध होती है।

विप्रतिपत्तिज–'विप्रतिपत्तिज' का अर्थ है 'विप्रतिपत्तियुक्त'। 'विप्रतिपत्ति' का अर्थ है 'परस्परविरुद्ध दो धर्मों की प्रतिपत्ति उपस्थित का जनक शब्द। इस प्रकार का शब्द जिस संशय के उदय में सहायक होता है उस संशय को 'विप्रतिपत्तिज' संशय कहा जाता है। जैसे शब्द एक पदार्थ  है, उसके विषय में एक मनुष्य कहता है कि शब्द नित्य है और दूसरा कहता है क शब्द अनित्य है। सुनने वाले मध्यस्थ पुरुष को इन वाक्यों से शब्दरूप धर्मी, तथा नित्यत्व और अत्यित्व-रूप परस्पर विरुद्ध धर्मों की उपस्थिति होती है। यदि उसे शब्द में नित्यत्व अथवा अनित्यत्व के निश्चायक विशेष धर्म का विषय नहीं रहता तो उसे उक्त शब्दज उपस्थिति से शब्द में नित्यत्व अनित्यत्व का मानस संशय उत्पन्न होता है। उस संशय को शब्दः नित्यो न वा शब्द नित्य है अथवा अनित्य इस शब्द से अभिहित किया जाता हैं इस प्रकार उत्पन्न होने वाले शब्दमूलक संशय को ही 'विप्रतिपत्तिज' संशय कहा जाता है।

**असाधारणधर्मज**–'असाधारण धर्मज' का अर्थ है 'असाधारणधर्मप्रयुक्त'। 'असाधारणधर्म' का अर्थ है 'परस्परविरुद्ध दो धर्मों में किसी के भी अधिकरण में न रहने वाला धर्म। ऐसे धर्म का किसी एक धर्मी में ज्ञान होने पर धर्मों में किसी एक धर्म के निश्चय विशेष धर्म का निश्चय न होने की दशा में, उस धर्मी में उन परस्पर विरुद्ध धर्मों का जो ज्ञान उत्पन्न होता है, उसे असाधारण धर्मज' संशय कहा जाता है। जैसे 'गन्ध से पृथिवी में नित्यत्व और अनित्यत्व का संशय।

नित्यत्व और अनित्यत्व परस्परविरुद्ध धर्म हैं। 'गन्ध' उनमें किसी के भी अधिकरण में निश्चित नहीं हैं, क्योंकि न वह आकाश आदि नित्य पदार्थों में रहता है और न जल आदि अनित्य पदार्थों में रहता

है। वही गन्ध जब पृथिवी में ज्ञात होता है और पृथिवी में नित्यत्व अथवा अनित्यत्व के निश्चायक विशेष धर्म का निश्चय नहीं रहता, तब पृथिवी में नित्यत्व-अनित्यत्व का संशय होता है। क्योंकि नित्य और अनित्यके अतिरिक्त तीसरी कोई श्रेणी पदार्थ की होती नहीं, जिसमें कि पृथिवी का समावेश किया जा सके। यह संशय नित्यत्व अत्यित्वत्व इन दोनों कोटियों के असमानाधिकरण गन्धात्मक धर्म से उक्त रीत्या प्रादुर्भूत होने के कारण 'साधारणधर्मज' संशय कहा जाता है।

'न्यायसूत्र' में संशय का वर्गीकरण 'तर्कभाषा में किये गये संशय के वर्गीकरण से कुछ भिन्न है। जैसे वहाँ का सूत्र है–

समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।

इसमें 'संशयः' से लक्ष्य का निर्देश है। 'विमर्श' से लक्षण का निर्देश है विशेषापेक्षा से विशेषादर्शनाभावरूप सामान्य कारण का निर्देश है। और शेष भाग से शेष कारण का निर्देश कर उसके पांच भेद बताये गये हैं।

'समानधर्मोपपत्ति' का अर्थ है–'एकधर्मी में परस्परविरुद्ध कोटिद्वय के समानाकरण धर्म का ज्ञान। अनेकधर्मोपपत्ति का अर्थ है-एकधर्मी में परस्परविरुद्ध के असमानाधिकरण धर्म का ज्ञान। विप्रतिपत्ति' का अर्थ है धर्मी तथा विरुद्ध धर्मों का उपस्थापक शब्द।' उपलब्धि की अव्यवस्था का अर्थ है–अनुपलब्ध होने वाली वस्तु असत् ही होती है। इस नियम का अभाव। संशय के दो कारणों का अभिप्राय यह है कि सदेव उपलभ्यते सद् वस्तु का ही उपलम्भ है यह नियम नहीं है क्योंकि ग्रीष्म के मध्याह्न में मरुभूमि में सूर्य की चमकती माला में जल की उपलब्धि होती हैं किन्तु जल वहाँ सत् नहीं होता। इसी प्रकार महादेव नोपलभ्यते असत् अनुपलभ्यमान होता है यह भी नियम नहीं है' क्योंकि वह्नि के प्रकाश में आकाशमण्डल में तारायें उपलब्ध नहीं होती जबकि उस समय असत् नहीं होती है।

'तर्कभाषा' में संशय के न्यायसूत्रोक्त अन्तिम भेदों का उल्लेख नहीं किया गया है कि उन दोनों का समावेश 'साधारणधर्मज' संशय में ही सम्पन्न हो जाता है।

'न्यायसूत्र' में साधारणधर्मज और असाधारणधर्मज संशयों के उल्लेख के बाद अविप्रतिपत्तिज संशय का उल्लेख किया गया है। किन्तु तर्कभाषा' में वैसा न कर दोनों भाष्य में 'विप्रतिपत्तिज' का उल्लेख करने से अन्य की अपेक्षा उसका महत्त्व सूचित होता है। वह महत्त्व यही है कि विप्रतिपत्तिज विचार कथा का प्रवर्तक होता है जब कि अन्य दोनों संशय विचार के प्रवर्तक होते हैं।

संशय और समुच्चय में भेद-प्रश्न होता है जैसे संशय में एक धर्मी में विरुद्ध दो धर्मों का भान होता है उसी प्रकार समुच्चय समूहालम्बन निश्चय में होता है तो फिर दोनों में भेद क्या है? उत्तर है कि दोनों में भेद के कारण अनेक से संशय में भासित होने वाले धर्मों में संशय के पूर्व परस्पर में विरोध का ज्ञान है किन्त समुच्चय के पूर्व नहीं होता। संशय में उन दोनों धर्मों में परस्पर विरोध होता है जबकि समुच्चय में एसा नहीं होता। संशय में भासित होने वाले धर्मो में कोटिता नाम की एक नयी विषयता होती है जिसका आश्रय होने से उन को कोटि कहा जाता है। समुच्चय में ऐसी कोई विषयता नहीं होती। संशय में ज्ञानद्वय से निरूपित एक विशेषता होती है जब कि समुच्चय में प्रकारता के भेद  योग्यता का भेद अनिवार्य है।

## तर्कसंग्रहे संशयः

अयथार्थानुभवस्त्रिविधः-संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्धानानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वा इति।

# तर्कामृतम्

अनुभवो द्विविधः प्रमाऽयथार्थश्च। तत्र प्रमा चतुर्विधा। सा वक्ष्यते। अयथार्थज्ञानं चतुर्विधः संशयो विपर्ययः स्वप्नोऽनध्यवसायश्चेति। संशयो यथा–समानधर्मवद्धर्मिज्ञानविशेषदर्शनकोटिद्वयस्मरणैरयं स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते स एव संशयः। विपर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषा-दर्शनैककोटिस्मरणैः शुक्ताविदं रजमितिज्ञानं जन्यते। तत्र गुरुमते इदमित्यनुभवात्मकं ज्ञानं, रजतमिति स्मरणात्मकं, तेन ग्रहणस्मरणात्मकं ज्ञानद्वयं न तु रजतत्व- विशिष्टज्ञानमिदम्, अन्यथा भासमानसामग्र्यसम्भवात्। प्रवृत्तिश्च स्वतन्त्रोपस्थितेष्टभेदाग्रहात्। नैयायिकमते प्रवर्त्तकं विशिष्टज्ञानं, तेन भ्रमः सिद्ध्यति। स्वप्नस्त्वनुभूतपदार्थस्मरणैरदृष्टेन धातुदोषेण च जन्यते अनध्वसायश्च किञ्चिदिति ज्ञानम् विशेषादर्शनाद्भवति। अत्र यद्ययं निर्वह्निः स्यान्निर्धूमः स्यादिति तर्को विपर्ययमध्ये बोध्यः। तत्र नैयायिकमते स्वप्नाध्यवसायौ विपर्ययमध्ये प्रविष्टौ, तेन तन्मतेऽयथार्थज्ञानं संशयो विपर्ययश्चेति।।29।।

**।। तर्कामृतविवृतिटीकायां संशयः।।**

अथानुभवं विभजतेऽनुभवो द्विविध इति। प्रमेति भ्रमान्य इत्यर्थः। वस्तुतस्तु निर्विकल्पकस्य प्रमात्वोपपत्तये विशेष्यावृत्त्यप्रकारकानुभवत्वरूपं प्रमात्वं वाच्यमिति ध्येयम्। स्मृतिकरणस्य प्रमाणान्तरत्वापत्तिभिया स्मृतेः प्रमात्वेन विभागो नाभिहित इतिभावः। अत एव यथार्थानुभवत्वमित्यनुभवत्वघ-टितप्रमालक्षणमिति नव्याः। वक्ष्यत इति। अथ प्रमा कथ्यत इत्यादिनेतिशेषः। अयथार्थज्ञानमिति। अयथार्थानुभव इत्यर्थः। स्वप्नादेः स्मृतिरूपताया भाष्यादिविरुद्धत्वान्निर्युक्तिकत्वाच्च। विभजते तच्चतुर्विधमिति। अयञ्च विभागः कणादमतेन, नैयायिकमतेन तु स्वप्नाध्यवसाययोर्विपर्ययमध्येऽन्तर्भावस्य वक्ष्यमाणत्वात्।

विधाचतुष्टयादिमं संशयं निरूपयति संशयो यथेति। तत्र संशयत्वं

न जातिश्चाक्षुषत्वादिना साङ्कर्यप्रसङ्गात् किन्तु वक्ष्यमाणज्ञानविशेषत्वरूपम्। उच्चैस्तरत्वस्य स्थाणुपुरुषसाधरण्याग्रहे स्थाणुर्वेति संशयानुत्पादाह समान-धर्मवद्धर्मिज्ञानेति। समानः—विरुद्धकोटिद्वयसहचरितो यो धर्मस्तद्वान् यो धर्मी तद्विषयकज्ञानेत्यर्थः। स्थाणुत्वव्याप्यवक्रकोटरादिमानयमित्यादिनिश्चय-सत्त्वे स्थाणुर्वेत्यादिसंशयाजननादाह विशेषादर्शनेति। कोटिव्याप्यवत्त्वस्यानिश्च-येत्यर्थः। स्थाणुत्वपुरुषत्वरूपकोट्योरनुपस्थितत्वे स्थाणुत्वादिकोटिसंशयासम्भवा-दाह कोटिद्वयेत्यादि। अत्र कोटिद्वयेत्युपलक्षणं, संशयस्य चतुष्कोटिकत्वमते कोटिचतुष्टयस्मृतेरावश्यकत्वात्।

वस्तुतस्तु शब्दत्वे नित्यानित्यव्यावृत्तत्वज्ञानेन, शाब्दसंशयोपगन्तृमते शब्दो नित्यो न वेति विप्रतिपत्त्या च शब्दो नित्यो नवेति संशयजननादसाधारण-धर्मवद्धर्मिज्ञानस्य विप्रतिपत्तेश्च संशयहेतुत्वं मन्तव्यम्। तथाच साधारण-धर्मवद्धर्मिज्ञानजन्योऽसाधारणधर्मवद्धर्मिज्ञानजन्यो विप्रतिपत्तिजन्यश्चेति त्रिविधः संशयः पर्यवसन्नः। विशेषादर्शनजन्यत्वस्य कोटिस्मरणजन्यत्वस्य च धर्मिज्ञानजन्यत्वस्येव संशयत्वसमव्याप्ततया संशयविभाजकत्वासम्भवेन न संशयस्य चतुर्विधत्वाद्यापत्तिः। तथाच विशेषादर्शनादेः साधारणधर्मज्ञानादि-सहकारितेति तात्पर्यम्।

ननु 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः इत्यक्षपादसूत्रे प्रामाण्यसंशयस्याप्रामाण्यसंशयस्य च विषयसंशये स्वातन्त्र्येण हेतुत्वमिवानुक्तसमुच्चायकचकारेण व्याप्यसंशयस्य व्यापकसंशयं प्रति पृथक्कारणत्वमभिहितम्। एवञ्च संशयस्य त्रैविध्यादाधिक्यमेवोचितमिति चेन्न प्रामाण्यसंशयादिसत्त्वेऽपि लाघवेन साधारणधर्मवद्धर्मिज्ञानादेरेव संशयहेतुत्वस्योपगन्तव्यत्वात्। अन्यथा कार्यकारणभावबाहुल्याद् गौरवापत्तेः। प्रामाण्यसंशयादेस्तु कथञ्चित् प्रयोजकत्वकल्पनेऽपि क्षतिविरहात्। अस्त्वेवं, तथापि संशयत्वावच्छिन्नं प्रति साधारणधर्मवद्धर्मिज्ञानत्वादिना हेतुत्वस्य कल्पयितुमशक्यत्वादत्र हेतुहेतुमद्भावः परामर्शकारणताविचारदिशा परिष्करणीयः।

# न्यायभाष्ये संशयः

स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते–

**समानानेकधर्मोपपत्तेर्विप्रतिप्रत्तेरुपलब्ध्यऽनुपलब्ध्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः॥ 23॥**

समानधर्मोपपत्तेर्विशेषापेक्षा विमर्शः संशय इति = स्थाणुपुरुषयोः समानं धर्ममाऽऽरोहपरिणाहौ पश्यन् पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः किंस्विदित्यनन्तरं नावधारयति तद् अनवधारणं ज्ञानं संशयः। 'समानमनयोर्धममुपलभे विशेषमन्यरतस्य नोपलभे' इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्तिका वर्तते तेन विशेषापेक्षा विमर्शः संशयः।

अनेकधर्मोपपत्तेरिति–समानजातीयमऽसमानजातीयं चाऽनेकं तस्यानेकस्य धर्मोपपत्तेः–विशेषस्योभयथा दृष्टत्वात्=समानजातीयेभ्योऽसमान-जातीयेभ्यश्चार्था विशिष्यन्ते, यथा– गन्धवत्त्वात् पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजत्वं विशेषः तस्मिन् द्रव्यं गुणः कर्म वेति संदेहः विशेषस्योभयथा दृष्टत्वात् = किं द्रव्यस्य सतो गुणकर्मभ्यो विशेषः? आहोस्विद् गुणस्य सत इति? अथ कर्मणः सत इति? विशेषापेक्षा – अन्यतमस्य व्यवस्थापकं धर्मं नोपलभे इति बुद्धिरिति।

विप्रतिपत्तेरिति –व्याहतमेकार्थदर्शनं विप्रतिपत्तिः= व्याघातः = विरोधः= असहभाव इति अस्त्यात्मा इत्येकं दर्शनम् नास्त्यात्मा इत्यपरम् न च सद्भावाऽसद्भावौ सहैकत्र संभवतः न चान्यतरसाधको हेतुरुपलभ्यते तत्र तत्त्वानवधारणं संशय इति।

उपलब्ध्यव्यवस्थातः खल्वपि सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु चाविद्यमानमुदकमिति अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य

प्रमाणस्याऽनुपलब्धे 'किं सदुपलभ्यते? अथाऽसत्? इति संशयो भवति।

अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि असच्चानुत्पन्नं निरुद्धं वा ततः क्वचिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उताऽसन्निति संशयो भवति, विशेषापेक्षा पूर्ववत्। पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्थः उपलब्ध्यनुपलब्धी पुनर्ज्ञातृगते एतावता विशेषेण पुनर्वचनम्। समानधर्माधिगमात्समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति।

## न्यायभाष्ये संशयपरीक्षा

अत ऊर्ध्वं प्रमाणादिपरीक्षा सा च "विमृश्य पक्षप्रतिपक्षाभ्या-मर्थावधारणं निर्णयः 1-1-42 इत्यग्रे विमर्श एव परीक्ष्यते।

**समानानेकधर्माध्यवसायादन्तरधर्माध्यवसायाद्वा न संशयः॥ 1॥**

समानस्य धर्मस्याऽध्यवसायात् संशयो न धर्ममात्रात्, अथ वा 'समानमनयोर्धर्ममुपलभे 'इति धर्मधर्मिग्रहणे संशयाभाव इति, अथ वा समानधर्माध्यवसायादर्थान्तरभूते धर्मिणि संशयोऽनुपपन्नः न जातु रूपस्यार्थान्तरभूतस्याऽध्यवसायादर्थान्तरभूते स्पर्शे संशय इति, अथ वा नाऽध्यवसायात् = अर्थावधारणादऽनवधारणज्ञानं संशय उपपद्यते = कार्यकारणयोः सारूप्याभावादिति। एतेन "अनेकधर्माध्यवसायात्"- इति व्याख्यातम्। अन्यतरधर्माध्यवसायाच्च संशयो न भवति-ततो ह्यन्यतरावधारणमेवेति।।

**विप्रतिपत्त्यऽव्यवस्थाध्यवसायाच्च॥2॥**

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः, किं तर्हि? विप्रतिपत्तिमुपलभमानस्य संशयः, एवमन्वयव्यवस्थायामपीति। अथ वा 'अस्त्यात्मा' इत्येके 'नास्त्यात्मा' इत्यपरे मन्यन्ते इत्युपलब्धे, कथं संशयः स्यात्? इति। तथोपलब्धिरव्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागेनाध्यवसिते संशयो नोपपद्यते इति।।

**विप्रतिपत्तौ च संप्रतिपत्तेः॥ 3॥**

यां च विप्रतिपत्तिं भवान् संशये हेतुं मन्यते सा संप्रतिपत्तिः-सा

हि द्वयोः प्रत्यनीकधर्मविषया तत्र यदि विप्रत्तिपत्तेः संशयः? संप्रतिपत्तेरेव संशय इति॥

**अव्यवस्थात्मनि व्यवस्थितत्वाच्चाऽव्यवस्थायाः॥**

न संशय यदि तावदियमव्यवस्था आत्मन्येव व्यवस्थिता? व्यवस्थानादव्यवस्था न भवतीत्यनुपपन्नः संशयः अथाऽव्यवस्थाऽऽत्मनि न व्यवस्थिता? एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति॥

**तथाऽत्यन्तसंशयः तद्धर्मसातत्योपपत्तेः।**

येन कल्पेन भवान् समानधर्मोपपत्तेः संशय इति मन्यते तेन खल्वऽत्यन्तसंशयः प्रसज्यते समानधर्मोपपत्तेरनुच्छेदात् संशयानुच्छेदः नायमतद्धर्मा धर्मी विमृश्यमानो गृह्यते सततं तु तद्धर्मा भवतीति॥

**अस्य प्रतिषेधप्रपञ्चस्य संक्षेपेणोद्धारः**

**यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नाऽसंशयो नाऽत्यन्तसंशयो वा॥ 6**

न संशयानुत्पत्तिः संशयानुच्छेदश्च प्रसज्यते कथम्? यत्तावत् 'समानधर्माध्यवसायः संशयहेतुः न समानधर्ममात्रमिति एवमेतत्। कस्मादेवं नोच्यते? इति ''विशेषापेक्षः'' इतिवचनात् तत्सिद्धेः, विशेषस्यापेक्षा=आकाङ्क्षा सा चानुपलभ्यमाने विशेषे समर्था। न चोक्तम्-'सामर्थ्येन विज्ञायते समानधर्माध्यवसायात्' इति।

उपपत्तिवचनाद्वा

समानधर्मोपपत्तेरित्युच्यते, न चान्या सद्भावसंवेदनादृते समानधर्मोपपत्तिरस्ति, अनुपलभ्यमानसद्भावो हि समानो धर्मोऽविद्यमानवद् भवतीति।

विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानं यथा लोके 'धूमेनाग्निरनुमीयते' इत्युक्ते 'धूमदर्शनेनाग्निरनुमीयते' इति ज्ञायते, कथम्? दृष्ट्वा हि धूममथाग्निमनुमिनोति नाऽदृष्टे न च वाक्ये दर्शनशब्दः श्रूयते,

अनुजानाति च वाक्यस्यार्थप्रत्ययायकत्वं तेन मन्यामहे विषयशब्देन प्रत्ययस्याभिधानं बौद्धाऽनुजानाति, एवमिहापि समानधर्मशब्देन समानधर्माध्यवसायमाहेति।

यदुक्तम्–'समानमनयोर्धर्ममुपलभे इति धर्मधर्मिग्रहणे संशयाभावः' इति पूर्वदृष्टविषयमेतत् = यावहमर्थौ पूर्वमद्राक्षं तयोः, समानं धर्ममुपलभे विशेषं नोपलभे इति, कथं नु विशेषं पश्येयं येनाऽन्यतरमवधारयेयमिति, न चैतत् समानधर्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्तते इति।

यच्चोक्तम्–नार्थान्तराध्यवसायादन्यत्र संशय इति, यो ह्यर्थान्तराध्यवसायमात्रं संशयः हेतुमुपाददीत स एवं वाच्य इति।

यत्पुनरेतत् कार्यकारणयोः सारूप्याभावादिति, कारणस्य भावाभावयोः कार्यस्य भावाभावौ कार्यकारणयोः सारूप्यम्= यस्योत्पादाद् यदुत्पद्यते यस्य चानुत्पादाद् यन्नोत्पद्यते तत् कारणं कार्यमितरद् इत्येतत्सारूप्यम् अस्ति च संशयकारणे संशये चैतदिति। एतेन अनेकधर्माध्यवसायादिति प्रतिषेधः परिहृत इति।

यत्पुनरेतदुक्तम् विप्रतिपत्यव्यवस्थाध्यवसायाच्च न संशय इति पृथक्प्रवादयोर्व्याहतमर्थमुपलभे विशेषं च न जानामि =नोपलभे येनान्यतरम-वधारयेयं तत्कोऽत्र विशेषः स्याद् येनैकतरमवधारयेयमिति संशयो विप्रतिपत्तिजनितोऽयं न शक्यो विप्रतिपत्तिसंप्रतिपत्तिमात्रेण निवर्तयितुमिति। एवम् उपलब्ध्यनुपलब्ध्यव्यवस्थाकृते संशये वेदितव्यमिति।

यत्पुनरेतत् "विप्रतिपत्तौ च संप्रतिपत्तेः" इति, विप्रतिपत्तिशब्दस्य योऽर्थः तदध्यवसायो विशेषापेक्षः संशयहेतुस्तस्य च समाख्यान्तरेण न निवृत्तिः = समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायश्च विशेषापेक्षः संशयहेतुः न चास्य संप्रतिपत्तिशब्दे समाख्यान्तरे योज्यमाने संशयहेतुत्वं निवर्तते तदिदमकृतबुद्धिसंमोहनमिति।

यत्पुनः "अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः" इति, संशयहेतोरर्थस्याऽप्रतिषेधात् अव्यवस्थाभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दान्तरकल्पना व्यर्था, शब्दान्तरकल्पना अव्यवस्था खल्वऽव्यवस्था न

भवति–अव्यवस्थात्मनि व्यवस्थितत्वादिति'। नाऽनयोरुपलब्ध्यनुपलब्ध्योः सदसद्विषयत्वं विशेषापेक्षं संशयहेतुर्न भवतीति प्रतिषिध्यते। यावता चाव्यवस्थात्मनि व्यवस्थिता न तावताऽऽत्मानं जहाति तावता ह्यनुज्ञाता भवत्यव्यवस्था, एवमियं क्रियमाणापि शब्दान्तरकल्पना नार्थान्तरं साधयतीति।

यत्पुनरेतत्–''तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः'' इति, नायं समानधर्मादिभ्य एव संशयः। किं तर्हि? तद्विषयाध्यवसायाद् विशेषस्मृतिसहितात् इति, अतो नात्यन्तसंशय इति।

''अन्यतरधर्माध्यवसायाद्वा न संशयः'' इति तन्न युक्तम्–विशेषापेक्षो विमर्शः संशयः इतिवचनात् विशेषश्चान्यतरधर्मो न तस्मिन्नऽध्यवसीयमाने विशेषापेक्षा संभवतीति।।

**यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः।**

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा तत्र तत्रैवं संशये परेण प्रतिषिद्धे समाधिर्वाच्य इति, अतः सर्वपरीक्षाव्यापित्वात् प्रथमं संशयः परीक्षित इति।

# वैशेषिकसूत्रोपस्कारे संशयः

चतुर्णां भूतानां रूपादीनि लक्षणानि कारणगुणपूर्वकतया तात्त्विकानि अन्यथा त्वौपाधिकानीति व्यवस्थितं पूर्वमेव। विशेषगुणशून्यविभुलिङ्गञ्चोक्तम्। इदानीमाकाशस्य लिङ्गं शब्दः परीक्षणीयः। सन्ति चात्र तान्त्रिकाणां विप्रतिपत्तयः। केचिच्छब्दं द्रव्यमाचक्षते, केचिद् गुणम्, गुणत्वे सत्यप्येके नित्यमाहुः अपरे त्वनित्यम्। अन्ये तु शब्देऽपि स्फोटाख्यं शब्दान्तरमाहुः। तदत्र परीक्षामारभमाणः परीक्षाप्रथमाङ्गं संशयमेव तावल्लक्षणतः कारणतश्च व्यवस्थापयन्नाह–

सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः।।17।।

सामान्यप्रत्यक्षादिति। सामान्यवतो धर्मिणः प्रत्यक्षात् ग्रहणात् मतुब्लोपात्। विशेषाप्रत्यक्षादिति। विशेषस्य परस्परव्यावर्त्तकस्य धर्मस्य वक्रकोटरादेः शिरःपाण्यादेश्चाप्रत्यक्षादग्रहणात्। विशेषस्मृतेः विशेषस्य कोटिद्वयस्य स्थाणुत्वपुरुषत्वलक्षणस्य स्मरणात्। स्मरणमपि ग्रहणपरं क्वचिदनुभूयमानधर्मयोरपि कोटित्वात्, चकाराददृष्टादेः संशयकारणस्य संग्रहः। असाधारणो धर्मोऽनध्यवसायात्मकज्ञानजनक इति नोक्तः। यद्वा असाधारणस्यापि व्यावृत्तिद्वारा कारणत्वं सपक्षविपक्षव्यावृत्तिः साधारणधर्म एवेति नोक्तः। विप्रतिपत्तिरपि विरुद्धप्रतिपत्तिद्वयजन्यं वाक्यद्वयं शब्दो नित्य इत्यपरं तदुभयं, तदुभयजन्यञ्च ज्ञानद्वयमयुगपद्भावित्वात् सम्भूय न संशायकमतस्तत्र शब्दत्वादिरसाधारणः, सत्त्वप्रमेयत्वादिः साधारणो वा धर्मः संशायक इति पृथङ् नोक्ता।

समानतन्त्रे गौतमीयेऽनध्यवसायज्ञानस्यानभ्युपगमात् असाधारणो धर्मः संशयकारणत्वेनोक्तः। विप्रतिपत्तेर्विरुद्धवाक्यद्वयस्यान्वयव्यतिरेकशालितया संशयकारणत्वमुक्तम्। न्यायभाष्ये च उपलभ्यमानत्वं यत् संशयकारणमुक्तं सदप्युपलभ्यते असदप्युपलभ्यते इति उपलभ्यमानमिदं सदसद्वेति, यच्चानु-पलभ्यमानत्वं सदपि नोपलभ्यते मूलकीलकोदकादि, असदपि नोपलभ्यते गगनारविन्दादि, तथा च पञ्चविधः संशय इति। तदेतत्सामान्यमेवेति

सामान्यप्रत्यक्षादित्यनेनैव गतार्थम्। न्यायवार्त्तिकेऽपि यत् कारणभेदेन संशये त्रित्वमुक्तं तदपि न सम्भवति व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैवासम्भवात्। न हि तृणारणिमणिजन्यवह्नौ वैजात्यवदत्रापि वैजात्यं कल्पनीयं संशयत्वावच्छिन्नकार्यं प्रति समानधर्मत्वेनैव कारणतायाः कल्पनात्। यच्च प्रधानविधिकोटित्वप्रधाननिषेधकोटित्वादिवैजात्यमुक्तम्, तदननुगतत्वान्नावच्छेदकम्। तथाच संशयो न त्रिविधो न वा पञ्चविधः किन्त्वेकविध एव, प्रकारान्तरेण तु द्वैविध्यं सूत्रकृदेव स्पष्टयति। ननु जिज्ञासाजनकज्ञानं संशय इति न लक्षणम् अनध्यवसायेऽपि गतत्वात्, संस्काराजनकज्ञानं संशय इत्यपि निर्विकल्पकसाधारणं विशिष्टज्ञानत्वेन संशयस्यापि संस्कारजनकत्वात्, संशयत्वञ्च जातिरपि न लक्षणं धर्म्यंशे संशयत्वाभावेन तदंशे तज्जात्यभावात् जातेश्चाव्याप्यवृत्तित्वानभ्युपगमात् इति चेत्, एकस्मिन् धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय इति तल्लक्षणात्॥17॥

द्विविधः संशयो बहिर्विषयकोऽन्तर्विषयकश्च। बहिर्विषयकोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च। तत्र दृश्यमानधर्मिको यथा ऊर्ध्वत्वविशिष्टस्य धर्मिणो दर्शनात् अयं स्थाणुः पुरुषो वेति। अदृश्यमानधर्मिको यथा अरण्ये झाटाद्यन्तरिते गोगवयादिपिण्डे विषाणमात्रदर्शनात् अयं गौर्गवयो वेति।

वस्तुतस्तत्रापि विषाणधर्मिक एव सन्देहो विषाणमिदं गोसम्बन्धि गवयसम्बन्धि वेति। विवक्षामात्रात्तु द्वैविध्याभिधानम्। यत् सामान्यं संशयहेतुस्तदनेकत्र दृष्टं संशायकम् एकत्र धर्मिणि वा दृष्टं संशयहेतुरित्यत्र प्रथमां विधामाह—

**दृष्टञ्च दृष्टवत्॥18॥**

दृष्टमूर्द्धत्वं संशयहेतुः। दृष्टवदिति वतिप्रत्ययः तेन दृष्टाभ्यां स्थाणुपुरुषाभ्यां तुल्यं वर्त्तते पुरोवर्त्तिनि यदूर्ध्वत्वं तद्दृष्टं संशयहेतुरित्यर्थः॥18॥

एकधर्मिविषयं यद् दृष्टं तदुदाहरति—

**यथादृष्टमयथादृष्टत्वाच्च॥19॥**

संशयहेतुरिति शेषः। चकारः पूर्वोक्तसमुच्चयार्थः। अयथादृष्टत्वाद्धेतोर्यथादृष्टमपि संशायकम् यथा—चैत्रो यथा दृष्टः केशवान्, कालान्तरे अयथादृष्टः

केशविनाकृतो दृष्ट इत्यर्थः। क्रमेण तत्रैव चैत्रे वस्त्रावृतमस्तके दृष्टे सति भवति संशयश्चैत्रोऽयं सकेशो निष्केशो वेति। तत्र हि चैत्रत्वं समानो धर्मः संशायकः स चैकत्रैव दृष्ट इत्यभिन्न एव धर्मिणि दृष्टः संशयहेतुः॥19॥

उपलभ्यमानत्वं समानमेव धर्मं संशयकारणमाह–

**विद्याऽविद्यातश्च संशयः॥20॥**

विद्येति। आन्तरसंशयो हि विद्याऽविद्याभ्यां भवति यथा मौहूर्त्तिकः सम्यगादिशति चन्द्रोपरागादि, असम्यगपि। तत्र स्वज्ञाने संशयोऽस्य जायते सम्यगादिष्टमसम्यग्वेति। यद्वा ज्ञानं हि क्वचिद्विद्या भवति क्वचिच्चाविद्या अप्रमा भवति। तथा च ज्ञायमानत्वात् सदिदमसद्वेति संशयो जायते। पुनः संशयग्रहणमिहापि सामान्यप्रत्यक्षादेव संशयो न तु निमित्तान्तरादिति सूचनार्थम्। तथा च "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः'' इति गौतमीये लक्षणे उपलब्ध्यनुपलब्ध्यव्य-वस्थेत्यस्य पृथगेव संशयकारणत्वं कैश्चिदुक्तं तन्निरस्तम्॥20॥

एवं लक्षणतः स्वरूपतश्च परीक्षाप्रथमाङ्गं संशयं व्युत्पाद्य इदानीं परीक्षाविषयं शब्दं धर्मिणं दर्शयन्नाह–

**श्रोत्रग्रहणो योऽर्थः स शब्दः॥21॥**

श्रोत्रं ग्रहणं ग्रहकरणं यस्य स श्रोत्रग्रहणः, अर्थ इति धर्मीत्यर्थः। तथा च शब्दवृत्तिधर्मेषु श्रोत्रग्राह्येषु शब्दत्वतारत्वादिगुणत्वसत्त्वादिषु नातिव्याप्तिः। अर्थपदेन धर्मिपरेण जातिधर्मित्वम् अभिप्रेतम् अतः स्फोटनामा शब्दसमवेतः शब्दो नास्तीति सूचितम्। नन्वेकं पदम् एकं वाक्यमिति प्रतीतिलादश्वश्यं स्फोटोऽङ्गीकर्त्तव्यः, न हि बहुवर्णात्मके पदे बहुवर्णात्मके वा वाक्ये भवत्येकत्वप्रत्ययः। स्फोट इति चार्थस्फुटीकरणाधीना संज्ञा। वर्णानां प्रत्येकं तावदर्थप्रत्ययाजनकत्वमेव, मिलनन्त्वेकवक्तृकाणामाशुतरविनाशिनामसम्भवीति स्फोटादेवार्थप्रत्ययः, तज्ज्ञानमन्तरेणार्थस्फुटीभावाभावात्। स च स्फोटो यद्यपि पदभावेनावस्थितेषु सर्वेष्वेव वर्णेषु तथापि चरमवर्णे स्फुटीभवति। मैवम्। सङ्केतवद्वर्णत्वं पदत्वं तथा च सङ्केतबलादेव पदादर्थप्रतीतौ किं स्फोटेन। वर्णानाम्बहूनामप्येकार्थप्रतिपादकत्वमेकं धर्ममभिप्रेत्य एकं पदमिति भाक्तो व्यवहारः एवं वाक्येऽपि। यदि वर्णातिरिक्तः पदात्मा। कश्चित् प्रत्यक्षतो

गृह्येत स्वीक्रियेतापि स्फोटः सोऽयं स्फोटवादस्तुच्छत्वादुपेक्षितः सूत्रकृता।।21।।

तदेवं शब्दे धर्मिण्युपस्थिते गुणत्वे सत्येव तस्याकाशलिङ्गत्वम्। अतो गुणत्वव्यवस्थापनाय त्रिकोटिकं संशयमुपपादयन्नाह–

**तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्य उभयथा दृष्टत्वात्।।22।।**

शब्द संशय इति शेषः। शब्दे शब्दत्वं श्रोत्रग्राह्यत्वं चोपलभ्यते, तच्च तुल्यजातीयेषु त्रयोविंशतौ गुणेषु अर्थान्तरभूतेषु द्रव्येषु कर्मसु च विशेषस्य व्यावृत्तेः उभयथा उभयत्र दर्शनात् 'शब्दः किं गुणो द्रव्यं कर्म वेति' संशयं जनयति। सामान्यविशेषसमवायकोटित्वन्तु सत्त्वकारणवत्त्वादिवैधर्म्यदर्शनान्न भवति। ननु चासाधारणधर्मस्यानध्यवसायजनकत्वात् संशयजनकत्वं प्रतिषिद्धम् शब्दत्वं श्रोत्रग्राह्यत्वश्चासाधारण एव धर्मः कथं संशयं जनयिष्यतीति चेत्सत्यम्। व्यावृत्तिरस्य जातीयासजातीयसाधारणीति व्यावृत्तेः साधारणस्यैव धर्मस्य संशयजनकत्वेनोक्तत्वात्।

शब्दत्वप्रतियोगिकी व्यावृत्तिः समानो धर्मः उभयगतव्यावृत्तिप्रतियोगित्वञ्च शब्दत्वमसाधारणो धर्मः। तदुक्तं विशेषस्योभयथा दर्शनादिति'। अत्र हि विशेषस्य व्यावृत्तेरुभयत्र सजातीये विजातीये च दर्शनस्य संशयहेतुत्वेनोपादानात् स च समान एव धर्म इति।। 22।।

तदेवं संशयं दर्शयित्वा द्रव्यत्वकोटिव्युदासायाह–

**एकद्रव्यत्वासन्न द्रव्यम्।।23।।**

एकं द्रव्यं समवायि यस्य तदेकद्रव्यं द्रव्यञ्च किमप्येकद्रव्यसमवायिकारणकं न भवतीति द्रव्यवैधर्म्यान्नायं शब्दो द्रव्यमित्यर्थः।। 23

ननु कर्मैकद्रव्यमेव तथा। च शब्दः कर्म स्यादित्यत आह–

**नापि कर्माऽचाक्षुषत्वात्।।24।।**

प्रत्ययस्य शब्दविषयकस्याचाक्षुषत्वात् चक्षुर्भिन्नबहिरिन्द्रियजन्यत्वादित्यर्थः। तथा च शब्दत्वं न कर्मवृत्ति चाक्षुषप्रत्यक्षावृत्तिजातित्वात् रसत्वादिवदिति भावः।।24।।

ननु शब्दः कर्म आशुतरविनाशित्वात् उत्क्षेपणादिवदिति चेदत्राह–

# प्रशस्तपादभाष्ये संशयः

## संशयप्रकरणम्

संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशयः। स च द्विविधः– अन्तर्बहिश्च।

अन्तस्तावत्–आदेशिकस्य सम्यङ्मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति किन्नु सम्यङ्मिथ्या वेति।

बहिर्द्विविधः–प्रत्यक्षविषये चाप्रत्यक्षविषये च। तत्राप्रत्यक्षविषये तावत्–साधारणलिङ्गदर्शनादुभयविशेषाऽनुस्मरणादधर्माच्च संशयो भवति। यथाऽटव्यां विषाणमात्रदर्शनाद् गौर्गवयो वेति।

प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यदर्शनात् वक्रादिविशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावुभयविशेषानुस्मरणादुभयत्राकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किं नु खल्वयं स्थाणुः स्यात्पुरुषो वेति।